वि-५१

शिवगीतासटीक

श्रीगणेशायनमः॥ ॥अद्वैतसमर्थनेपटुमतेर्यस्यप्रतापंसहृच्छ्रुत्वापि
क्वरुचिंसदाविदधतेत्यक्तेषणाभेदिनः॥यद्द्रव्येषुगुणेषुकर्मसुतथाजातौविशे
षेषुचप्रौढाहंकृतयोथतैःसहनिजंसंबंधमुद्भास्यते॥१॥यल्लीलाश्रवणातिथिं
कृतवतःकल्पद्रुमस्याभवत्कंपःस्तंभभरस्तथासमभरच्छेषस्यगोविभ्रमःश्री
कस्याक्षिनिमिषाच्छ्रमस्त्रिदिवसक्तोभाग्यलोपावहोव्यक्तःश्छिद्रभरःपरस्य
मिषतोदातानकामानपि॥२॥यत्कीर्तिंकलहंसकुंदधवलांश्रुत्वामहेंद्रादयो
वक्त्राभात्मनिसंततंविदधतेलज्जाभरैर्मंथराः॥श्रुत्यादिवरक्रमेलोमसमन
यद्वैखरीजायतेसोयंश्रीकिलदीक्षाव्यंकटविष्णुर्वर्ततिसर्वोपरि॥३॥ ॥ ॥

॰शिवायनमः॰

१

१

॥ ॥सोयंपद्मपुराणस्थांषोडशाध्यायनिर्मितां॥शिवगीतांशिवप्रीत्यैविवेचयतिसादरं॥४॥
सूतउवाच॥ऋषीन्प्रतिइतिशेषः॥अथेति॥ ॥अथयत्ऋषयउत्तमाधिकारिणोबुभुत्सयापृच्छंतीति
निर्णयानंतरंअतःशेषाननुपेक्षणीयत्वात्॥भवदुःखस्यसांसारिकदुःखस्यभेषजंनिवृत्त्युपायं

॥सूतउवाच॥अथातःसंप्रवक्ष्यामिशुद्धंकैवल्यमुक्तिदं॥अनुग्रहान्महेशस्य
भवदुःखस्यभेषजं॥१॥ ॥

महेशस्यानुग्रहाद्वचकरिकोहंशुचाकृपाबलात्संप्रवक्ष्यामि॥संग्रहःअनेकासूपनिषत्सुविप्रकीर्णं
प्रमेयमेकीकृत्यप्रकर्षेणविशदमलघुत्वेनस्पष्टतारूपेणवक्ष्यामीतिसंबंधः॥ननुसकलदुःखनिवृत्तिःकिंशरीरे
वतिस्मिन्निवृत्तेवा॥नाद्यः॥नह्यसशरीरस्यसतःप्रियाप्रिययोरपहतीरस्तीत्यादिश्रुतिविरोधात्॥नद्वितीयः॥

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

सुखस्यापिह्यन्यायत्वात्तुच्छायव्ययत्वेनापुरुषार्थत्वापत्तेरित्याशंक्य भेषजंविशिनष्टि॥ अदुःखा
दिनाकेवलस्यभावः॥ कैवल्यंनिष्प्रपंचस्वरूपमात्रेणावस्थानंतदेवमुक्तिः अदुःखनिर्दोषपूर्णा
नंदरूपत्वेनतुच्छायत्वरूपदोषानाक्रांता॥ याकैवल्यरूपामुक्तिस्तांददातीतितथाभूतं॥ तथाचेश
रीरादेरपिनिवर्त्तनात्पूर्णानंदस्यचावस्थानान्नकोपिदोषइतिभावः॥ यद्यपिभिषजःकर्मेतितद्धि
तेष्वादिवृद्धिःप्राप्नोति॥ तथाप्यनंतावसथेस्वार्थेयप्रत्ययविधायकेतिसूत्रेचनिपातनाद्गुणस्तथा
चामरकोशे भेषजंभेषधभैषज्यान्यगदोजायुरित्यपीति॥१॥ ॥ नकर्मणानमनुष्ठानैर्न
दानैस्तपसापिवा॥ कैवल्यंलभतेमर्त्यः किंतुज्ञानेनकेवलं॥२॥ ॥

२ २

दुःखस्यभेषजंवक्ष्यामीत्युक्तं॥ किंतदित्याकांक्षायांज्ञानमेवेत्याह॥ नकर्मणामिति॥ मर्त्योमरणधर्मा॥ मनुष्यः
कर्मणांयज्ञादीनामनुष्ठानैःकैवल्यंनलभते॥ तथादानैःतपसापिकृच्छ्रचांद्रायणादिरूपेणलभते॥ तेषांस्व
र्गादिफलकत्वात्॥ निष्कामतयानुष्ठितानामपिचित्तशुद्धिफलकत्वात्॥ विविदिषावाक्यबलेनापिज्ञानवि
विदिषाद्वारस्यैवतत्फलसाध्यवसायादितिभावः॥ किंतुकेवलंइतरनिरपेक्षेणज्ञानेन॥ अपरोक्षब्रह्म
साक्षात्कारेणकैवल्यंलभते॥ तमेवविदित्वातिमृत्युमेतिनान्यःपंथाविद्यतेऽयनायेतिश्रुतेरितिभावः॥२॥

ॐ रामायदंडकारण्येपार्वतीपतिनापुरा॥ याप्रोक्ताशिवगीताख्यागुह्या
द्गुह्यतमापिसा॥३॥ यस्याःस्मरणमात्रेणनृणांमुक्तिर्ध्रुवाहिसा॥ पुरासनत्कु
मारायस्कंदेनाभिहिताहिसा॥४॥ ॥ ॥६७॥

तादृशब्रह्मज्ञानस्य शिवैकसाध्यतया॥ शिवगीतारूपमुपनिषद्वाक्यमेव तदुपायोपन्य
सिष्यन्नथ मंतत्प्रशंसामाह॥ रामायेति॥ पुरा पूर्वं दंडकारण्ये पार्वतीपतिना या शिवगी
ताख्या उपनिषद्रामाय प्रोक्ता सा गुह्याद् अपि गुह्यतमेत्यन्वयः॥ अत्र रामायेत्यनेन श्रोतृ
गौरवं पार्वतीपतिनेति वक्तृगौरवं चोक्तं॥ अत एव गुह्यादपि गुह्यतमा॥ अत्यंतरहस्यमि
त्यर्थः॥३॥ यस्या इति॥ सा प्रसिद्धा मुक्तिः नृणां यस्याः शिवगीतायाः स्मरणमात्रेण तदर्थज्ञा
नमात्रेण भवति॥ ननु तत्रानुक्तं किंचिदुपसंहर्तुं यतनीयमित्यर्थः॥ नेयं ब्रह्मलोकावाप्ति
रूपा गौणी मुक्तिः किंतु परममुक्तिरेवेत्याशयेन विशिनष्टि ध्रुवेति॥ इदानीं संप्रदायशु
द्धिं रूपयितुं गुरुपरंपरामाह॥ पुरेत्यादिना सार्द्धश्लोकेन पुरा पूर्वं स्कंदेन सनत्कुमा
राय सा शिवगीता अभिहिता उक्तेत्यर्थः॥४॥ ॥७॥ ॥ॐ॥ ॥

सनत्कुमारस्तु व्यासाय तामुवाच॥ हे मुनिसत्तमाः॥ श्रेष्ठा इति संबोधनेन तादृशीं

सनत्कुमारः प्रोवाच व्यासाय मुनिसत्तमाः॥ मह्यं कृपातिरेकेण प्रददौ बादरायणः॥५॥

शिवगीतां श्रोतुं अधिकारिणः कृतार्था यूयमिति ध्वनयति॥ तामेव शिवगीतां बादरा
यणो व्यासः॥ कृपातिरेकात् दयातिशयेन मह्यं प्रददौ॥ अत्र कृपातिरेकेणेत्यनेन त्वया
स्वस्मिन्विधायीवीर्यवत्तरतां ध्वनयति॥५॥ ॥ ॥ ॥

उक्तंचेति॥तेनव्यासेननकेवलंशिवगीतायुक्तेत्येवकिंतुअन्यदपि किंचिदुक्तमिति भावः॥ किमुक्तं
तदेवाह कस्मैचिदिति॥इदंशिवगीतारहस्यंकस्मैचिदनधिकारिणेनदातव्यं॥अन्यथाअनधिकारिभ्योपि
दानेक्रियमाणेदेवाइंद्रादयः॥कुप्यंतिशेषो नयुक्ता भवंति॥किंचशापंतिदातारंअध्येतारंचेतिशेषः॥६॥अथे

उक्तंचतेनकस्मैचिन्नदातव्यमिदंत्वया॥सूतपुत्रान्यथादेवाःकुप्यंतिच
शपंतिच॥६॥अथपृष्टोमयाविप्रोभगवान्बादरायणः॥भगवन्देवताःसर्वाःकु
प्यंतिशापंतिच॥७॥

ति॥कस्मैचिदिदंनवक्तव्यमितिव्यासोक्तेरनंतरंमयाबादरायणःपृष्टः कीदृशःसः भगवान्॥उत्पत्तिंचविना
४ शंचभूतानामागतिंगतिं॥वेत्तिविद्यामविद्यांचसवाच्योभगवानितिलक्षणः॥यत्पृष्टंतदाह॥भगव
न्निति॥देवताःकंप्रतिकुप्यंतिशापंतिचेतिनिरपराधेषुकथंसोभद्रइतिप्रश्नाभिप्रायः॥७॥ ॥ ४

निरपराधतामेवविवृणोति।तासामिति॥तासांदेवतानांअत्रमनुष्येभ्यस्तत्वज्ञानेदत्तेसतिकाहानिरस्ति॥नका
पीत्यर्थः॥यथाकार्यहान्याःकुप्यंतितद्वदिति भावः॥अथपूर्वोक्तप्रश्नानंतरंपराशर्योमांप्रत्याह॥हेवत्सल॥कृपा
लोस्त्वस्यतत्वज्ञानेजातेपिलोकोपरार्थंपृच्छसीति भावः॥यत्पृष्टंतच्छृणु॥प्रश्नोत्तरयोःसमानविषयकत्वात्॥

तासामत्रास्तिकाहानिर्ययाकुप्यंतिदेवताः॥पराशर्योपिमामाहयत्पृष्टंशृणुवत्सल॥८॥
नित्याग्निहोत्राणिविप्राःसंतियेगृहमेधिनः॥तएवसर्वफलदाःसुराणांकामधेनवः॥९॥

अन्यथात्राप्रश्नेकेचिदारेभ्यंरस्यादिति भावः॥८॥तदेवाह॥नित्येति॥नित्यंयदग्निहोत्रंतदनुष्ठातारः
येविप्रागृहमेधिनोगृहस्थाःपंचमहायज्ञमात्रानुष्ठातारोपीति भावः॥तएवसुराणांसर्वफलदाः॥
कामधेनवःकामधेनुकल्पाः॥तदेवोपपादयति॥९॥ ॥ छ॥ ॥

भक्ष्यमिति॥सुपर्वणांदेवानांभक्ष्यभोज्यादियद्यदिष्टंतत्सर्वंअग्नौहुतेनप्रक्षिप्तेनहविषापुरोडाशादिना
विलभ्यतेप्राप्यते१०ननुवेकस्मिकेनसाधनांतरेणदेवानामिष्टंसंपत्स्यतीत्याशंक्याह॥नान्यदस्तीति॥अन्य
दग्निर्विभिन्नंनास्त्येव॥ततःकिंतत्राह॥दोग्ध्रीतीदोहनशीलादोग्ध्रीताच्छीलिकस्तृन्प्रत्ययः॥धेनुर्गौः

भक्ष्यंभोज्यंचपेयंचयद्यदिष्टंसुपर्वणां॥अग्नौहुतेनहविषातत्सर्वंलभ्यतेदिवि॥१०॥
५ नान्यदस्तिसुरेशानामिष्टसिद्धिप्रदंदिवि।दोग्ध्रीधेनुर्यथानीतादुःखदागृहमेधिनां॥११ ५
तथैवज्ञानवान्विप्रोदेवानांदुःखदोभवेत्॥त्रिदशास्तेनविघ्नंतिप्रविष्टंविष्टपंनरं॥१२

नीताअपहृतासतीयथागृहमेधिनांदुःखदाभवति११तथैवज्ञानवान्विप्रइत्युपलक्षणं॥क्षत्रियादिर
पिदेवानांदुःखदोभवेत्॥तेनकारणेनत्रिदशादेवाःनरंविष्टपंमनुष्यलोकंप्रविष्टाःसंतोविघ्नंति॥तत्वज्ञा
नप्रवृत्तिविघ्नंकुर्वंतीत्यर्थः॥१२॥

ततःदेवकृतविघ्नशालस्यापिदेहिनःपुराणश्रवणादौप्रवृत्तस्यापिशिवभक्तिर्नजायते।अश्रद्धामलभाव
त्वादितिभावः।तस्माद्देवकृतविघ्नान् अविदुषांपुराणरहितानांतुभक्तिर्नैवजायते॥श्रवणादिमन्नामिष

ततोनजायतेभक्तिःशिवकस्यापिदेहिनः॥तस्मादविदुषांनैवजायतेशूलपाणिनः॥१३

भक्तिरस्तिश्रवणरहितानांतुभक्तिलेशोपिनभवतीत्यर्थः॥शूलपाणेरितिवक्तव्येशूलपाणिनइतिरूपंछां
दसंबोध्यं॥तथाचसूत्रमाख्यातितिसूत्रेमहाभाष्येउक्तं॥छंदोवदृषयःकुर्वंतीति॥अस्तिचछंदसिलिं
गव्यत्ययानुशासनं॥सुप्तिङुपग्रहलिंगनराणांकालहलच्स्वरकर्तृयङांचव्यत्ययमिच्छतिशास्त्रकृत्

देषांसेपिन्चसि अतिबाहुल्यकेनेतिवार्त्तिककारवचनात्॥ एवमग्रेपिबोध्यं यद्वा शूलपाणिना बहुस्यबहु
व्रीहिप्रयुक्तविनाश्यनिघ्नतासत्याश्रामान्येननपुंसकमितिवास्यस्वरूपपराध्याहारेणवासमाधेयमितिदि
क्॥१३॥ यथेति॥ यथाकथंचित् अनियत्याज्ञानापि भक्तिः मध्ये अज्ञानात्परोः पूर्वमेव विछिद्यते विछिन्ना भव
तीयदि

यथाकथंचिज्ज्ञातापि मध्ये विच्छिद्यते नृणां॥ जातांवापि द्विजवज्ञानेनविश्वासं भजे
त्फलं॥१४॥ ऋषयऊचुः॥ यद्येवं देवताविघ्नमाचरंतितनुस्मृतां॥ पौरुषं तत्र कस्यापि येन मुक्तिर्भविष्यति॥१५

वाविच्छिन्नासतीज्ञानमुत्पादयतीतत्राप्याह॥ जातमिति॥ तयाजातमपि जातमपि विश्वासं भजति अत्रा
एपत्रांकया अस्कंदतेइत्यर्थः॥१४॥ यदीति॥ एवं प्रागुक्तरीत्यादेवताः अतिप्रचलाइतिभावः॥ तनुस्मृतां
दुर्बलानामितिभावः॥ यदिविघ्नमाचरंतितर्हितत्र देवकृतविघ्ननिवारणेकस्यपौरुषं सामर्थ्यमस्तियेन
मुक्तिर्भवेत्॥१५

डाक्टर भाऊदाजी ...
Dr. BHAU DAJI
MEMORIA

त्यमिति॥ आसतितत्रायात्पुनःप्रश्न॥ तत्रदेवकृतेविघ्ननिवारणेउपायोस्तिनवेतिसंशयेसत्यमुत्तरं हृदीत
तः इह प्राग्भवीयबहुतरसुकृतसंपत्याशिवे भक्तिः॥ ततईश्वरार्पणबुद्ध्यानिष्कामकर्मानुष्ठानं॥ ततश्चित्तशुद्धिः॥ त
तोनित्यानित्यवस्तुविवेकः॥ ततोविषयेषु सर्वेषु नश्वरत्वदुःखबहुलत्वादिदोषदर्शनाद्वैराग्यं॥ ततः शमादिसंपत्॥ ततोमुमु

॥ सत्यं सत्यं ब्रह्मन् अहं तत्रोपायोस्तियानवा॥ स्तउ०कोटिजन्मार्जितैः पुण्यैः शिवे भक्तिः प्रजायते॥१६

क्षातोजिज्ञासा॥ ततःसंन्यासः॥ ततोगुरूपासनं॥ ततःश्रवणं ततोमननं ततोनिदिध्यासनं॥ ततोप्रतिबद्धब्रह्मसा
क्षात्कारः ततोयावत्प्रारब्धं जीवन्मुक्तिः॥ ततः परममुक्तिरितिसिद्धांतसंमतः सोपानक्रमसरणिः क्रमः॥ एवं स्थितेप्रसाद
न्यायेनात्रप्राथमिकासाधनं परमफलभूतामुक्तिश्चोच्यते उत्तराण्यपिसाधनानि तत्रप्रपंच्यंतेतान्यपीहोप
संहर्तव्यानि॥ कोटीत्यादि। कोटिसंख्याकानियानिजन्मानि तत्रार्जितैः पुण्यैः शिवेभक्तिर्जायते॥ अत्रकोटिसंख्याकानि

जन्मानीति। मध्यमपदलोपी समासः॥ दिक्संख्ये संज्ञायामिति नियमेन समासांतरस्य दुर्लभत्वात्॥ यथा चैत
धाद्विगोर्लुगनपत्य इति सूत्रे भाष्यादौ स्पष्टं॥१६॥ इष्टेति॥ इष्टानि यागाः पूर्तानि तडागारामादीनि च पूर्तानि चेति

॥ इष्टापूर्तानि कर्माणि तेनाचरति मानवः॥ शिवार्पणधिया कामान्परित्यज्य यथाविधि॥१७॥ ॥
अनुग्रहात्तेन शंभोर्जायते सुदृढो नरः॥ ततो भीताः पलायंते विघ्नं हित्वा सुरेश्वराः॥१८॥ ॥

शि०

७ द्वंद्वः॥ अन्येषामपि दृश्यत इति दीर्घः॥ तेन शिवभक्तेन ज्ञातत्वेन कामान्परित्यज्य शिवार्पणबुध्या इष्टापूर्तानि कर्माण्याच ७
रतीत्यन्वयः॥१७॥ अनुग्रहादिति॥ तेन शंभोरनुग्रहान्नरः सुदृढः शापानुग्रहसमर्थो जायत इत्यन्वयः॥ तेन सुरे
श्वरं शापाद्भीताः सन्तो विघ्नं हित्वा पलायंते॥१८॥

जायत इति। तेन विघ्नविरहेण चंद्रमौलिनः शिवे तस्य शुश्रूषाश्रवणेछा जायते ततः स एव ततः श्रवणं कुर्वतः क्रमे
ण ज्ञानं जायते॥ ज्ञानादेव विमुच्यत इति संबंधः॥१९॥ बहुनेति॥ अत्र शिवभक्तिमहात्म्यविषये बहुनोक्ते
न किं प्रयोजनं संक्षेपेणैव वदामीति भावः॥ तथाहि॥ यस्य पुंसः शिवे दृढा भक्तिरस्ति सः महापापानि ब्रह्महत्यादी

जायते तेन शुश्रूषा चरिते चंद्रमौलिनः॥ श्रुत एव ततो जायते ज्ञानं ज्ञानादेव विमुच्यते॥१९॥ बहुनात्र कि
मुक्तेन यस्य भक्तिः शिवे दृढा॥ महापापोथपापौघकोटिग्रस्तोपि मुच्यते॥२०॥ स संसारबंधनात्तस्मा
दन्यः कोवास्ति महद्धीः॥ नियमाद्यस्तु कुर्वीत भक्तिं वा द्रोहमेव च॥ तस्यापि चेत्प्रसन्नोसौ फलं यच्छति वांछितं॥२२

निपंच॥ अघानि दुःखानि व्यसनानि च॥ अंहो दुःखव्यसनेष्वघमित्यमरः॥ पापौघाः॥ उपपातकप्रकीर्णादीनां सं
घाः॥ तेषां त्रयाणां कोटिभिर्ग्रस्तोपि सन्॥२०॥ संसारबंधनान्मुच्यते॥ तस्मात्सर्वोत्कृष्टात्पापकोटिग्रस्तादप्यन्यो
महद्धीः॥ कोवास्ति यः शिवभक्त्यापि मुच्येतेति भावः॥ नियमादिति यः पुरुषो नियमेन भक्तिं द्रोहं वा कुर्वीत त

स्यापिनियतस्मरणमात्रस्यभक्तिद्रोहयोरुभयोरपिसत्वेनतावन्मात्रादसौपरमेश्वरःप्रसन्नश्चेत्प्रसीदति
तदा७वांछितंयच्छतितथाचद्रोहार्थमपियस्यैस्यस्मरणंफलप्रदंतद्विषयिण्याभक्तेर्माहात्म्यंकिंवक्तव्यमित्यर्थः॥२२
प्रदेयवस्तुबाहुल्यंवास्तुनियमतःपरमेश्वरेतत्समर्पणमेवमुख्यमित्यभिप्रायेणाह॥ लड्डुमिति॥ लड्डुंकिंचिन्मा

लड्डुंकिंचित्समादायसुल्लुकंजलमेववा॥ योदत्तेनियमेनासौतस्मैदत्तेजगत्त्रयं॥२३॥

णिक्यादिनिर्मितंसिंहासनादिवाभवतुसुल्लुकंमल्पंजलमेववाभवतु॥ नात्रवस्तुविशेषेआग्रहइतिभावः ८
किंतुसमादायसम्यग्भक्तिपूर्वकंगृहीत्वानियमेनयोदत्तेतस्मैभक्तायासौशिवःजगत्त्रयंदत्तेभक्तिमहात्म्यात्॥२३

तत्रापीति॥ तत्रसुल्लुकस्यजलादेर्दानेपिअसमर्थोयःनियमेननमस्कारंप्रदक्षिणंचकरोतितस्मैशिवस्तुष्टोभवे
दितिसंबंधः॥२४॥ प्रदक्षिणेष्विति॥ यस्तुप्रदक्षिणास्वप्यशक्तःकिंतुगच्छन्समुपविष्टोवासन्स्वांतेहृदयेशिवंचिं

तत्राप्यशक्तोनियमान्नमस्कारंप्रदक्षिणं॥ यःकरोतिमहेशस्यतस्मैतुष्टोभवेच्छिवः॥२४॥ प्रदक्षिणे
ष्वशक्तोपियस्स्वांतेचिंतयेच्छिवं॥ गच्छन्समुपविष्टोवातस्याभीष्टंप्रयच्छति॥२५॥ चंदनंबिल्वकाष्ठस्य
पुष्पाणिवनजान्यपि॥ फलानितादृशान्येवयस्यप्रीतिकराणिवै॥२६॥

तयेत्तस्याभीष्टमर्थंशिवःप्रयच्छति॥२५ वस्तुतःशिवपूजासामग्रीनात्यंतदुःसाध्याकिंतुसर्वसुलभेत्याह सार्द्ध
श्लोकेन॥ चंदनमिति॥ बिल्वकाष्ठस्यचंदनं नतुबहुमूल्यलभ्यंमलयजमेवेतिभावः वनजान्यपिपुष्पाणि न
तुपुरुषकायक्लेशजानि तादृशानिवनजान्येवफलानियस्यप्रीतिकराणिवैइतिनिश्चये॥२६॥ शिवायनमः॥

तस्यत्रिविधस्यसेवायांकर्तव्यायांभुवनत्रयेपिदुःष्करंदुःसंपादंकिंयत्रकुत्रापिस्थितेनएवंविधासामग्रीसुसं
प्राप्तेतिभावः॥तादृगादोस्त्यमतोकर्त्तरिक्तःस्मृतः॥महाभाष्येऽपिविस्पष्टंदृग्दृशोतद्धितोमतो॥२७॥वन्येष्विति॥पर

दुष्करंतस्यसेवायांकिमस्तिभुवनत्रये॥२७॥वन्येषुयादृशीप्रीतिर्वर्ततेपरमेष्ठिनः॥उत्तमेष्व
पिनास्त्येवग्रामजेष्वपितादृशी॥२८॥तंत्यक्त्वातादृशंदेवंयःसेवेतान्यदेवतां॥सहिभागीरथींत्यक्त्वा
कांक्षतेमृगतृष्णिकां॥२९॥

१ मेष्ठिनुरवाप्तनिखिलकामस्य॥वन्येषुपुष्पफलादिषुयादृशीप्रीतिर्यतेतादृशीग्रामजेष्वपिनास्त्येव॥तथाच १
परमप्रीतिपात्रंवन्यं॥तच्चसुतरांसुलभमितिभावः॥२८॥परमार्थतोभेदेपिव्यवहारिकभेदमाश्रित्याह॥तमिति॥
तादृशंभक्तिमात्रेणसुलभंतंदेवंत्यक्त्वाप्यनादृत्यान्यदेवतांयःसेवेत॥सभागीरथीमनादृत्यमृगतृष्णिकांकांक्षते२९

ननुयदिपरमेश्वरस्यपूजादिकंसुकरंमहाफलंच॥तर्हितदनादरेणसंसारेकिमर्थंभ्राम्यंतीत्यतआह॥किं
त्विति॥कोटिसंख्यैर्जन्मभिःसुष्ठुसंचितंदुरितंयस्यास्तितस्यमोहेनाज्ञानेनअंधंविचारासहंचेतोयस्यतथाभूत
स्यअयंपूर्वोक्तोर्थोनप्रकाशते॥तेनसंसारेभ्राम्यतीतिभावः॥३०॥भगवदुपासनायामपरमपिसौकर्यमस्ती

किंतुयस्यास्तिदुरितंकोटिजन्मसुसंचितं॥तस्यप्रकाशतेनायंत्वर्थोमोहांधचेतसः॥३०॥नकाल
नियमोयत्रनदेशस्यस्थलस्यच॥३१॥

त्याह॥नकालेति॥अन्येषुहिवैदिककर्मसुकालदेशस्थलानांनियमोस्ति॥तद्यथा॥अपराह्णेपिंडपितृ
यज्ञेनचरंतीत्यादिकालनियमः॥ब्रह्मयज्ञेनवक्ष्यमाणःप्राच्यांदिशीत्यादिदिग्नियमः॥अयमेवात्रदेशनि
यमत्वेनविवक्षितः॥दिग्देशशब्दयोरेकधातुनिष्पन्नत्वात्स्थलस्यपृथगुपात्तत्वाच्च॥प्राचीनप्रवणेवैश्वदेवे
नयजेतेत्यादिस्थलनियमः॥इहतुनचैते॥किंतुयत्रभगवदुपासनेकालनियमाःनसंति॥देशस्यदिशइत्यर्थः॥

ष्ठलस्यचनियमाःनसंति॥ननुसमेशुचौशर्करावह्निवालुकाविवर्जितेशब्दजलाश्रयादिभिःमनोनुकूलेनतुच
क्षुःपीडनेगुहानिवाताश्रयणेप्रयोजयेदितिश्रुत्यादेशविशेषोविहितइत्याशंक्यएतच्छ्रुतेरपिचित्तैकाग्रतासंपाद
नमात्रेतात्पर्यंएवंहिदृष्टार्थतालभ्यते॥एकाग्रस्यध्यानोपयोगित्वादित्याशयेनाह॥३१॥ ॥ ॥ ॥

यत्रास्यचित्तंरमतेतत्रचध्यानेनकेवलं॥स्वात्मत्वेनशिवस्यासौशिवसायुज्यमाप्नुयात्॥३२॥अति
स्वल्पतरायुःश्रीर्भूतेशांशाधिपोपियः॥सतुराजाहमस्मीतिवादिनंहंतिसान्वयं॥३३॥शिव० १०

१० यत्रास्येति॥अस्योपासकस्यचित्तंयत्ररमतेएकाग्रंभवति॥तत्रशिवस्यस्वात्मत्वेनध्यानेनकेवलंअसौउपा
सकःशिवसायुज्यमाप्नुयात्॥इदंचोत्तरमीमांसायांयत्रैकाग्रतातत्राविशेषादित्यधिकरणेस्पष्टं॥३२॥
ननुभगवदुपासनंकथंसुकरंप्रभूणांदुराराध्यत्वात्यथाबहुकृशोदर्शनादित्याशंक्यकृतप्रभूणांतथैव।सर्वस्य

कृपानिधेरतःनदुराराध्यत्वमित्याशयेनतयोर्वैलक्षण्यं[illegible]दृष्टान्ताभ्यामुपपादयन्प्राकृतप्रभुच्छितंयदाह॥
अतिस्वल्पेति॥अत्यल्पेआयुःश्रियौयस्यतथा[illegible]शानांअंशानांभूतोधिपःअथवाभूतेशा
स्यशिवस्यांशाभूतास्यापेक्षयामहाराजास्तेऽधिपाःयस्य॥एवंरूपोपियःपुमान्सतुतदीयऽप
अहंराजेतिवादिनंसवंशंहंतिउपकारस्तदूरापास्तइतिभावः॥३३॥कर्त्तेति॥शिवस्तसर्वलोका

कर्त्तापिसर्वलोकानामसत्यैश्वर्यमाप्नुयात्॥शिवःशिवोहमस्मीतिवादिनंयंचकंचन३४
नांकर्त्तासन्नपिअसत्यंयदैश्वर्यंतद्वानपिसन्शिवोहमितिवदंतंयंकंचनजीवमात्रंआ
त्मनासहतादात्म्यभाजंकुरुतेनतूपेक्षतइत्यर्थः॥प्रकृतेषुदृष्टारीतिःसर्वेश्वरेणसंचरणीयेतिभावः॥
३४॥

अंतःकरणशुद्ध्युपायांतरंप्रतिजानीते॥धर्मार्थेति॥हेमुनयःपाशुपतानितंपशुपतेरिदमितिव्यु
त्पत्त्यापाशुपतसंज्ञकंतद्व्रतंप्रवक्ष्यामियेनव्रतेनधर्मार्थकाममोक्षाणांपारंनिष्पत्तिंयास्यथगमिष्यथ३५

आत्मनासहतादात्म्यभागिनंकुरुतेभृशं॥धर्मार्थकाममोक्षाणांपारंयास्यथतेन
वै॥मुनयस्तंप्रवक्ष्यामिव्रतंपाशुपताभिधं॥३५॥कृत्वातुविरजांदीक्षांभूतिरुद्रा
क्षधारिणः॥जपंतोवेदसाराख्यंशिवनामसहस्रकं॥संत्यज्यतेनमर्त्यत्वंशैवींतनुमवाप्स्यथ
॥३७॥

कृत्वेति॥विगतंरजःपापंयेषांतेविरजसःनिष्पापाः॥विरजसःकरोतीतिविरजसा॥तत्करोति
ण्यंतात्पचाद्यच्॥णाविष्ठवदितिटिलोपः॥इतिसर्वस्यकारप्रत्ययः॥वस्तुतस्तुअकारांतो
विरजःशब्दोस्ति॥रजोयंरजसासार्द्धंस्त्रीपुष्पगुणधूलिष्वित्यमरकोशात्॥एतेनार्थाःपादरजोप

पादरजोपमाइत्यादिव्याख्या॥तामित्यध्याहृत्य॥तादृशींदीक्षांकृत्वाविभूतिंरुद्राक्षांश्चधारयं
तीयेवंविधाः॥संतोवेदसाराख्यंशिवनामसहस्रकंचजपंतःतेनजपेनमर्त्यत्वंइतरसाधारण

ततःप्रसन्नोभगवान्शंकरोलोकशंकरः॥भवतांदृश्यतामेत्यकैवल्यंवःप्रदास्यति३८

त्वंसंत्यज्यसम्यक्त्यक्त्वाशिवंशिवसाक्षात्कारयोग्यांतनुंशरीरंअवाप्स्यथप्राप्स्यथ३७
ततइति॥ततःशुद्धशरीरलाभानंतरंभगवान्शंकरः॥लोकस्यशंसुखंकरोतीत्येवंरूपः॥
नतुशब्दमात्रेणशंकरइत्यर्थः॥सोसौभगवतांदृश्यतांसाक्षात्कारविषयतांएत्य
प्राप्यवःयुष्मभ्यंकैवल्यंपरमांमुक्तिंप्रकर्षेणदास्यति॥३८॥ ॥शिवायनमः॥ ॥

१२

रामायेति॥ कुंभसंभवोगस्त्यःदंडकारण्येरामाययद्दीक्षादिकंप्राहतत्सर्वंवःयुष्मभ्यंप्रवक्ष्यामिपूर्वंभक्त्यायुक्ताःइतिभक्तियोगिनःसंतःशृणुध्वंशृणुत॥ आत्मनेयदमा

रामायदंडकारण्येयत्प्रादात्कुंभसंभवः॥ तत्सर्वंवःप्रवक्ष्यामिशृणुध्वंभक्तियोगतः॥
॥३९॥ ॥इतिश्रीपद्मपुराणेशिवगीतासूपनिषत्सुप्रथमोध्यायः॥१॥ ॥

र्थ॥३९॥ ॥इतिश्रीमद्विशुद्धाद्वैतसिद्धांतप्रतिष्ठापनैकधुरंधरश्रीकेवलदीयेंकरनाद्रिनायकविरचितायांश्रीशिवगीताव्याख्यायांप्रथमोध्यायः॥ ॥१॥ ॥ ॥

Dr. BHAU DAJI MEMORIAL
डाक्टरभाऊदाजीह्यांच्यास्मरणार्थ

किमर्थमिति॥ अगंविंध्यपर्वतंस्यायतिसंहृतांखर्वंकरोतीतितथाभूतः॥ अतिसमर्थत्वात्स्वार्थेहेतोनरामंप्रतिअसंभाव्यमानागमनइतिभावः॥ एवंभूतोरामचंद्रस्यसन्निधिंकिम

ऋषयऊचुः॥ किमर्थमागतोगस्त्योरामचंद्रस्यसन्निधिं॥ कथंवाविरजांदीक्षांकारयामाससराघवं॥१॥

र्थमागतः॥ कस्मैप्रयोजनायेतिकिमर्थं॥ निमित्तकारणहेत्वर्थेषुसर्वासांप्रायदर्शनमितिद्वितीया॥ किंच॥ राघवंविरजांदीक्षांकथंकारयामास॥ सर्वज्ञस्यतथाप्तसकलकामस्यराघवस्यदीक्षाद्युपदेशोसंभावितइतिभावः॥ ॥शिवार्पणमस्तु॥

न तद्गति॥ततः दीक्षातः रामः किंफलमाप्तवान्तत्त्वंवक्तुमर्हसि।२॥रावणेनेतिजनकात्मजासीता
रावणेनयदासुतरांबलात्कारेणहृतातदाराघवोवियोगदुःखेनविलपन्नासेत्यन्वयः।आसेति

ततःकिमाप्तवान्रामःफलंतद्वक्तुमर्हसि॥सूतउ०रावणेनयदासीतासुहृताजन
कात्मजा॥तदावियोगदुःखेनविलपन्नासराघव॥३॥निर्निद्रोनिरहंकारोनिराहारो
दिवानिशं॥मोक्तुमैच्छत्ततःप्राणान्सानुजोरघुनंदनः॥४॥

न्द्रि०
१३

उ०प्रतिरूपकमव्ययं॥कारयामासेत्यादावनुप्रयोगसामर्थ्येनन्याप्रसक्तौप्रतिरूपस्यप्रसिद्धिरि
तिदिक्॥३॥विलपन्नासेत्युक्तांतामवस्थामाह॥निर्निद्रइति।निद्रारहितःअहंकारोऽभिमानस्तद्र
हितःआहाररहितश्चसन्दिवानिशंदिवानिशंविलपन्नासेतिपूर्वेणसंबंधःततःस्वसानुजोलक्ष्मण

न्द्रि०
१३

सहितोरामःप्राणान्मोक्तुमैच्छत्॥४लोपमुद्रेति॥लोपामुद्रापतिर्मुनिरगस्त्यःरामस्यप्राण
त्यागोद्यमंज्ञात्वातस्यरामस्यसन्निधिंसमीपंआगमत्॥आगतःअथसंसारस्यासारतां
निःसारत्वंरामंप्रयोज्यकर्तारंबोधयामास॥५॥किमिति॥हेराजेंद्रराजश्रेष्ठकिंविषादसि॥

लोपामुद्रापतिर्ज्ञात्वातस्यसन्निधिमागमत्॥अथतंबोधयामाससंसारासारतांमु
निः॥५॥अगस्त्यउ०किंविषादसिराजेंद्रकांताकस्यविचार्यते॥जड०किंनविजानातिदेहो
यंपांचभौतिकः॥६

ननुकांतार्थंविषादामीतिचेत्तत्राह॥कांतेति॥कस्येयंकांतेतिविचार्यतांप्राप्तकालेलोट्॥भा
र्याविरहदुःखंकिंदेहस्य॥आहोस्विदात्मनः॥नाद्यइत्याह॥जडइति।अयंस्थूलोदेहःजडः

स्यर्थः॥ननुयद्यपिचिद्भिन्नत्वरूपंजडत्वंदेहस्यास्तितथापिवैशेषिकाद्यभ्युपगतात्मज्ञाना
श्रयत्वंभविष्यतीतिचार्वाकमतेनापेक्षेप्राप्तेआह॥किमिति॥किमपिनविजानातीयतःपां
चभौतिकःपांचानांभूतानांविकारः॥तथाचदेहः॥नज्ञानाश्रयः॥भूतत्वात्घटवत्॥वि
पक्षेबाधकंतुदेहस्यानुभवितृत्वेबाल्येदृष्टंकामारेस्मरेत्॥बालकुमारदशरीरयोःपरिणा
मभेदेनभेदात्॥नह्यन्येनदृष्टमन्यस्तत्स्मरतीतियुक्तं॥अतिप्रसंगात्॥नचपरिणामभेदेपिद्र
व्यैकमस्त्वितिवाच्यं॥अवयवोपचयंविनापरिमाणभेदायोगात्॥अवयवत्वस्यद्रव्यसम
वायिकारतारूपस्यवैशेषिकादिसंमतस्यद्रव्यांतरोत्पत्तिंविनानिर्वाहात्॥नचतदवयवानुस्मृ
तिमात्रेणतदनुभूतंस्मर्यतइतिवाच्यं॥मातापितृभ्यामनुभूतस्यपुत्रेणस्मरणापत्तेः॥यद्यपिदे
हात्मवादाअनुमानप्रामाण्यंनसहतेतथापितत्साधयितुंप्रसाध्यांगकमिदंबाधंएवंश्रुतिस्मृ
त्यादिप्रामाण्यादपिनदेहात्मवादउचितइतिभावः॥६॥ ॥ शिवायनमः॥शिवार्पणमस्तु॥

नन्वस्तुतर्हिदेहातिरिक्तस्यात्मनएवदुःखादिकमित्याशंक्याह॥निर्लेपइति॥आत्मानसंजा
यतेनैवच्म्रियते॥नापिदुःखभाक्॥इसंबंधः॥तत्रदुःखाभावहेतुनिर्लेपःसच्चिदानंदविग्रह

निर्लेपःपरिपूर्णश्चसच्चिदानंदविग्रहः॥आत्मासंजायतेनैवम्रियतेनचदुःखभाक्॥७
सूर्योसौसर्वलोकस्यचक्षुष्ट्वेनव्यवस्थितः॥तथापिचाक्षुषैर्दोषैर्नकदाचिद्विलिप्यते॥
सर्वभूतांतरात्मापितद्वद्दुःखैर्नलिप्यते॥८॥

इति॥नहिदुःखहेतुसंबंधाभावेकेवलानंदस्यदुःखंयुक्तमितिभावः॥७॥निर्लेपतामेवविवृण्वन्
जननमरणाभावहेतुमाह॥परिपूर्णइति॥नह्यपरिच्छिन्नस्योत्पादविनाशौस्तःपरिच्छेदापत्ते
इतिभावः॥७॥निर्लेपतामेवविवृणोतिसार्धश्लोकेनसूर्योसावितिं॥अत्रयद्यपिशेषः॥त
थाचायमन्वयः॥यद्यपिसूर्यःसर्वलोकचक्षुष्ट्वेनचक्षुःप्राधान्येनव्यवस्थितःयद्वा॥चक्षुरधिष्ठा

तृत्वाच्चक्षुः॥तथाचश्रुतिः॥आदित्यश्चक्षुर्भूत्वाक्षिणीप्राविशदिति॥तथापिचक्षुषे
दोषैःपरकामिन्यादिविषयकसाभिलाषदर्शनापिजन्यैर्यथानलिप्यतेतद्वत्सर्वभूता
न्तरात्मानिकृष्टाहंकारचिह्नगोपिदुःखैर्नलिप्यतेनसंबध्यतइति॥चक्षुष्टुनेत्यत्रचक्षुः
शब्दादाचरक्विबंतात्कर्तर्यर्थेकेदूतीयेक्विपितस्यभावइतिचप्रत्ययः॥लक्षणाबोध्या॥७॥

देहोपिमलपिंडोयंमुक्तजीवोजडात्मकः॥दह्यतेवह्निकाष्ठैःशिवाद्यैर्भक्ष्यतेपिवा॥१०

१५ ननुएवंषष्ठश्लोकेनजडःकिमित्यादिनादेहस्यज्ञानवत्त्वंनास्तीत्युक्तं॥तदनुपपन्नं॥स्थू १५
लोदेहंगौरोहंजानामीत्याद्यनुभवतिरोधादित्याशंक्यलिंगशरीराख्यजीवोपाधिमुक्तो
यमनुभवस्तदपगमेतादृशानुभवाभावादितिसमाधानंसिंहावलोकनन्यायेनाह॥

देहोपीत्यादिनासार्द्धश्लोकेन॥अयंदेहोपिमुक्तोजीवोजीवोपाधिभूतंलिंगशरीरंयेने
त्येवंभूतःसन्मृतःसन्नित्यर्थः॥वह्निनाकर्त्राकाष्ठैःकरणभूतैर्दह्यतेश्वावाप्रभृति
भिर्वाभक्ष्यते॥तथापिदह्यमानत्वंभक्ष्यमाणत्वंवानजानाति॥अतोमलपिंडःजडात्म

॥तथापिनैवजानातिविरहेतस्यकाव्यथा॥११॥

कथ्य।एवंभूतस्यजडस्यविरहप्रयुक्ताव्यथाकालत्रयेऽसंभावितेइत्यर्थः॥तदेवंशारी
रात्मनश्चदुःखंभवतीतिसूचितं॥ननुतर्ह्यहंकारस्यदुःखस्यमास्त्वितिचेत्॥
सत्यं॥मुनेदेहस्यनोदुःखमित्यादिनापूर्वपक्षमनूद्यतार्थमूलएवेदंसमाधास्यतीतिदिक्॥११

तदेवंकंताकस्याविचार्यतामित्यारभ्यविरहार्तस्यकार्यथेयंतेनशोचितादुर्निरूपइत्यर्थः॥उदा
सीनो॥न्योपिदुर्निरूपइतिप्रतिजानीतेसुवर्णगौरीत्यादिभिः॥शृणुछात्रवहितोनृपेत्यंतैःसार्द्धैश्चतुर्भिः
श्लोकैः॥पंचेषुणामदनेनत्राभितोवत्राहितमूर्खः॥सःशोचितायांइतिइत्थंमन्यतेतस्याविधेकंवस्त्या

सुवर्णगौरीदूर्वायादलवच्छ्यामलापिवा॥पीनोत्तुंगस्तनाभोगभुग्नसूक्ष्मविलग्नता॥१२॥

मि॥हेनृपअवहितःसन्शृणुष्व॥शृणुइत्यन्वयः॥इतिमन्यतेइत्यर्थः॥तत्रइतीतिकथमित्या
कांक्षायामाह॥सुवर्णेत्यादि॥सुवर्णमिवगौरी॥अथदूर्वायादलमिवश्यामला॥पीनयोरुत्तुंगयोस्त
नयोराभोगेनविस्तारेणभुग्नंअवनतंसूक्ष्मंकृशंअथविलग्नंमध्यंयस्याःसातथास्तनभारनम्रेत्य
र्थः॥मध्यंचावलग्नंचमध्योस्त्रीत्यमरः॥विलग्नंचेतिपाठांतरमितिक्षीरस्वामी॥ ॥१२॥

बृहन्नितंबजघनंयस्याःसा॥पश्चान्नितंबःस्त्रीकट्याःक्लीबेतुजघनंपुरइत्यमरः॥रक्तेलोहितवर्णेपादावेवसरो
रुहेयस्याःसा॥राकाचंद्रमुखीपूर्णिमायाःचंद्रइवमुखंयस्याःसा॥बिंबस्यबिंबीफलस्यप्रतिबिंबसदृशःओष्ठोयस्याः

बृहन्नितंबजघनारक्तपादसरोरुहा॥राकाचंद्रमुखाबिंबप्रतिबिंबरदच्छदा॥१३॥नीलेंदीवरनी
काशनयनद्वयशोभिता॥मत्तकोकिलसंलापामत्तद्विरदगामिनी॥१४॥त्रिव॥

सा॥१३॥
नीलंयदिंदीवरंतस्यसदृशंनीलेंदीवरनिकाशमित्यस्यपदविग्रहः॥मयूरव्यंसकादित्वात्समासोनित्यः॥
तथाचामरसिंहः॥स्युरुत्तरपदेत्वमी॥निभसंकाशनीकाशप्रतीकाशोपमादयइति॥तादृशेननयनद्व
येनशोभितामत्तकोकिलस्येवसंलापोयस्याःमत्तद्विरदवद्गमनंशीलंयस्याःसा॥१४॥ ॥

एवंविधाएषाकांतापंचेषुद्वारेषुत्वमैरुक्तैःकटाक्षैमामनुगृह्णातिइतिसामन्यते।तस्याविवेकंवक्ष्यामि
तिसंबंधः॥१५॥ग्रोच्यस्यदुर्निरूपतामभिप्रेत्यतदीयंविवेचनंप्रतिज्ञातंतदेवाह॥नचेत्यादिना॥एषःकटाक्षै

कटाक्षैरनुगृह्णातिमांपंचेषुद्वारोत्तमैः॥इतियांमूर्खःसचपंचेषुद्वासिनः॥१५॥तस्याविवेकं
वक्ष्यामिशृणुधावद्दितोनघ॥१५॥नचस्त्रीनपुमानेषनचैवायंनपुंसकः॥अमूर्त्तःपुरुषःपूर्णो
दृष्टादेहीसजीवनः॥१६॥

रनुगृह्णातीतिमूर्खोद्रष्टापुरुषःपरमात्मैव॥सचनस्त्रीनपुमान्नापिनपुंसकः॥अत्रहेतुः॥अमूर्त्तइति॥स्त्री
त्वपुंस्त्वादिकंहिअवयवत्वंस्यान्नधिक्षेपाप्नेनंनचअमूर्त्तेतत्संभवतीतिभावः॥ननुअहंकारएवद्रष्टेत्या
शंक्याह॥सःसाक्षाज्जीविनः॥प्राणधारणवतोऽहंकारादेर्द्रष्टा॥यतःपूर्णःअधिष्ठानतयासर्वत्रानुस्यूतः॥त

१७

थाचसर्वानुस्यूतेनैकेनैवसकलव्यवहारोपपत्तौनानानेकप्रकारव्यक्तिकल्पनायुक्ता॥तत्प्रतिबिंब
याद्रक्तृत्तिमात्रबलेनाहंकारादेर्द्रष्टत्वव्यवहारोपपत्तेः॥सचप्रकारोनित्यत्वादद्वयोकादेरेतेलादाशयः॥१६॥
ननुशरीरस्थंजीवोपाधिंशोचामीत्याशंक्याह॥मलपिंडात्मिकाजडायात्वयातन्वंगीमृदुर्बालेतिशोच्यते॥सा
तुकदापिनपश्यति॥शृणोतिजिघ्रतिवा॥तथाचकटाक्षैरियमनुगृह्णातीत्यकिर्माहताशोकश्चविफलइतिभावः॥१६

यातन्वंगीमृदुर्बालामलपिंडात्मिकाजडा॥सानपश्यतियत्किंचिन्नशृणोतिनजिघ्रति॥१७॥ ॥

ननुशरीरस्थंजीवोपाधिंशोचामीत्याशंक्याह॥मलपिंडयात्वयातन्वंगीमृदुर्बालेतिशोच्यतेसातुकदा
पिनपश्यतिशृणोतिजिघ्रतिवा॥तथाचकटाक्षैरियमनुगृह्णातीत्यकिर्माहताशोकश्चविफलइतिभावः

१७

हेरावतस्यास्तन्वंग्यास्तनुः चर्ममात्रं न तु ज्ञानादिन्नाल्लिन इति बुधात्मिकसतेस्य निलिप्तस्येत्यर्थः॥ तिन्ने
स्तेमायां सनिरूपं हित्वं तु दा तिप्रियाणि विदित्पादाविवच्छंदसि वैकल्पिकत्वान्न भवति। क्वचित्तु बुध्यात्मस्ये
तिपाठः॥ तत्राकारप्रश्लेषः॥ अतिअतिन्नायेन अस्यस्य दृढं नव। अस्थ्यामासौ संघातः॥ संहननं दार्ढ्यं मि

चर्ममात्रं तनुस्तस्याद्बुधात्मस्य च राघव॥ या प्राणादधिका सैव हंत तेस्यात्घृणास्पदं॥१८॥

१८ तिसारदेवः पदव्यत्ययश्चार्षयः। संहनने हेतुः। या प्राणादिति। अपि च यारक्नायां या प्राणादप्यधिका सैव
हर्षकरीत्यविवेकिनस्तव घृणास्पदं जुगुप्साविषयः स्यात्॥ तथा चोदासीने तृणादावपि त्रोकोनु
चितः किंतु तज्जुगुप्सितेति भावः॥ जुगुप्साकरुणे घृणेइत्यमरः॥१८॥ ॥ त्रिवायनमः॥ ॥

१८

डाक्टर भाऊदाजी
DR. BHAU DAJI

जायंतेतइति। देहिनो यदि जायंते तर्हि भूतेभ्यः असंगस्यात्मनः परिणामायोगात्॥ यदि सत्यं दि
ग्धे संदेहवचनं यदि वेदाः प्रमाणमिति वत्॥ अत एव पांचभौतिकाः। ततो भूतकार्यत्वाद्धय

जायंते यदि भूतेभ्यो देहिनः पांचभौतिकाः॥ आत्मा यदेकलस्तेषु परिपूर्णः सनातनः॥१७
काकांतातत्र के कांत सर्व एव सहोदराः॥ निर्मितायं गृहावल्यां तरैवछित्रेतांगतं॥ ॥

दियन्न चैतेषां चेतनत्वेत्यर्थः॥ तेषु परिपूर्णो धिष्ठानतयानुस्यूतः आत्मा तु यद्यस्मात्कारणादे
कलः सनातनश्च॥१७॥ केति। तत्रधामेतौ कांता का कांतश्च कः॥ आत्मन एक्यादिति भा
वः। देहादीनामपि न कांतात्वादियुक्तमित्याह। सर्व एवेति॥ सर्व एव देहेंद्रियादयः सहोदराः॥
एकरूपाः नत्वान्तरत्वाभ्यां पारमार्थिकधर्मद्वयोग्या इत्यर्थः। न चाध्यस्तौ देहादिभिन्नो धिष्ठानस्य

कांचित्क्षतिरित्याह॥ निर्मितायामिति॥ गृहावल्यां निर्मितायां सत्यां तदवच्छिन्नतां गृहावच्छिन्नतां गतं नभस्तस्यां दग्धायां सत्यां कांचिदपि क्षतिं न ऋच्छति न प्राप्नोतीति यथा॥२०॥ तद्वद्देहेषु परिपूर्णः सनातन आत्मापि देहेषु सत्सु स्वयं न विहन्यत एव तादृक्छेदं हन्यमानयोरुक्त्या

नभस्तस्यां तु दग्धायां न काचित्क्षतिमृच्छति॥२०॥ तद्वदात्मापि देहेषु परिपूर्णः सनातनः॥
हन्यमानेषु तेष्वेव स्वयं नैव विहन्यते॥२१॥ हंता चेन्मन्यते हंतुं हतश्चेन्मन्यते हतं॥ तावुभौ न
विजानीतो नायं हंति न हन्यते॥२२॥

देहो नश्यति॥ आत्मा तु निर्विकारत्वान्न नश्यत इति स्थितं॥२१॥ हंतेति॥ हननकर्ता हंता॥ यद्यात्मानं हंतुं मन्यते यद्यात्मा हतः पुरुषो यद्यात्मानं हतं मन्यते तौ द्वावुभावपि न विजानीतः भ्रांतावित्यर्थः॥ यतः अयमात्मा न हंति न हन्यते च॥ असंगतत्वान्नित्यत्वाच्चेति भावः॥२२॥ द्वितीयखनम्॥

अस्मादिति॥ हे नृप अस्मात्प्रागुक्तहेतोः॥ अतिदुःखेन यः खेदः दैन्यं॥ खिद दैन्ये परिघाते चेति॥ धातोर्भवे घञ्॥ तस्य कारणं किमस्ति न किमपीत्यर्थः॥ इदं प्रागुक्तं सच्चिदानंदरूपं विदित्वा दु

अस्मान्नृपातिदुःखेन किं खेदस्यास्ति कारणं॥ नस्य रूपं विदित्वेदं दुःखं त्यक्त्वा सुखी भव
श्रीराम उ० मुने देहस्य नो दुःखं नैव चेत्परमात्मनः॥ सीतावियोगदुःखाग्निर्मां भस्मीकुरुते कथं॥२३
२४

खं त्यक्त्वा सुखी भवेति फलितार्थोपसंहारः॥२३॥ उक्तरीत्या स्थूलशरीरस्य परमात्मनश्च दुःख निराकरणमप्रत्यक्षविरोधं शास्त्रोपदेशेन कल्प्यं चाभिप्रेत्य पृच्छति द्वाभ्यां श्लोकैः मुने देहस्येति॥ हे मुने मननशील अस्मदीयसंशयछेदसमर्थस्त्वमिति भावः देहस्य दुःखं नो इत्यर्थः अनुपगमः परमात्मनोपि नैव चेत्तर्हि सीतावियोगाज्जातं यद्दुःखं स एवाग्निर्मां कथं भस्मीकुरुते॥२४॥

सदेति॥ योर्थो दुःखात्मकः सदानुभूयते स नास्तीति त्वयोक्तः॥ तत्र त्वदुक्तो मे विश्वासः कथं जाय
॥प्रत्यक्षविरुद्धेर्थे वाक्यस्याप्रसरादिति भावः॥२५॥ अन्य इति॥ शरीरात्मनोरभोक्तृत्वं तावत्त्वयोक्तं॥
ताभ्यामन्यः कश्चिद्भोक्तास्ति नास्ति वेति विकल्प्यः॥ द्वितीयं दूषयति। को भोक्तेति। यद्यन्योपि

सदानुभूयते योऽर्थः स नास्तीति त्वयोदितः॥ जायतां तत्र विश्वासः कथं मे मुनिपुंगव॥२५॥
अन्योस्ति नास्ति को भोक्ता येन जंतुः प्रतप्यते॥ सुखस्य वापि दुःखस्य तद्ब्रूहि मुनिसत्तम॥२६॥

नास्ति तर्हि सुखस्य दुःखस्यापि वा को भोक्ता तद्ब्रूहि। ननु नास्त्येव भोक्तेत्यत आह॥ येनेति॥
जंतुः शरीरी तप्यते तथा च भोक्तृपरतापप्रत्यक्षविरोधः मोक्षशास्त्रानर्थक्यं च स्या
दित्यर्थः॥ अनात्मनो मोक्षानन्वयाद्द्वितीयोपि नेति भावः॥२६॥ ॥श्रीशिवायनमः॥ २०

२०

चिन्मात्रविषया चिन्मात्राधारा च त्रिगुणात्मिका अनादिरविद्यासैव माया तस्यां तत्कार्ये अहंकारे
प्रतिबिंबितं चैतन्यं जीवः स चाहंकारोपाधिकप्रमातृफलकर्तृत्वभोक्तृत्ववान्। अतो नानुभवविरोधः।

अगस्त्य उवाच॥ दुर्ज्ञेया शांभवी माया तया संमोह्यते जगत्॥ ॥श्रीशिवायनमः॥ ॥

शास्त्रेयेप्यल्पेयं वा॥ यत्तु आत्मा भोक्ता नेति प्रागुक्तं तद्ब्रह्मभूतः परमात्मा न भोक्तेत्याशयेन जीवोपि प्र
तिबिंबात्मकः स्वसमानसत्ताकभोक्तृत्वाश्रयो नेत्याशयेन च॥ एवं च यद्यपि त्वयि विषमसत्ताकं भोक्तृ
त्वमप्यस्ति तथापि तस्य मुक्तिरनुकल्प्यत्वान्न शोकः कार्य इत्यभिप्रेत्य सकलवेदांतरहस्यमुपदिश
न्नगस्त्यः पत्नीं शांभिः श्लोकैः दुर्ज्ञेयेति॥ सुखरूपो भवतीति तिष्ठतीति शंभुः शुद्धः पूर्णानंदः तस्येयं शांभवी ता

मात्रविषयातदाधाराचेत्यर्थः॥ न धातुः स्थितिवाचा नसत्तायामितिस्मरणात्॥ नचोत्पत्तिरेवसत्तेतिभ्र
मितव्यंतत्रजातस्तत्रभवः इतिपृथक्सूत्रप्रणयनात्। ततःकर्तरिक्तदितिस्मरणात्कर्त्र्यर्थे मितद्गादिभ्यश्चे
तिदुपत्ययः। तादृशीमायादुर्ज्ञेया। सादास्मिमाअघटनघटनापटीयसीत्यर्थः॥ अतएवतयाजगत्॥ जीव

मायांतुप्रकृतिंविद्धिमायिनंतुमहेश्वरं॥२७॥

जातंसंमोहयतेआवरणविक्षिपते। अधिष्ठानावरणपूर्वकमनिर्वचनीयवियदादिप्रदर्शकेतिभावः। पा
रमार्थिकत्वअघटितंनघटयन्। आवरणंचापघटितं। तथाहि। अस्तिप्रकाशतइतिव्यवहारयोग्ययोग्येनास्ती
तिव्यवहारयोग्यतारूपंभावात्मकमावरणं। अस्तिव्यवहारयोग्यताविरहरूपंवा। उभयथापिविरुद्धयोग्यतयो
र्योग्यत्वतद्विरहयोरेकत्रायोगाद्विषमसत्ताकत्वाकल्प्यो नास्तीतियोग्यतायाः परमार्थिकत्वेनाधिष्ठानभि
न्नत्वेपुनरद्वैतप्रविष्टयोर्भावाभावयोर्मिथ्यात्वमेववाच्यं। तद्धितिनियामिकाचमायाताद्रूपेववाचितावि

।

य॥ कार्यपरिणामितापिपारमार्थिकस्यदुर्घटेति मिथ्याभूतमेववियदादेःपरिणामिस्वीकर्तव्यं। तथाहि
सतउत्पत्तौआत्माप्युत्पद्येत॥ असतउत्पत्तौनरशृंगाद्यपिउत्पद्येत॥ प्रागभावप्रतियोगिनउत्पत्तिरितिचे
न्न॥ असतःप्रतियोगितानुपपत्तेः॥ प्रतियोगिताहिघटादिस्वरूपात्मिकेतिपरमतं। अस्मन्मतेअखंडोपाधिरूपावि
नैवप्रतियोगितातत्रापिननिरस्ता। तद्बलेनैवनरशृंगादेरपिउत्पत्त्यापत्तेः॥ सानरशृंगेनास्तीतिचेत्किमनुत्प
विघटनेनास्ति। उत्पत्तिमितिचेत् निःस्वरूपस्यअधिकरणतानुपपत्तेः॥ तस्मात्सादास्मिम्भुक्तिरजतादिवन्मिथ्यै
वसर्वकार्यं॥ एवंस्थितेएकबाध्यमनुपादानंपरिणाम्यपिमिथ्यैवेतिनात्मातथा। किंतुविवर्ताधिष्ठानमात्रम
त्र॥ ननुअज्ञानमेवाधारकंविक्षेपकंचनुक्तयवच्छिन्नचैतन्यविषयकस्याज्ञानस्यैवतदावरणजनकतायाः
रजतोपादानतायाश्चदर्शनादितिचेन्न॥ तस्यैवमायाशब्देनाप्यभिधानात्॥ मायाचाविद्याचस्वयमेव
भवतीतिश्रुतेः॥ यथाचैतन्नाथमायामयंरजतमितिपंचपादिकाग्रंथव्याख्यानावसरेविवरणे। कारैःप्रपंचि
तं॥ नन्वेवमपिमयाध्यक्षेणप्रकृतिःसूयते॥ सचराचरमितिश्रवणात्प्रकृतेरेवोपादानमस्तुतइत्याशंक्यस
पिसैवेत्याह॥ मायांत्विति॥ सकलकार्यपरिणामित्वान्मायैवप्रकृतिरित्यर्थः॥ ननुमायाविद्ययोरभेदाज्जीव

यदीश्वरोप्यज्ञःस्यादित्याशंक्याह॥मायिनमिति॥महेश्वरंतुमायिनंविद्यान्नित्यज्ञानिनमित्यर्थः॥अ
यंभावः॥धर्मैक्येपि॥आवरणविक्षेपशक्त्योर्भेदानतिपुरस्कारेणव्यवस्थैवाविद्याशब्दोमायाशब्दश्चप्रयुज्य
तेविक्षेपमात्रदर्शिनऐन्द्रजालिकस्यलोकेमायाविलेनव्यवहारात्॥तेनमायामोहितानांतुअज्ञानित्वेन
व्यवहारात्॥तथाचबिंबप्रतिबिंबयोःपरमार्थतऐक्येप्यौपाधिकभेदमाश्रित्ययथाश्यामत्वावदातत्वा
दिकंव्यवस्थितमेवोपलभ्यतेतथाबिंबभूतस्येश्वरस्यानावृतस्वरूपत्वान्नसंसारोनवाअज्ञत्वंप्रतिबिं
बभूतस्यजीवस्यआवरणंसंसारोअज्ञत्वंचेतिव्यवस्था॥अतएवनतंविदाथेत्यादिश्रुतौयुष्माकमित्यु
क्तिःसंगच्छतइतिदिक्॥२७॥

२२ तस्यावयवभूतेनव्याप्तंसर्वमिदंजगत्॥सत्यज्ञानात्मकोनंतोविभुरात्मामहेश्वरः॥२८॥ २२

ननुजीवब्रह्मणोरौपाधिकभेदेघटावच्छिन्नतदवच्छिन्नाकाशवत्प्रदेशभेदेनैवस्थितिर्वाच्या॥तथाच
विपदानस्यब्रह्मणःप्रपंचेनुस्यूततयातत्रजीवस्यस्थितिर्नस्यादित्याशंक्याहतस्येति॥तस्यपरमात्म

ननुजीवब्रह्मणोरौपाधिकभेदेघटावच्छिन्नतदवच्छिन्नाकाशवत्प्रदेशभेदेनैवस्थितिर्वाच्या॥तथाचविप्र
दानस्यब्रह्मणःप्रपंचेनुस्यूततयातत्रजीवस्यस्थितिर्नस्यादित्याशंक्याहतस्येति॥तस्यपरमात्मनोवयव

तस्यह्यवयवभूतेनव्याप्तंसर्वमिदंजगत्॥सत्यज्ञानात्मकोनंतोविभुरात्मामहेश्वरः२८

भूतेनावयवप्रायेणजीवेनेदंजगद्व्याप्तंसत्यज्ञानात्मकोअनंतईश्वरात्मापिविभुःसकलव्यापकएवे
त्यर्थः॥अवच्छेदवादेहिप्रागुक्तदोषःस्यान्नतुप्रतिबिंबवादेपि॥लोकेस्वरूपव्याप्त्येवबिंबत्वप्रतिबिंबत्वयो
र्दर्शनात्॥जलांतस्थमहाकाशेसत्येवप्रतिबिंबकाशाभ्युपगमाच्चेतिभावः॥अतएवयथाह्ययंज्योति
रात्माविवस्वानित्यादिश्रुतयः॥प्रतिबिंबरद्भूतमाहुःसूत्रंच॥अतएवोपमासूर्यकादिवदिति॥२८॥

ननुजीवस्यव्यापकत्वेघटावछेदेनापिसुखादिभोगःस्यादित्याशंक्याह॥तस्येति॥जीवलोकेजीव्यतेलोक्यतेऽ
स्मिन्नितिव्युत्पत्तेःस्मष्टजीवोपाधावितियावत्प्राणिनांहृदयेएवतस्यांशःभोक्तृत्वादिनास्थितः॥यथा

तस्यैवांशोजीवलोकेहृदयेप्राणिनांस्थितः॥विस्फुलिंगायथावह्नेर्जायंतेकाष्ठयोगतः॥२९॥

भायनयेनशरीरावछिन्नस्यैवभोक्तृत्वेतहृदितिभावः॥न्वेवंनेहंकारस्यकार्यत्वात्तदवछिन्नःप्रमाता
पिसादिःस्यात्तथाचकृतहानाकृताभ्यागमौस्यातामित्याशंक्याह॥विस्फुलिंगाइति॥यथावह्नेःकाष्ठ
योगतोविस्फुलिंगाअग्निकणाःसूक्ष्मरूपेणप्राक्संतएवजायंतेतथाहृदनादिभिःप्रवाहानादिभिः
कर्मभिःसंबद्धाअनादिर्यावासनासंस्कारस्तेनयुक्तामहेन्द्रोतुरंशाअंशोपधेर्योऽहंकारात्जायंतेतएवचक्षे

त्रज्ञोपाधित्वात्क्षणयाक्षेत्रज्ञाइतिस्मृताः॥अंतःकरणस्यस्थूलसूक्ष्मान्यतररूपेणाभोक्षमनु
वृत्तेर्नोक्तदोषइतिभावः॥तथाचसूत्रोणि॥पुंस्त्वादिवत्वस्यसतोपिभक्तियोगात्॥सएवतुकर्मानुस्मृतिशब्दवि

अनादिकर्मसंबंधात्तद्वंशामहेतितु॥अनादिवासनायुक्ताःक्षेत्रज्ञाइतितेस्मृताः॥३०॥
मनोबुद्धिरहंकारश्चित्तंचेतिचतुष्टयं॥अंतःकरणमित्याहुस्तत्रप्रतिबिंबिताः॥३१॥

बिम्बःतदापीतेःसंसारमपदेशादित्यादीन्प्रमुमेयार्थस्फुरीकुर्वतीतिदिक्॥३०॥ननुहृदयेप्राणिनांस्थितइत्या
दिग्रंथेनअंतःकरणंभोगोपाधितयोक्तं॥तदनुपपन्नं॥ग्रंथांतरेषुपाध्यंतराणामेवश्रवणात्॥तथाहि॥मनएवम
नुष्याणांकारणंबंधमोक्षयोः॥ईक्षतेविमृशामिदंमनसाविकल्पमित्यादौमनउपाधितयोक्तं॥तथाबुद्धिगुणेन
मनोगुणेनचैवमित्यादौबुद्धिःप्रोक्ता॥तथाशोकहर्षभयक्रोधलोभमोहस्पृहादयः॥अहंकारस्यदृश्यंतेजन्ममृत्युश्च

DR. BHAU DAJI

नात्मनइत्यादावहंकारः अतः सर्वश्चित्तविलासोयंइत्यादौचित्तंस्मृतं ।। तथाचकिंविनिगमकमित्याशंक्याह ।। मनइति
संकल्पविकल्पात्मकंमनः। निश्चयात्मिकाबुद्धिः अभिमानात्मकोहंकारः चिचारात्मकं चित्तं। इतिवृत्तिविशेषवशा
दतः करणमेवचतुर्विधसच्चतुर्धाव्यवह्रियते अतोनकश्चिद्विरोधइतिभावः ।। नन्वहंकारएवभोक्तानत्वात्मेतिप्रती
यते। अहंभुंजेइत्यादिप्रत्यक्षेभोक्तृत्वानवगाहनात् शोकहर्षेत्याद्युपक्रम्य अहंकारस्यैव दर्शयतोत्रमन्मथस्य नात्म

जीवत्वंप्राप्नुयुःकर्मफलभोक्तारएवते ।। ततोवैषयिकंतेषांसुखंवादुःखमेववा ।।३२।। ।।

नइतिवचनाच्च ।। तत्कथमहंकारस्यभोगोपाधित्वमुक्तमित्याशंक्याह ।। तत्राहंकारेप्रतिबिंबितास्तेकल्पितभेदनानंता
आत्मनः ।।३१।। जीवत्वंप्राप्नुयुः तेप्रतिबिंबाः कर्मफलभोक्तारएव अनुसंख्यमेता एवउपनिषद्दर्शनेजीवानांसर्व
थाकर्तृत्वमभ्युपगम्यते। तथासतिमोक्षशास्त्रारंभवैयर्थ्यापत्तेरितिभावः। तथाचपारमर्षसूत्रं कर्ताशास्त्रार्थवत्वादिति
।। नन्वेवंसतिआत्मनोअसंगत्वश्रुतिःविरुध्येतेत्याशंक्याह ।। ततइति ।। तेषांप्रतिबिंबचैतन्यानांवैषयिकंविषयसं

स्त

बंधप्रयुक्तंसुखंदुःखंवाततोस्मादहंकाराख्यादुपाधेः नतुस्वतइत्यर्थः। अयंभावः।। अहंकारस्यभोगोपाधिकंसुखसमानस
ताकक। तत्र अतोमिथ्यात्वघटकीभूतकर्तृत्वास्यात्मनिसत्यात्पूर्वोक्तमकर्तृत्वंविरुध्यते। आरोपितेनारुणिम्नास्व
नाविकस्यस्फटिकस्यस्वच्छत्वस्यानपायात् ।। इदंचयथायस्माभयथापिसूत्रेस्फुटं ।।३२।। ननुयद्यहंकारएवोपाधिर्दुःख

तएवभुंजतेभोगायतनेस्मिन्शरीरके ।। स्थावरंजंगमंवापिद्विविधंपुरुष्यते ।।३३।। ।।

प्रयोजकस्तर्हिदेवदत्तीयाहंकारोपाधीनायज्ञदत्तादिजीवानामपिदुःखमनुभवेयुः। नत्वयज्ञदत्ताजीवास्तावदहंकारोपाधी
नोपच्छेदेनैवपर्यवर्तंते।। ननुदेवदत्तीयाहंकारावच्छेदेनैतिव्याप्यं। तस्मादयथवन्हेतोनव्यासःसर्वमिदंजगदितिश्लोकेप्रतिबिंबा
नां आपकृत्स्नपूर्वमुक्तत्वादित्याशंक्याह ।। तएवेतियस्मिन्यस्मिन्नहंकारेयायःप्रतिबिंबस्तत्तदहंकारोपाधिकंभोग
यतः तत्प्रतिबिंबस्यैवनत्वमस्यइतरव्यावृत्तस्यस्यप्रतिबिंबमात्रनिरूपितस्याविद्यकसंबंधविशेषस्याहंकारेषुक
ल्पेनस्वीकारात् ।। तदयमत्रार्थः। तएवायेषुयेष्वहंकारेषुयेप्रतिबिंबितास्तएवभुंजते। नाहंकारेणभोगवंतोभवंति

नन्वेवमपिसुहृद्दर्शनादिकालेविषयदेशव्यापिन्याः अंतःकरणवृत्तेरभ्युपगमात्सुहृच्छरीरस्यापितद्द्रष्टृअहंकारावच्छिन्नतयासुहृच्छरीरावच्छेदेनतद्द्रष्टुःसुखाद्यापद्येतेत्याशंक्याह॥भोगायतनइत्यादि।भोगायतनेभोगावच्छेदकेअस्मिन्स्वाहंकाराभेदेनाध्यस्तेशरीरकेअनुकंपाविषयीभूतेशरीरेनउदासीनशरीरेपीत्यर्थः॥अनुकंपायामितिकन्॥अयंभावः॥सुहृच्छरीरादरापरोक्षानुरोधादनात्मतासाक्षितादात्म्यंयद्यप्यस्तितथापिदूरस्थवस्त्वंतरिवैक्याध्यासोहंकारेणसमस्वशरीरस्यैवअहंगौरइत्यादिप्रतीतेः॥तथाचाहंकाराभेदेननुसुहृदादिशरीरेणसमंसंस्ति॥अयंघटइतिवदयंसुहृदितितटस्थतयैवप्रतीतेः॥तथाचाहंकाराभेदेनाध्यस्तमेवशरीरंभोगसाधनं।तदाहुर्भाष्यकाराः॥नचानध्यस्तात्मभावेनदेहेनकश्चिद्व्याप्रियतइतिविभ्वात्मवादानांनैयायिकादीनामपितथैवगतिः।गौरोहमित्यादिभ्रमस्तेषांमतेन्यथाख्यातिरूपः अस्मन्मतेत्वनिर्वचनीयख्यातिरूपइत्यन्यदेतत्॥नचतददृष्टस्यनियामकंपुत्रादिशरीरस्यापितच्छायात्वात्॥प्रकृतान्मतेभ्रमसंबंधस्यापिसमवायैक्येनातिप्रसक्तत्वात्सर्वात्मातिप्रसंगोदुर्वारइतिदिक्॥स्थानानिच॥अदृष्टानियमात्॥अभिसंध्यादिष्वपिचैवं।प्रदेशादितिचेन्नांतर्भावादित्यादीन्युक्तमर्थंदृढयंतीतिग्रंथविस्तरभयादुपरम्यते।अहंकाराभेदेनाध्यस्तेस्थूलशरीरेभोगइत्युक्तंतत्रसंभाव्यस्थूलशरीराणामवांतरविभागमाह॥स्थावरंचेति॥स्थातुंशीलमस्येति॥स्थावरं तेचारास्समंतच्चकुटिल

चिद्दितनिषिद्धनानामार्गैर्गच्छतीतिजंगम्यतेइतिजंगमंगत्यर्थत्वात्कौटिल्येयङ्॥नंदादच्॥इतीववपुःस्थूलशरीरंद्विविधंद्विःप्रकारमुच्यते॥३३॥स्थावराइति॥तत्रतयोःस्थावरजंगमयोर्मध्येयेस्थावरादेहाःतेस्माःक्षुद्राःअतिमंदांतःसंज्ञास्युःकेनेत्यगुल्मलतादयः।जंगमानाह।अंडजाइति।अंडेषुजाताअंडजाःपक्षि

स्थावरास्तत्रदेहास्युस्स्माःगुल्मलतादयः॥अंडजास्वेदजास्तद्वदुद्भिज्जाइतिजंगमाः॥३४॥

सर्पादयः।स्वेदाज्जातामशकादयः।उद्भिंदंतिभूमिंइत्युद्भिदः॥तादृशाःसंतोजायंतेतउद्भिज्जाः॥गुल्मलतापिपीलिकादयः॥उक्तेष्वेषांचैतत्॥जरायुजामनुष्यमृगादयोपिबोध्याः॥३४॥ ॥शिवायनमः॥

एवमनुशासनं च यान्देहानुत्क्रान्तस्तत्प्राप्य स्थितान्नियामकमाह॥ योनिमिति॥ अन्ये वक्ष्यमाणेभ्यः स्थाणुशरीरेभ्यो भिन्नाः पुण्यविशेषशालिनो देहिनो देहिसंबंधयोग्याः प्रमातारः योनिं स्त्रीलिंगं शरीरत्वाय शरीरसंबंधा-

योनिमन्ये प्रपद्यंते शरीरत्वाय देहिनः॥ स्थाणुमन्येऽनुसंयंति यथाकर्म यथाश्रुतं॥ २५॥ ॥

र्थं प्रपद्यंते प्राप्नुवंति॥ अन्ये च तु स्थाणुं स्थाणुप्रभृतिशरीरमनुसंयंति अत्र विनिगमकमाह यथाकर्म पापपुण्यानुसारेण॥ यथाश्रुतं॥ वेदशास्त्राध्ययनजन्मसंस्कारानुसारेण चेति॥ २५॥ ॥ ॥ शिवाय नमः॥

नन्वमीषां देहानां भोगायतनत्वेन नियमनं च तत्तु तादृशशरीरं परिगृहीतवतो बिंबीभूतस्य परस्यापि भोगः स्यात्॥ कारणसत्त्वे कार्यस्यावश्यकत्वादित्याशंक्याह॥ सुखमहमिति॥ जीव एव सुखमहं दुःखमहं चे-

सुखमहं दुःखमहं चेति जीव एवाभिमन्यते॥ निर्लेपोऽपि परं ज्योतिर्मोहितः शंभुमायया॥ २६

त्यभिमन्यते न तु बिंबीभूतोऽपि॥ अयं भावः॥ शरीरमात्रसत्त्वेऽपि परमात्मनो न भोगः। कारणांतरविरहात्॥ सामग्र्यधीनं हि कार्यं कतिपयकारणमात्रेण पादयितुं न शक्यते॥ कारणं चेह धर्माधर्माव-पितौ च भगवति न विद्येते॥ जीवे तु सुखदुःखादिसामग्री वर्तत इत्यादायेन विरोधो नहि॥ निर्लेपोपीति॥ यद्यपि निर्लेपः समानसत्ताकसंगरहितः॥ तथा परं ज्योतिः चिद्रूपः तथापि शंभुमायया मोहित तथाप्यज्ञानस्वरूपत्वात्॥ दुःखं युक्तमिति भावः॥ ॥२६॥ ॥ श्रीशिवार्पणमस्तु॥

आवृतस्वरूपेअहंकाराध्यासंभवादहंकारधर्मसंबंधोप्युचितएवेत्याशयेनाह॥ कामेति॥ कामक्रोधलोभमदमात्सर्यमोहाख्यंअरीणांषड्वर्गंषट्कंअहंकारगतंअहंकारनिष्ठंविदुःतद्वृत्तिविशेषात्मकत्वात्॥ तथाचश्रुतिः॥ कामःसंकल्पोविचिकित्साश्रद्धाश्रद्धाधृतिरधृतिर्ह्रीर्धीर्भीरित्येतत्सर्वंम

कामःक्रोधस्तथालोभमदोमात्सर्यमेवच॥ मोहश्चेत्यरिषड्वर्गमहंकारगतंविदुः॥ ३७॥
सएवबध्यतेजीवःस्वप्नजाग्रदवस्थयोः॥ सुषुप्तौतदभावाच्चजीवःशंकरतांगतः॥ ३८

नएवेति ३७ साहंकारस्यदुःखोपाधितामन्वयव्यतिरेकाभ्यांद्रढयति॥ सएवेति॥ स्वप्नजाग्रदवस्थयोःजीवःसएवअहंकारोपहितःसन्नेवबध्यतेदुःखादिभिर्नतसुषुप्तौतुतदभावात्तस्यतदुपाधिभूतस्याहंकारस्याभावात्सूक्ष्मरूपेणावस्थानाज्जीवःशंकरतांबिंबसाम्यंदुःखादिराहित्यंगतः॥ तथाचश्रुतिः॥ स्वमपीतोभवतीति॥ सुषुप्तिकालेसकलेविलीनेतमोभिभूतःसुखरूपमेतीतिच ३८

ननुतथापिजीवस्याहंकाराद्युपादानतयाब्रह्मणश्चवियदाद्युपादानतयासविकारतापत्तिरित्याशंक्यपरिणामित्वेप्येवंस्यात्॥ इहतुविवर्ताधिष्ठानतामात्रमित्याहसएवेति॥ सजीवःमाययापरिणामिन्यासृष्टःसन्सुखदुःखयोःकारणंअधिष्ठानमित्यर्थः॥ शिवब्रह्मणिचवियदादियद्दृश्यतेतदपिमाययापरिणामिन्याउभयत्रापिदृष्टांतमाह॥ शुक्तौरजतवदिति॥ त

सएवमाययास्पृष्टःकारणंसुखदुःखयोः॥ शुक्तौरजतवद्विश्वंमाययादृश्यतेशिवे॥ ३९॥
ततोविवेकज्ञानेननकोप्यत्रास्तिदुःखभाक्॥ ततोविरमदुःखात्त्वंकिंमुधापरितप्यसे॥ ४०॥

द्बाध्यत्वाबाध्यत्वाभ्यांविवर्तपरिणामयोर्भेदः॥ ३९॥ ततइति॥ ततआत्मनोसंगत्वादहंकारादेश्चाध्यस्तत्वाद्विवेकपूर्वकेणज्ञानेनअधिष्ठानसाक्षात्कारेणअस्याश्चाविद्यानिवृत्तौस्वांदुःखंनजतइतिदुःखभाक्कोपिनास्ति॥ उपसंहरति॥ ततइति॥ ततःउक्तहेतोस्त्वंदुःखाद्विरममुधाकिमितिपरितप्यसेकिमर्थंशोचसि॥ ४०॥

भवदुक्तरीत्याअस्यसर्वस्यमिथ्यात्वेपिअप्रतिबद्धाधिष्ठानसाक्षात्कारपर्यंतंअहंकारस्तद्धर्माश्चदुःखादयोदुर्न्निवाराःकिं
च॥जीवन्मुक्तायावस्थायामप्यवश्यंभोक्तव्यंप्रारब्धं॥आपातज्ञानवताश्रवणादिमात्रवतांमादृशेनकथंनभोक्तव्यं
॥तथाचमोक्षोपिकथंवास्यादित्याशयेनश्रीरामउवाच॥मुनेइति॥हेमुनेत्वयामह्यंयदुदीरितंतत्सर्वंसत्यमेव॥तथापि

श्रीरामउ०॥मुनेसर्वमिदंसत्यंयन्मह्यंत्वयेरितं॥तथापिनजहात्येतत्प्रारब्धादृष्टमुल्बणं॥४१॥
मत्तंकुर्याद्यथामद्यंनष्टाविद्यमपिद्विजं॥तद्वत्प्रारब्धभोगोपिनजहातिविवेकिनं॥४२॥

उल्बणंभोगैकनाश्यत्वात्प्रबलंएतत्भुज्यमानंफलंप्रारब्धंचतददृष्टंवातन्मांनजहाति॥मत्तमिति॥मद्यंकर्तृनष्टा
ध्वस्ताविद्यानिषिद्धाचरणादिविषयिणीदुर्बुद्धिर्यस्यतथाभूतमपितथातथाद्विजंउपयमनादिभिःसंस्कृतमपियथा
२८ मत्तंकुर्यात्तद्वत्प्रारब्धस्योपक्रांतफलस्यभोगोविवेकिनमपिअप्रतिबद्धसाक्षात्कारवंतमपिनजहातिकिमुतईष २८
द्वद्ज्ञमादृशमितिलोकरीत्याउक्तिः॥४२॥ततइति॥ततःदुःखभोगपरिहारस्यपरोक्षज्ञानमात्रेणासंभवात्प्रतिबद्धापरो
क्षेणच्यासंभवाद्बहुनाउक्तेनकिंफलंनकिंचिदित्यर्थः॥अतोदुःखापगमेउपायांतरंब्रूहीत्याशयेनदुःखमेवनिगमयति

॥प्रारब्धमिति॥प्रारब्धं॥जीवोऽहंकारश्चेतित्रितयमपिमांअहोरात्रंबाधते॥तथापि॥नकेवलंप्रारब्धंफलति॥जडत्वा
त्॥फलमतउपपत्तेरित्याद्यधिकरणविरोधाच्च॥नापिकेवलःजीवःवैषम्याद्यापत्तेः॥तथाचसूत्रं॥वैषम्यनैर्घृण्येनसा
पेक्षत्वात्तथाहिदर्शयतीति॥अहंकारस्तुदुःखादिपरिणामुपादानत्वादावश्यकः॥ननुसदाजीवःस्मर्यतांसएवदुः

ततःकिंबहुनोक्तेनप्रारब्धंसजीवस्मृतः॥बाधनेमांदिवारात्रमहंकारोपितादृशः॥४३॥

खंदूरीकरिष्यतीत्यतआह॥स्मृतइतिस्मर्तुमारब्धइत्यर्थः॥आदिकर्मणिक्तःकर्तरिचेत्यादिकर्मणिकर्मार्थेक्तः॥
तथाचायंभावः॥बहुजन्माराधनेसत्येवविवेकादिक्रमेणमोक्षोलब्धुंशक्यते॥नत्विदानींस्मरणारंभमात्रे
णसंसारांबुनिधितरणंशक्यं॥बहूनांजन्मनामंतेज्ञानवान्मांप्रपद्यतइत्युक्तेरिति॥४३॥जीवायनमः॥

बाधतेमांद्वियाराश्चमित्यर्थः।तत्रनकेवलंबाधामात्रं॥किंतुजीवनमेवदुर्लभमित्याह॥अत्यंतेति॥अत्यंतंअतिश
येनपीडितः॥संजातपीडोजीवःजीवोपाधिभूतंमदीयलिंगशरीरंस्थूलदेहंविमुंचतिशीघ्रंत्यक्ष्यति॥वर्तमानसामी
प्येवर्तमानवद्वेतिभविष्यत्यपिवर्तमानसमीपेलट्प्रत्ययः॥तस्मादितो॥जीवाप्तयेजीवनस्थैर्यार्थंयःउपायः॥समह्यं
क्रियतां॥अध्येषणायांकर्मणिलोट्॥अनेनउपायोपदेशेआलस्यंनविधेयमित्युक्तंभवति॥अत्रेदमवधेयं॥विशे

अत्यंतपीडितोजीवःस्थूलदेहंविमुंचति॥तस्माज्जीवाप्तयेमह्यमुपायक्रियतांद्विज॥४४॥
॥ ॥इतिपद्मपुराणेशिवगीतासूपनिषत्सुद्वितीयोऽध्यायः॥२॥

महस्यांशेसंसारिणएवउमार्द्धविग्रहंत्रिलोचनंलीलार्थशरीरंएवंचतुर्भुजंलक्ष्मीसहायमपि॥तदुक्तंभागवते॥स
त्वंरजस्तमइतिप्रकृतेर्गुणास्तैर्युक्तःपरःपुरुषएकइहास्यधत्ते॥स्थित्यादयेहरिविरिंचिहरेतिसंज्ञाःश्रेयांसितत्रखलुसत्व
तनोर्नृणांस्युरिति॥अतएवशिवस्योत्कर्षापकर्षचिंतयामनःखेदनीयंननुश्रुतिरेवोत्कर्षापकर्षौब्रवीति॥त
देवारुद्रमगमन्कोभवानितिसोऽब्रवीत्॥अहमेकःप्रथममासंवर्त्तामिचभविष्यामिच॥जनितेंद्रस्यजनितोतविष्णो

२९

DR. BHAU DAJI

रित्यादौरुद्रोत्कर्षस्यविष्णोरपकर्षस्यचप्रतीतेः॥तथा॥नारायणएवासीन्नब्रह्मानचशंकरः॥इत्यादौप्रागुक्तः
विपरीतार्थैरितिचेन्न॥नहिनिंदान्यायेनश्रुतिद्वयस्यापिलीलाविग्रहविशेषप्रशंसापरत्वात्॥अन्यथापरस्परवि
रोधेनोभयोरप्यप्रामाण्यापत्तेः॥एषैवहिउदितानुदितहोमनिंदाश्रुत्यागतिः॥एतेनशैववैष्णवपुराणस्यवचना
न्यपिव्याख्यातानीति॥एवंस्थितेरामकृष्णाद्योपिभगवतएवलीलाविग्रहाः॥देवताप्रार्थनयाभगवदवतारुद्र
रूपकर्म्मैवपुराणेषुतत्तच्चरितप्रकीर्त्तनात्॥मोहादिनाटनंतुगुरूपदेशादिमाहात्म्यंलोकान्प्रतिप्रकटयितुंवेदे
वाप्रायदर्शनादितिन्यायेनोपक्रम्यप्राबल्यात्॥एतएवश्रीकृष्णस्यगुरुकुलवासः॥ईशानकृष्णवपुषत्यादि
ग्रंथैःश्रीनृसिंहाश्रमाअपीदंस्फुटीचक्रुरितिदिक्॥ ॥इतिश्रीमद्विशुद्धाद्वैतसिद्धांतप्रतिष्ठापनैकधुरंधरश्रीके
लदीवेंकटद्रिनायकविरचितायांश्रीशिवगीताव्याख्यायांद्वितीयोऽध्यायः॥ ॥२॥ ॥ ॥शिवार्पणमस्तु॥

अगस्त्यउवाच॥नगृह्णातिवचःपथ्यंकामक्रोधादिपीडितः॥हितंनरोचतेतस्यमुमूर्षोरिवभेषजं १

परमपुरुषार्थसाधनेउपदिष्टेपितद्विमुखःसन्विषयिकेष्वेवासौप्रवर्त्ततइतिदृष्टानकेवलंत्वमेवएवंविधः किंतुलोकसि
द्धौत्सर्गिकएवमेवेत्यगस्त्यआहनगृह्णातीति॥कामक्रोधादिभिःपीडितोरागीपथ्यंहितंवचःगुरूपदेशंनगृह्णाति॥

तदर्थबोधएवतस्यनभवतीत्यर्थः॥दैवयत्नादर्थबोधेजातेप्याहहितामिति॥यद्धितंतन्नरोच्यते॥यथामुमूर्षोः॥स
न्निहितमरणस्यभेषजंनरोचते॥आशंकायांसन्नुवक्तव्यइतिसनंतादुप्रत्ययः॥अयंभावः॥उपदिश्यमानमपिहि
तंनरोचतेइतिप्राकृतानांस्थितिरस्तुना॥त्वंतुउपदिष्टरीत्यातत्वमेवानुसंधातुमर्हसीति॥१॥किंच॥यदिलौकि
कपुरुषार्थोप्ययमनायासेनलभ्यतेतर्हिसाध्यतापिइहतुमोक्षसाधनेयादृगायासस्तादृगायासःसंभावित
इत्याह॥मध्येसमुद्रमिति॥यासीता॥मायिनामायाविनानृजुमार्गेणेत्यादिवादिनि॥दैत्येननतुमनु

मध्येसमुद्रंयानीतासीतादैत्येनमायिना॥आयास्यतिनरश्रेष्ठसाकथंतवसन्निधिं॥२॥

ष्यादिना॥मध्येसमुद्रंसमुद्रस्यमध्ये॥अतिदूरंअतिदुर्गमंचेदंवांप्रतीतिभावः॥पारेमध्येषष्ठ्यावेत्यव्ययीभाव
एदंतत्वंचनिपातनात्॥नीताबुद्धिपूर्वंप्रापिता॥ननुयदृच्छयागताहिनरश्रेष्ठेतिसंबोधनं॥नत्वंदैत्योनापित्वंमायावीति
भावः॥सासीतातवसन्निधिंसमीपंकथमायास्यतिनकथंचिदित्यर्थः॥२॥ ॥ शिवायनमः॥

ध्यंतइति॥यस्यद्वारिसर्वाअपिदेवताःमर्कटयूथवत्बध्यंते॥किंचयस्यसुरांगनाश्चामरधारिण्यःसंति॥तस्यज
यःकथंतवभविष्यतीतिवक्ष्यमाणेनान्वयः॥३॥भुंक्तइति॥योरावणःत्र्यंभुवरेणदर्पितोगर्वितःसन्अखिलांत्रिलोकींनि

बध्यंतेदेवताःसर्वाद्वारिमर्कटयूथवत्॥किंचचामरधारिण्योयस्यसंतिसुरांगनाः॥३॥
भुंक्तेत्रिलोकीमखिलांयःत्र्यंभुवरदर्पितः॥निष्कंटकंतस्यजयःकथंतवभविष्यति॥४॥

ष्कंटकंनिर्बाधंयथाभवतितथाभुंक्ते।तस्यजयःतत्कर्मकोजयःस्त्वंवचनायासदशापन्नस्यकथंभविष्यति॥अत्रतस्येति
कर्मणिषष्ठी॥तवेति॥तत्रापि॥कर्तरिषष्ठीदुर्लभा॥उभयप्राप्तौकर्मणीइति॥नियमात्॥तथापिकर्तुःशेषत्वविवक्षायांसं
बंधसामान्यषष्ठी॥तात्पर्यंतुकर्तृत्वरूपेविशेषेपर्यवसानं॥यद्वाद्वेअपिकर्तृषष्ठ्यौ॥तस्यजयोभविष्यतितवतुकथंभविष्यति॥
॥४॥

इंद्रजिदिति॥ इंद्रारस्यवैरेणोद्भूतः इंद्रजिन्नामतस्यरावणस्ययः पुत्रोस्तितस्याग्रेसंगरेयुद्धेदेवाबहुवारंपलायिताः॥
किंच॥ कुंभकर्णादिसुराणांदेवानांसूदनोभिभावकः कुंभकर्णोनाम भ्रातास्यास्ति॥ तथादिव्यैरस्त्रैः संयुक्तश्चिरंजीवी
विशेषेणभीषयतीतिबिभीषणः इत्यन्वर्थनामान्यः पूर्वेकाल्कुंभकर्णाद्भिन्नोपिभ्रातास्तिसकथंजेयइतिवक्ष्यमाणेना

इंद्रजिन्नामपुत्रोयस्तस्यास्तीशावरोद्भूतः॥ तस्याग्रेसंगरेदेवाबहुवारंप्रलापिताः॥५॥
कुंभकर्णाद्वयो भ्रातायस्यास्तिसुरसूदनः॥ अन्योदिव्यास्त्रसंयुक्तश्चिरंजीवीबिभीषणः॥६॥
दुर्गयस्यास्तिलंकाख्यंदुर्जेयंदेवदानवैः॥ चतुरंगबलयस्यवर्ततेकोटिसंख्यया॥७॥

न्वयः॥६॥
किंचदुर्गमिति॥ यस्यदेवदानवैर्मिलितैरपिदुर्जयंजेतुमशक्यंलंकाख्यंदुर्गमस्ति॥ यस्यचतुरंगबलंहस्त्यश्वरथप
दातिरूपाणिचत्वारिअंगानिघटकानियस्येति॥ तथाभूतंसैन्यंकोटिसंख्ययाउपलक्षितंसद्वर्ततेकिंयत्वः कोटिय
इत्येवगणनीयंनतुन्यूनातसस्त्रादिसंख्ययापरिछेदमित्यर्थः॥७॥ श्रीवायनमः॥

३१

३१

एकाकिनेति॥ एवंपूर्वोक्तःससहायःप्रतिपक्षः एकाकिनाअसहायेन॥ एकादाकिनिचासहा
येइत्याकिनिचप्रत्ययः॥ त्वयाकथंजेयः हेनृपनंदनेतिसंबोधनेनसौकुमार्यंध्वनयति॥८॥ आ

एकाकिनात्वयाजेयः सकथंनृपनंदन॥८॥ आकांक्षतेकरेधर्तुबालश्चंद्रमसंय
था॥ यथात्वंकाममोहेनजयंतस्याभिवांछसि॥९॥

कांक्षतइति॥ यथाबालश्चंद्रमसंकरेधर्तुमाकांक्षतेतथात्वमपिकाममोहेनतस्यरावणस्य
जयंअभिवांछसि॥ स्वशक्तिंचाविचार्यैवतंजेतुमिछसिनतुफलंलप्स्यसे॥ अतस्तत्वज्ञाना
र्थमेवयतस्वेत्यान्वय॥९॥

नाहंज्ञानेऽधिकारीवैराग्यविरहादितिशोकरीतिमनुसरन्श्रीरामःआह॥क्षत्रियोहमिति॥हेमुनि
श्रेष्ठ॥क्षत्रियोहंनतुब्राह्मणः॥येनयुद्धादिभीयांक्षमयाच्यतिष्ठेयं॥किंच॥क्षतात्त्रायतइतिव्युत्पत्त्या
पररक्षकताममोचिता॥सकथंसकुटुंबमपिनरक्षेयमितिभावः॥क्षणुधातोर्ड्वायकेपितदुपपद

क्षत्रियोहंमनुश्रेष्ठभार्यामेरक्षसाहृता॥यदितंननिहन्म्याशुजीवनेमेस्तिकंफलं१०

डेउः॥अतोनुपसर्गइतिकप्रत्ययेकृतेक्षत्वादितिघप्रत्ययः॥किंचमेममनतुमदीयस्यकस्यचित्॥
भार्यानतुक्षेत्रारामादिमात्रं॥रक्षसाक्षुद्रेणनत्वन्यदिदेतेनकेनचित्हृताबलान्नीता॥ननुक्षतःप्रवृत्ता
॥एवंस्थितेआशुशीघ्रंतंभार्याहर्त्तारंयदिननिहन्मितर्हिमेजीवनेकिंफलमस्ति॥तथाचनसीताला
भोममोहहेतुःकिंतुदुष्टनिग्रहःसचस्वधर्मत्वादावश्यकएवेत्याशयः॥१०॥ ॥नीयायनमः॥

अतइति॥अतःप्रागुक्ताद्धेतोःतत्त्वबोधेनत्वयाक्रियमाणेनोपदेशेनमेवैरनिर्यातनमकुर्वतोमम
नकिंचित्प्रयोजनं॥अनधिकारित्वात्॥तथाहिकामक्रोधादयोयेसर्वेदुर्गुणास्तेममतनुंदहन्त्यतस्तथात्र

अतस्तत्त्वबोधेननमेकिंचित्प्रयोजनं॥कामक्रोधादयःसर्वेदहन्त्येतेतनुर्मम॥११
अहंकारोपिमेनित्यंजीवनंहंतुमुद्यतः॥हृतायांनिजकांतायांशत्रुणामेचतस्तथा॥

हंकारोपिक्षत्रियोहंशूरश्चेत्यादिगर्वोपिमेममजीवनंनित्यंहंतुमुद्यतः॥तस्मान्ममनायंश्रवणाद्यवसर
इतिभावः॥ननुविषयेदोषदर्शनस्यविरक्त्युपायत्वादिदोषाःस्वयमनुभवतस्तावकथंनविरक्तिरुदेतीत्याशंक्या
ह॥यस्यशत्रुणाश्रवमवस्यहृतावमानस्यसतः॥निजकांतायांबाह्वायांसत्यांतत्प्रतीकारसामर्थ्यविर
हात्दुःखस्यतत्त्वबुभुत्सातत्त्वंबोद्धुमिच्छाविरागादिर्विकास्यात्सलोकेपुरुषाधमः॥अयंभावः॥अनि

३४
३३

त्यदुःखबहुलत्वादिज्ञानविरागहेतुरितिसत्यं।।तथापिभार्यापहारादिप्रयुक्तेदुःखेसतिअभिमानि
नांभ्रातृसजिहीर्षासैवकावदृदेति।।तन्नामगम्याःफलबलेनप्राबल्यकल्पनात्।।यस्यतुयुद्धकातरता
तादृशस्यकाममनेनविरक्तिःसंभाव्यतेनतुमादृशानामिति।।१२।।तस्मादिति।हेमुनिशार्दूलमुनि

यस्यतत्वबुभुत्सास्यात्सलोकेपुरुषाधमः।।१२।।तस्माद्रावणवधोपायंलंघयित्वांबुधिं
रणे।।ब्रूहिमेमुनिशार्दूलत्वत्तोनान्योस्तिमेगुरुः।।१३।।

अथतत्तदधिकारमनुसृत्यतदनुरूपमेवोपदेष्टुंसमर्थस्त्वमितिभावः।।अंबुधिंलंघयित्वायोयंर
णेरावणवधः।।समुद्रलंघनपूर्वकंयुद्धेरावणहननंतदुपायंममत्वंब्रूहि।।शापादिनापित्वंराव
णंभस्मीकुर्याः।।नचतावतामदिष्टसिद्धिः।।नापिछलादिनावैरिवधोममोहितश्चकइतिसूचयितुंरणे
इतिअंबुधिंलंघयित्वेतिचोक्तं।।ननुशत्रुवधोपायस्त्वयाअन्यतोबोद्धव्यः।।अहंतुतत्वसाधन

चतुष्टयसंपत्तिकालेब्रह्मतत्त्वमुपदेक्ष्यामीत्यतआह।।त्वत्तइति।।ममत्वत्तोऽन्योगुरुर्हितोपदेष्टाना
स्त्येवेति।।तस्मादनन्यशरणाय।।मह्यंरावणवधोपायोपित्वयैवोपदेष्टव्यइतिभावः।।१३।।एवंचेदि
ति।।एवंचेच्छत्रुवधएवावश्यकर्तव्यश्चेत्तर्हिअव्ययंनित्यंपार्वतीपतिंशरणंयाहि।।सभगवान्प्रसन्न

अगस्त्यउ० एवंचेच्छरणंयाहिपार्वतीपतिमव्ययं।।सचेत्प्रसन्नोभगवान्वांछितार्थंप्रदास्य
ति।।१४।।देवैरजेयःशक्राद्यैर्हरिणाब्रह्मणापिवा।।सवध्यःकथंबालतत्कृपानुग्रहंविना।।१६

अथसर्ववांछितमर्थंप्रकर्षेणदास्यति।।१४।।देवैरिति।।योरावणःशक्राद्यैर्देवैर्हरिणाब्रह्मणापिवाअजेयः
जयार्होनभवति।पूर्वोक्तब्रह्मवरबलादितिभावः।।अहंत्वत्यन्तचपलस्वल्पहार्थेऽत्रोयत्।यदितुवाक्लिष्टःचे
तिशक्यार्थंक्रियतेतदासत्यमजय्योवाक्यार्थइतियत्तादृशःप्रवर्ततेबोध्यं।सरावणःशंकरानुग्रहंविनाभे
त्वयावध्यःहंतुंशक्यःकथंस्यात्।।तस्मान्नाकरोरीतिवैकल्पिकीबद्धी।।१६।। शिवायनमः।।

न
अत्रैइति॥अतः त्वं करानुग्रहस्यावश्यकत्वात् विरजागमं विरजाख्यदीक्षाप्रतिपादकं तन्त्रमाश्रितः स
न् त्वां दीक्षयिष्यामि दीक्षायुक्तं करिष्यामि। दीक्षान्या वान्मनुबंधात्तत्करोतीति णिच्॥ णाविष्ठवदित्यादेति
यात्मनुपष्ठश्च लोपः॥ तेन मार्गेण उपायेन त्वं मर्त्यत्वं तरसाधारणत्वं मुक्त्वा त्यक्त्वा तेजोमयः शुद्धशरीरो भ

अतस्त्वां दीक्षयिष्यामि विरजागममाश्रितः॥ तेन मार्गेण मर्त्यत्वं हित्वा तेजोमयो भव॥१७॥
येन द्वारेण राजेन्द्र सर्वान्कामानवाप्स्यसि॥ भुक्त्वा भूमंडलं चांते नित्यसायुज्यमाप्स्यसि १८

३४ भव। आदिदीक्षितो भव॥१७॥ येनेति। येन दीक्षामार्गेण राजेन्द्र त्वं हत्वा सर्वान्कामान्काम्यंत इति कामाः काम ३४
नाविषयास्तानवाप्स्यसि॥ किंच भूमंडलं भुक्त्वा अंते नित्यं सायुज्यमुक्तिं प्राप्स्यसि। शुद्धांतःकरणस्य वि
वेकादिसाधनसंपन्नस्यादिति भावः॥ अथ मुनिवाक्यश्रवणानंतरं रामः तं मुनिसत्तमं दंडवत् साष्टांगं प्रणम्य
दुःखनिर्मुक्तः सन् प्रहृष्टेन अंतरात्मना उपलक्षितः सन् उवाच। मुनिश्रेष्ठेन मदीयमिष्टं चेत्स्यतीति अ

तिज्ञातत्वान्न तत्र विलंबोस्तीत्यमन्यतेति भावः॥१८॥ कृतार्थ इति मुने अहं कृतार्थो जातः मम वांछिता
र्थः॥ आगतः सिद्धः तथा हि पीतांबुधिः त्वं यदि मे मह्यं प्रसन्नस्तर्हि दुर्लभं किमु। अन्योऽपि संभावि

अगस्त्य उ० अथ प्रणम्य रामस्तं दंडवन्मुनिसत्तमं। उवाच दुःखनिर्मुक्तः प्रहृष्टेनांतरा
त्मना॥१९॥ कृतार्थोऽहं मुने जातो वांछितार्थो ममागतः॥ पीतांबुधिः प्रसन्नस्त्वं यदि मे किमु दुर्लभं॥२०
अतस्त्वं विरजां दीक्षां ब्रूहि मे मुनिसत्तम।

तं समुद्रपानं कृतवतस्तवानुग्रहे सति समुद्रसेतुबंधनाद्यात्मकं मदिष्टं अनायासेनैव सेत्स्यती
त्यर्थः॥२०॥ अत इति। हे मुनिसत्तम विरजां दीक्षां अत मम अनुग्राह्यत्वात् मे मह्यं ब्रूहि॥२१॥

शुक्लपक्षइति॥शुक्लपक्षेचतुर्दश्यांअथवाअष्टम्यांअथयासोमवारार्द्रानक्षत्राभ्यामुपेतायामेका
दश्यांसमारभेत्॥परस्मैपदमार्षं॥२२॥यमिति॥यंदेवंदृश्यामाहुस्तंध्यात्वा पाशुपतंव्रतंचरेदितिव
क्ष्यमाणेनान्वयः॥इत्थमिति।।कथंभूतं॥वामं॥श्रेष्ठंपूर्णानंदस्वरूपत्वात्सुंदरं वा॥संसारार्णवम
ग्नाहामितिवुस्वामी॥रुद्रःसंसारिणःतान्द्रावयति॥आर्द्रीकृपयाअनुगृह्णातीतिरुद्रःतंकिंवं

Dr BHAU DAJI MEMORIAL

अगस्त्यउ॰शुक्लपक्षेचतुर्दश्यामष्टम्यांवाविशेषः॥एकादश्यांसोमवारेआर्द्रा
यांवासमारभेत्॥२२॥यंवाममाहुर्यंरुद्रंयाघ्यतंपरमेश्वरं॥परात्परतरंचाहुःपरात्परतरंकिमं
२३

३५

तेरुदिधातानुपपदेआतोनुपसर्गेकइतिरातेःकःप्रत्ययःपरात्परतरमिति।परंजडादुत्कृष्टःजीवः
तस्मात्परतरं तन्नियामकत्वात्॥परादिति॥परःस्वभिन्नःप्रपंचःतंअतति सातत्येनव्याप्नोत्यभि
ध्यानतयेति॥परात्परजीवात्परं त्वनेनेतिपरतरःपरान्त्यासौपरश्चेतिकर्मधान्वयः॥अतानघोनरूपं
शुभंकरःतत्करोतीतिएवंतात्पर्यार्थश्च॥२३॥

३५

ब्रह्मणइति॥ब्रह्मणःविष्णोर्वह्निर्वाय्वोश्चजनकं॥ब्रह्मविष्णुरुद्रादिशब्दवाच्यानांसकललीलाविग्रहाणामधिष्ठानभूत
विंबचेतन्यमित्यर्थः॥अतएवसदाशिवंसर्वदापूर्णानंदात्मनाव्यवस्थितं॥एवंविधिंध्यात्वइतिपूर्वोक्तमनेनोपवि
बहूक्तःशुद्धिप्रकारमाह॥ध्यात्वेत्यादिनापंचभूतानिस्वीयदेहारंभकाणिपृथकपृथक्विप्रौ॥ध्यावायुजीवेनया

ब्रह्मणोजनकंविष्णोर्वह्निर्वाय्वोःसदाशिवं॥ध्यात्वाग्निनावसथ्याग्निंविशोध्यचपृथक्पृथक् २४
पंचभूतानिसंयम्यध्यात्वागुणविधिक्रमात्॥मात्राःपंचचतस्रश्चत्रिमात्रद्वितःपरं॥२५॥

युध्यानपूर्वकंशोषयित्वाअग्निनाअग्निबीजेनआवसथ्याग्निंध्यात्वातेनाग्निनातानिभूतानिसंयम्यदग्ध्वा॥२४॥
तत्रवास्त्यवदाहस्यासंभवान्निष्कृष्टार्थमाह॥ध्यात्वेति॥मदीयदेहारंभकभूतानिअग्निनादग्धानीतिभावनांकृत्वे
त्यर्थः॥तत्रभावनीयांप्रकारमाह॥गुणविधीति॥गुणाःशब्दादयःतेषांविधिर्बोधनंतत्क्रमेणेत्यर्थः॥तमेवक्रमंस्फुटं
तरमाह॥मात्राइतिपंचमात्राः॥रूपरसगंधस्पर्शशब्दतन्मात्राः॥अत्रमात्रापदेनतत्संबंधिनःपृथिव्यादोपलक्ष्यं
ते॥तथाचपूर्वंपूर्वंभूतस्योत्तरोत्तरंप्रत्युपादानतयातदीयशब्दादीनामप्युत्तरोत्तरमन्वयात्पंचमात्राइत्यनेनपृ

थिसुक्ताभवति॥ यतस्त्रइत्यनेनजलं॥ त्रिमात्राइतितेजः॥ हुरितिवायुः॥२५॥ एकमात्रामिति॥ एकमात्रायस्यत
थाभूतमोकारं॥ एतच्चोपलक्षणमित्याह॥ द्वादशांतमिति॥ द्वादश॥ एकादशतत्वानामाधारः परमेश्वरोक्तंताल
यावधिर्यस्मिन्कर्मणि तद्यथाभवति तथाव्यवस्थितं सुस्थितं ध्यात्वेत्यर्थः॥ एकादशतत्वानि तु भागवतोक्तेति तत्वा
निविश्वेत्रोत्कपक्रम्य नैवैकादशापंच॥ श्रीएषाह्यत्वमिदं सुश्रुमेत्कपन्यस्यमायामदीयाम्॥ श्रत्ययदत्तां किंतु दु

एकमात्रसमात्रंहि द्वादशांतंव्यवस्थितं॥ स्थित्यास्थाप्यामृतोभूत्वाव्रतंपाशुपतंचरेत्॥२६॥
इदंव्रतंपाशुपतंकरिष्यामिसमासतः॥ प्रातरेवंतुसंकल्पनिधायाग्निंस्वशाखया॥२७॥

र्घरमित्यंतेनस्वीकृतानि॥ स्थित्यास्थाप्येति तदनंतरममृतबीजेन तद्ध्यानपूर्वकं सर्वलयाधाराब्रह्मणः अमृतासे
केनसृष्टिक्रमेण देहोत्पत्तिपर्यंतं ध्यात्वेत्यर्थः॥ अमृतोभूत्वेति परमेश्वरोपासनायोग्यदिव्यदेहवानहमित्यभि
मानंकृत्वेत्यर्थः॥२६॥ इदमिति॥ पाशुपतं पशुपतिदेवताकं इदंव्रतं समासतः संक्षेपेण करिष्यामीति एवंप्रातस्त्क
तरेवसंकल्पस्वशाखोक्तविधिनाग्निंनिधाय प्रतिष्ठाप्येत्यर्थः॥२७॥ उपोषितः कृतोपवासः बाह्याभ्यंतरशौच

वान्स्नातः शुक्लवस्त्रधारी शुक्लयज्ञोपवीतवान् शुक्लमाल्यानुलेपनेयस्य तथाभूतः सन् जुहुयादित्युत्तरेण संबंधः॥२८॥
जुहुयादिति॥ ततस्तदनंतरं एकाग्रः सन् प्राणापानादिभिर्विरजामंत्रैः अनुवाकांतं अनुवाकसमाप्तिपर्यंतं पृथक्प्रत्येकस

उपोषितःशुचिःस्नातःशुक्लांबरधरःस्वयं॥ शुक्लयज्ञोपवीतश्चशुक्लमाल्यानुलेपनः॥२८॥
जुहुयाद्विरजामंत्रैःप्राणापानादिभिस्ततः॥ अनुवाकांतमेकाग्रःसमिदाज्यचरून्पृथक्॥२९॥
आत्मन्यग्निंसमारोप्ययातेअग्नेतिमंत्रतः॥ भस्मादायाग्निरित्याद्यैर्विमृज्यांगानिसंस्पृशेत्॥३०॥

मिदाज्यचरून्समिधः॥ आज्यं॥ चरुंच॥ जुहुयात्॥२९॥ आत्मनीति॥ अत्र अग्नइतीति वक्तव्ये अग्नेतीति संधिरार्षः॥ तदायमर्थः
यातेअग्नेयज्ञियातनूरित्यादिनामंत्रेण अग्निं आत्मनिसमारोप्य तदनंतरं भस्म विरजानलजमेव सन्निधानात् आदाय गृहीत्वा
अग्निरित्याद्यैर्मंत्रैर्विमृज्य भस्मनानुमंत्रणं कृत्वेत्यर्थः॥ भस्मानुमंत्रणमंत्रस्य पिप्पलादऋषिः गायत्रीछंदः रुद्रोदेवता भस्मशुद्ध्यर्थे ज
पेविनियोगः॥ ॐ अग्निरिति भस्मेत्यारभ्य ममएवं एतानि चक्षूंषि भस्मानीत्यंतैः अथर्वशिरसि पठितैर्मंत्रैः भस्माभिमंत्रणं कर्तव्यमिति॥

ततोंगानिसंस्पृशेत्॥ललाटादिषुभस्मधारयेदित्यर्थः॥धारणंचशिवनाममंत्रेणगायत्र्यादिभिर्वा॥तथाचपुलस्त्यः॥अग्निरिसा
दिभिर्मंत्रैःशुद्धंभस्माभिमंत्रितं॥शिवमंत्रेणवाधार्यमंत्रेणाष्टाक्षरेणवा॥गायत्र्यावापिदेवर्षिमंत्रेणप्रणवेनचेति॥तेषांफल
विशेषसएवाह॥करोतिशिवमंत्रेणयस्त्रिपुंड्रंद्विजोत्तमः॥अस्मःशूलधरःसौम्यःशिवलोकेमहीयते॥अष्टाक्षरेणमंत्रेण
यःकरोतित्रिपुंड्रकं॥विष्णोःपदमवाप्नोतिनान्यथाश्रुतिचोदितं॥सौरंपदमवाप्नोतिगायत्र्यामुनिसत्तम॥प्राप्नोतिब्रह्मण
रूपंप्रणवेननसंशयइति॥इहयद्यपिअंगानिसंस्पृशेदितिसामान्यतउक्तंतथापिधारणेविशेषोग्रंथांतराद्बोध्यः॥तत्रशौनकः
॥ललाटेहृदयेकंठेबाह्वोःपृष्ठेतथागले॥त्रिपुंड्रंभस्मनाकुर्याद्दिष्टमंत्रेणमानवइति॥स्मृतिरत्नावल्यांमध्यमानामिकांगुष्ठैरनु
लोमविलोमतः॥श्रुतिस्वल्पमनायुष्यमतिदीर्घंतपःक्षयं॥नेत्रयुग्मप्रमाणेनत्रिपुंड्रंधारयेद्द्विजः॥स्मृतिसंग्रहे॥धार्यंभ
स्मत्रिसंध्यंतुगृहिणानलसंयुतं॥सर्वकालंभवेत्स्त्रीणांयतीनांजलवर्जितं॥वानप्रस्थस्यकन्यानांदीक्षाहीननरेणतथा
॥मध्याह्नात्प्राग्जलैर्युक्तैःपरतोजलवर्जितं॥मध्यांगुलित्रियेणैवस्वदक्षिणकरस्यच॥त्रिपुंड्रंधारयेद्विद्वान्सर्वकल्मषना
शनमिति॥एतच्चभस्मधारणंसर्वकर्मांगं॥नचध्यानंनतज्ज्ञानंनतद्दानंजपोनसः॥त्रिपुंड्रंचविनायेनविप्रेणयदनुष्ठितमि
तिवचनात्॥कात्यायनेपि॥श्राद्धेयज्ञेजपेहोमेवैश्वदेवेसुरार्चने॥धृतत्रिपुंड्रःपूतात्मामृत्युंजयतिमानवः॥सोयोगए
त्कन्यायेनपुरुषार्थमपि॥तथाचभविष्यत्पुराणे॥सितेनभस्मनाकुर्यात्त्रिसंध्यंचत्रिपुंड्रकं॥सर्वपापविनिर्मुक्तःशि
वेनसहमोदते॥सत्यंशौचंजपोहोमस्तीर्थदेवादिपूजनं॥तस्यव्यर्थमिदंसर्वंयस्त्रिपुंड्रंनधारयेदित्यादि॥एवंस्थितेप्रकृत

व्याख्येयग्रंथोक्तंभस्मधारणंप्रकरणाद्द्विजांगमितिन्याय्यं॥पंचदशाध्यायेवक्ष्यमाणंतुप्रकरणपाठाभावात्पुरुषार्थं॥वि
स्तारस्त्वन्यतोबहुशः॥३०॥मुच्यतेचेति॥अंतःकरणशुद्धिपूर्वकज्ञानद्वारामुच्यतइत्यर्थः॥३१॥वीर्यमिति॥भस्मवान्भ
स्मधारीवीर्येणसंयुतोभवति॥अत्रहेत्वर्थवादमाह॥अग्नेर्वीर्यंतोभस्मेति॥तेनयत्नंक्रियतइति॥तस्मात्तस्यलक्षकमिदम्॥३३॥

भस्मच्छन्नोद्विजोविद्वान्महापातकसंभवैः॥पापैर्विमुच्यतेनित्यंमुच्यतेचनसंशयः॥३१॥
वीर्यमग्नेर्यतोभस्मवीर्यवान्भस्मसंयुतः॥३२॥भस्मस्नानरतोविप्रोभस्मशायीजितेंद्रियः॥
सर्वपापविनिर्मुक्तःशिवसायुज्यमाप्नुयात्॥एवंकुरुमहाभागशिवनामसहस्रकं॥इदंतुसं
प्रदास्यामितेनसर्वार्थमाप्स्यसि॥३४॥

एवंकुर्विति॥एवंप्रागुक्तरीत्याभस्मधारणंकुर्वित्यर्थः॥इदंबुद्धिस्थंशिवनामसहस्रकंतुसम्यक्सावधानतयाप्रक
र्षेणस्यहांतिशेषेणदास्यामितेननामसहस्रेणत्वंसर्वमर्थंप्रयोजनंप्राप्स्यसि॥३४॥ ॥शिवार्पणमस्तु॥ ॥

इतीति॥इतिपूर्वोक्तंउक्त्वातस्मैरामायवेदसारइत्यभिधा अन्वर्थंनामधेयंयस्येतितथाभूतंनित्यंप्रत्यहंशिवप्रत्यक्षकारकंभ
गवत्साक्षात्कारजनकंशिवनाम्नांसहस्रकंरहस्यभूतंसहस्र॥अङ्गारोइतिकस्यपःप्रददौ॥३५॥उक्तंचेति॥तेनागस्त्येनउ
क्तंच॥किमुक्तंतदाह॥हेरामत्वंदिवानिशंअरोत्रइदंजपतदपिनकंचिदेवाहोरात्रेकिंतुसर्वेष्वप्याहनिस्यपीति॥३६॥ ॥

रहस्यंप्रददौतस्मैशिवनामसहस्रकं॥वेदसाराभिधंनित्यंशिवप्रत्यक्षकारणं॥३५॥उक्तंचतेनरा
मस्त्वंजपनित्यंदिवानिशं॥३६॥ततःप्रसन्नोभगवान्महापाशुपतास्त्रकं॥तुभ्यंदास्यतितेनत्वंरा
वणंहत्वाप्राप्स्यसिप्रियां॥३७॥तस्यैवास्त्रमाहात्म्यात्समुद्रंशोषयिष्यसि॥संहारकालेजगतामस्त्रंतत्पार्वतीपतेः
३८॥

३८

ततइति॥ततःसहस्रनामजपात्प्रसन्नःकृतप्रसादःभगवान्शिवःपरैरज्ञातंसुमहत्पाशुपतास्त्रंतत्तुभ्यंदास्यतितेनास्त्रेण
रावणंतत्सहचरांश्चहत्वाप्रियांसीतांप्राप्स्यसि॥३७॥तस्यैवेति॥समुद्रमपितस्यैवास्त्रस्यमाहात्म्यात्सामर्थ्याच्छोषयिष्यसि॥त
स्यसमुद्रशोषणसामर्थ्यंकैमुतिकन्यायेनसमर्थयते॥संहारे॥पार्वतीपतेःशिवस्यजगतांसंहारकालेइदंअस्त्रंक्षिप्यतइ

प्रत्यं॥प्रयोगार्हमित्यर्थः॥असुक्षेपक्षे॥कर्मणिप्रत्र्॥तद्योगात्कर्त्तरिषष्ठी॥३८॥तदिति॥तस्यास्त्रस्यालाभेदानवानांजय
स्तावसुदुर्लभःकर्त्तुंशक्यत्वेऽपिविवक्षायांषष्ठी॥तेननलोकेतिनिषेधस्याप्रवृत्तिः॥उपसंहरति॥तस्मादिति॥३९॥ ॥इतिश्री
शिवगीताव्याख्यायांतृतीयोध्यायः॥३॥ ॥श्रीरामकृततपश्चर्यातुहूलाज्ञातसदाशिवप्रादुर्भावंचवर्णयितुंचतुर्थोध्यायआ

तदलाभेदानवानांजयस्तावसुदुर्लभं॥तस्माल्लब्धुंतदेवास्त्रंशरणंयाहिशंकरं॥३९॥ ॥इतिशिव
गीतासूपनिषत्सुतृतीयोध्यायः॥३॥ ॥एवमुक्त्वामुनिश्रेष्ठेगतेतस्मिन्निजाश्रमं॥अथरामगि
रौरामःपुण्येगोदावरीतटे॥१॥शिवलिंगंप्रतिष्ठाप्यकृत्वादीक्षांयथाविधि॥भूतिभूषितसर्वांगोरुद्राक्षाभर
णैर्युतः२

रभ्यते॥एवमिति॥मुनिश्रेष्ठेतस्मिन्नगस्त्येएवंउक्त्वानिजाश्रमंगतेसतिअथरामःरामगिरौपुण्येपवित्रेगोदावर्यास्तटेशिवलिं
गंप्रतिष्ठाप्य॥तथा॥यथाविधिपूर्वाध्यायोक्तंविधिमनतिक्रम्यदीक्षांविरजाख्यांकृत्वास्थितइतिपंचमश्लोकस्थेनसहान्व
यः॥कीदृशोरामः॥भूतिभूषितसर्वांगः॥रुद्राक्षाण्येवाभरणानितैर्युतः॥२॥

अभिषिच्येति॥स्वयंप्रतिष्ठापितंत्र्यंबकलिंगंपुण्यैर्जलैरभिषिच्य॥किंविधैर्जलैःगौतमीसिंधुसंभवैःगोदावरीनदीप्रभवैः
वन्यानिवनेजातानितादृशैःपुष्पैःफलैश्चार्चयित्वास्थितइतिवक्ष्यमाणेनान्वयः॥३॥भस्मेति॥भस्मनाछन्नः॥भस्मन्ये
यन्नेतइतिभस्मशायी॥व्याघ्रचर्मतदेवासनंतस्मिन्स्थितःनक्तंदिवंअहोरात्रंनाम्नांसहस्रंवेदसाराख्यंशिवनामसहस्रंप्र

अभिषिच्यजलैःपुण्यैर्गौतमीसिंधुसंभवैः॥अर्चयित्वावन्यपुष्पैस्तादृग्वन्यफलैरपि॥३॥
भस्मछन्नोभस्मशायीव्याघ्रचर्मासनेस्थितः॥मासमेकंजलाहारोमासंचपवनाशनः॥४॥

३९

कर्षेणभक्तिश्रद्धारूपेणजपन्॥नविद्यतेअन्यस्मिन्।नसदाशिवाद्भिन्नेधीर्यस्यसःअनन्यधीः॥४॥मासमिति॥एकंमासंव्याप्यफ
लमेवाहारोयस्यतथाभूतःस्थितःपर्णान्येवअन्नंयतइत्यन्नानंभक्ष्यंयस्यतथाभूतः॥अत्रसर्वत्रमासमित्यत्यंतसंयोगेद्विती
या॥५॥शांतइति॥पुनःकिंभूतोरामचंद्रःशांतःअंतरिंद्रियनिग्रहवान्।दांतःबहिरिंद्रियनिग्रहवान्॥हृत्पंकजेसमासीनं
महेश्वरंएवंपूर्वोक्तनियमविशिष्टःसन्ध्यायन्॥६॥

३९

त्रिनयनशब्दस्यतुआदित्वान्नत्वंनेत्याहुर्दुर्घटवृत्तिकारादयः॥नायंक्षुभ्नादिःकिंतुपूर्वपदात्संज्ञायामितिणत्वस्येव
हणत्वामित्यन्ये॥विद्युत्सौदामिनीतद्वत्पिंगानांधरंधारकं॥अन्यथाकर्मण्यणःप्रसंगात्॥विद्युद्वद्दीप्तिमज्जुहेति

मासमेकंफलाहारोमासंपर्णाशनःस्थितः॥मासमेकंजलाहारोमासंचपवनाशनः॥५॥
शांतोदांतोप्रसन्नात्माध्यायन्नेवंमहेश्वरं॥हृत्पंकजेसमासीनंउमादेहार्धधारिणं॥६॥
चतुर्भुजंत्रिनयनंविद्युत्पिंगजटाधरं॥कोटिसूर्यप्रतीकाशंचंद्रकोटिसुशीतलं॥७॥ ७
सर्वाभरणसंयुक्तंनागयज्ञोपवीतिनं॥व्याघ्रचर्मांबरधरंवरदाभयधारिणं॥८॥ ८

नामितितद्धितात्यंतस्यताछीलिकफिप्रासंनियोगशिष्टत्वात्॥कोटिसंख्याकाःसूर्याःकोटिसूर्याःतैःसदृशं॥कोटिसूर्य
प्रतीकाशं॥नित्यसमासोयमितिप्रागेवोक्तं॥७॥नागेति॥नागएवयज्ञोपवीतंतदस्यास्तीतिनागयज्ञोपवीति॥तत्रकर्म
धारयान्मत्वर्थीयाइतिनुप्रायिकंनागैर्यज्ञोपवीतिनमितिवात्रिशूलंचडमरुश्चत्रिशूलडमरूतौधरंधारयंतमित्यर्थः॥ ८

कर्तृकर्मणोः कृतीतिसूत्रेणकर्मणिषष्ठीनभवति॥ तदर्हमितिसूत्रेणतदनित्यताज्ञापनात्॥ आर्षत्वाद्वा॥९॥ इदानींजायतेऽस्तिवर्द्धतेऽपक्षीयतेविपरिणमतेनश्यतीत्येवंरूपान्षड्भावविकारान्यास्कोक्तान्निषेधतिनित्यमिति॥ नित्यंनियतंउत्पत्तिरहितमित्यर्थः॥ यपूनेध्रुवेइतिन्यपू॥ नियतंध्रुवमितिरत्नकोशः॥ आद्यंतमिति॥ जन्मांतरास्तित्वलक्षणहीनं

व्याघ्रचर्मोत्तरीयंचसुरासुरनमस्कृतं॥ पंचवक्त्रंचंद्रमौलिंत्रिशूलडमरूधरं॥९॥
नित्यंचशाश्वतंशुद्धंध्रुवमक्षरमव्ययं॥ एवंनित्यंप्रजपतोगतोमासचतुष्टयं॥१०॥
अथजातोमहानादःप्रलयांबुधिभीषणः॥ समुद्रमथनोद्भूतमंदरावनिभृद्ध्वनिः॥११॥

यविकारशून्यमित्यर्थः॥ ध्रुवंएकरूपंविपरिणामशून्यमित्यर्थः॥ अपक्षयरहितं॥ यद्यपिजन्मादित्रिषेधवषसंक्रांतान्नियोभाष्यकारादिभिर्निरुक्तः इहापिध्रुवमित्यनेनैवषण्मंत्रयाणांनिषेधः सुलभस्तथापिसिद्धस्यगतिरितिगोबलीवर्दन्यायेनसमाधेयमितिदिक्॥१०॥ अथमासचतुष्टयगमनानंतरंमहान्नादोजातः॥ कीदृशः प्रलयांबुधिभीषणः॥ अंबुधिशब्देनतदीयःनादोलक्ष्यते॥ समुद्रमथनेनोद्भूतोयोमंदरावनिभृतोमंदरपर्वतस्ययोध्वनिः तत्सदृशइत्यर्थः॥ सिंहोमाणवकइतिवत्॥११॥

अत्रैवेति॥ रुद्रेति॥ रुद्रस्यबाणाग्निनादीप्तस्त्रासंदीप्तबहुलंयत्त्रिपुरंतस्ययोविभ्रमःसहसांभ्रमइतियावत्॥ तंकथंकरोतीतितथाभूतोमहान्नादोजातइतिपूर्वेणान्वयः॥ तत्करोतीतिण्यंतात्पचाद्यच्॥ तमिति॥ अथमहानादोत्पत्त्यनंतरंतन्नादमाकर्ण्यअ

रुद्रबाणाग्निसंदीप्तभ्रमत्त्रिपुरविभ्रमः॥ तमाकर्ण्याथसंभ्रांतोयावत्पर्येतिपुष्करं॥ तावद्देवमहत्तेजोरामस्यापुरोद्विजाः॥१२ तेजसातेनसंभ्रांतोनापश्यत्सदिशोदश॥ अंधीकृतेक्षणस्तूर्णंमोहंयातोनृपात्मजः॥१३॥

संभ्रांतः॥ जातसंवेगः समौसंवेगसंभ्रमावित्यमरः॥ भयादिनाकर्मस्वपाटवंसंवेगइतिक्षीरस्वामी॥ एवंभूतोरामःयावत्पुष्करंगोदावरीजलं॥ तच्चैवप्रक्रांतत्वात्॥ पुष्करंसर्वतोमुखमित्यमरः॥ पर्येति॥ एष्यामीतिप्रक्रांतवान्कठोरदृष्टभ्रातुमज्जाभुवंतोहिजलेमज्जंतीतिनाथः॥ यावत्पुरानिपातयोर्लट्इतिभविष्यतिलट्॥ तावन्मध्येएवरामस्यपुरोमहद्यत्तेजःअमहत्तेजआसीत्॥ हेद्विजाः इतिमुनीन्सूतःसंबोधयति॥१२॥ तेजसेति॥ तेनतेजसासंभ्रांतःसरामोदशापिदिशोनापश्यत्॥ किंतुअंधीकृतेक्षणेनेत्रेयस्यसएवंभूतःसन्तूर्णंशीघ्रंमोहंयातः॥१३॥ ॥६७॥ श्रीशिवार्पणमस्तु॥

डाक्टर भाऊदाजी इत्याख्यस्य स्मारकम्
DR BHAU DAJI

विचंत्येति॥ हेद्विजेश्वराः विचिंत्य विचार्य दैत्यमायां तर्कितवान्॥ दैत्यमायाएवेति कर्दितवान्॥ अथ महावीरो रामः उत्थाय स्वकं आ-
त्मीयं धनुः सज्जं कृत्य दिव्यास्त्राभिमंत्रिता ये निशिता स्तीक्ष्णा बाणास्तैः॥ वस्तुतस्तु बाणैरस्त्रैश्चेत्येवार्थः॥ तथा चानुपदं व-
ति॥ तस्मिंस्तेजसि शस्त्राणि चास्त्राण्यस्य महीपतिरिति पूर्वोक्ततेजोराशिं आविध्येन ताडितवान्॥ व्यध ताडने इति

विचिंत्य तर्कयामास दैत्यमायां द्विजेश्वराः॥ अथोत्थाय महावीरः सज्जं कृत्वा धनुः स्वकं॥ अविध्यं नि-
तैर्बाणैर्दिव्यास्त्रैरभिमंत्रितैः॥१४॥ आग्नेयं वारुणं सौम्यं मोहनं सौरपार्वतं॥ विष्णुचक्रं महाच-
कालचक्रं च वैष्णवं॥१५॥ रौद्रं पाशुपतं ब्राह्मं कौबेरं कुलिशानिलं॥ भार्गवादि बहून्यस्त्राण्ययं प्रायुंक्त राघवः॥
१६

धातोः कर्तरि लङ्॥१४॥ दिव्यास्त्राण्येवाह द्वाभ्यां आग्नेयमिति॥ आग्नेयं अग्निर्देवताकं॥ मोह्यतेऽनेनेति मोहनं मोह-
नास्त्रं॥ अनिलो वायुर्देवतास्येत्यानिलं॥ कुलिशं च आनिलं चेति समाहारद्वंद्वः ऐंद्रं वायव्यं चेत्यर्थः॥ अयं राघवो ब-
हून्यस्त्राणि प्रायुंक्त प्रयुक्तवान्॥१६॥

तस्मिन्निति॥ तस्मिन्प्रयुक्ते तेजसि अस्य महीपतेः शस्त्राण्यस्त्राणि च विलीनानि॥ महाभ्रस्य संबंधिन्यः करकाः वर्षोप-
लानीरधाविवेति दृष्टांतेन अत्यंतं अस्त्राणां कुंठीभावं दर्शयति॥१७॥ तत इति॥ तदनंतरं तस्य करात्॥ च्युतं सत् धनुर्जज्वाल
॥ तथा तूणीरं निषंगः जज्वालेत्यनुषज्यते॥ यद्यपि तूणोपासंगतूणीरनिषंगा इषुधिर्द्वयोः॥ तूण्यामित्यमरे तूणीरशब्दः पुल्लिं-

तस्मिंस्तेजसि शस्त्राणि चास्त्राण्यस्य महीपतेः॥ विलीनानि महाभ्रस्य करका इव नीरधौ॥१७॥
ततः क्षणेन जज्वाल धनुस्तस्य कराच्च्युतं॥ तूणीरं चांगुलित्राणं गोधिकापि महीपतेः॥१८॥

गएवोक्तः॥ भिन्नलिंगानां न द्वंद्व इति तेन परिभाषितत्वात्॥ तथाप्यार्षो लिंगव्यत्ययो बोध्यः॥ यद्वा तूणीरादित्वादत इति तूणी-
रं॥ तूणीसहितमिति यावत्॥ ईदृशं अंगुलित्राणं जज्वालेति योजना॥ तथा गोधिकापि॥ ज्याघातवारणार्थं कृतं चर्ममयं त-
लमपि जज्वाल॥ गोधातले ज्याघातवारणे इत्यमरः॥ अत्र ह्रस्वसाम्याभिप्रायेण गोधइति द्विवचननिर्देश इति स्वामी॥ गुध
परिवेष्टने॥ अस्मात्करणे षिद्भिदादिभ्योऽङ् प्रत्यये गुणे विशिष्टं भिदादिगणपाठे निपातितं यद्वा एरेणा वित्यादिसूत्रे च

रीत्यानिवृत्तप्रेषणेद्रुतुमणिणिचिप्राकृतार्थपर्यवसानेसाध्वसिम्छिनत्तीतिवत्करणस्यकर्तृत्वविवक्षायापन्याद्यच्चिवे
धं॥उक्तंचहरिणानिवृत्तप्रेषणाद्धातोःप्राकृतेर्थेणिजुच्यतइति॥नचशुद्धादेवायंप्रत्ययोस्त्वितिवाच्यं॥इगुपधलक्षणेन
केनबाधितत्वात्॥नचवासरूपन्यासः॥सरूपत्वात्॥नानुबंधकृतमसारूप्यमितिसिद्धांतादितिदिक्॥१८॥तदिति॥अथ

तद्दृष्ट्वालक्ष्मणोभीतःपपातभुविमूर्छितः॥अथाकिंचित्करोरामोजानुभ्यामवनिंगतः॥१९॥
मीलिताक्षोभयाविष्टःशंकरंशरणंगतः॥स्वरेणाप्युच्चरन्नुच्चैःशंभोर्नामसहस्रकं॥२०॥

धनुरादिज्वलनानंतरंतद्धनुरादीनांज्वलनंदृष्ट्वालक्ष्मणोभीतोमूर्छितश्चसन्भुविपपात॥अथरामोनकिंचित्पराक्र
मंकरोतीत्यकिंचित्करःसन्शंकरंशरणंरक्षितारंगतःप्राप्तः॥किंकुर्वन्शंभोर्नामसहस्रकंवेदसाराख्यंउच्चैःस्वरेण
तारस्वरेणापिउच्चरन्उच्चारयन्नित्यर्थः॥अंतर्भावितण्यर्थाच्चरतेःशतृप्रत्ययः॥२०॥ ॥शिवायनमः॥

शिवंचेति॥किंचशिवंनमोदंडवत्साष्टांगंपुनःप्रणनाम॥२१॥पुनश्चेति॥पुनश्चपुनरपिपूर्ववदेवदेवःशंभुःआसीत्की
दृशःआवृःदिङ्मंडलंस्वनत्स्वनयत्॥प्रतिध्वानैर्दिशःपूरयन्नित्यर्थः॥अंतर्भावितण्यर्थात्स्वनतेःशतृप्रत्ययः॥तथावसुधा

शिवंचदंडवन्नत्वाप्रणनामपुनःपुनः॥२१॥पुनश्चपूर्ववच्चासीच्छंभोर्दिङ्मंडलंस्वनन्॥चचाल
वसुधाघोरंपर्वताश्चचकंपिरे॥२२॥अथक्षणेनशीतांशुशीतलंतेजआददन्॥उन्मीलिताक्षो
रामस्तुयावद्यावत्प्रपश्यति॥तावद्ददर्शवृषभंसर्वालंकारसंयुतं॥२३॥ ॥शिवायनमः॥

भूमिःघोरंभयंकरंचचाल॥पर्वताश्चकंपिताः२२अथेति॥अथानंतरंक्षणेनउन्मीलिताक्षःसन्रामःशीतांशुश्चं
द्रस्तद्वच्छीतलंशीतस्पर्शंतेजःआसमंताद्दधत्॥अपिबत्सादरमद्राक्षीदित्यर्थः॥धेट्पाने॥विभाषाधेट्श्व्योरिति
ङ॥यावद्यावत्तुप्रपश्यतिप्रकर्षेणअवलोकइति॥तावद्वृषभंददर्श॥प्रथमंतेजःपुंजमात्रंदृष्टंततोवृषभंत्व
नोद्राक्षीदित्यर्थः॥वृषभंचिह्नानिष्टिसर्वलंकारेत्यादिनादर्शयतिद्विशोदशोस्यंतेन॥२३॥ शिवायनमः॥

पीयूषेति॥पीयूषस्यामृतस्यमथनेनोद्भूतंयन्नवनीतं॥दधिमंथनप्रभवप्रसिद्धनवनीतापेक्षयाकारणप्रकर्षादत्य
न्तरमणीयमितिभावः॥तस्ययःपिंडःतद्वत्सितंप्रोतंशृंगाग्रेखचितंस्वर्णंयस्यतं।मरकतच्छायेनशृंगद्वयेनाचितंपुच्छि
तंरमणीयमित्यर्थः॥२५नीलेति॥नीलरत्नंइंद्रनीलमणिःतद्वद्दीप्तगणीयस्यतंकृत्स्नेनकंठकंबलेनसास्नयाभूषितं॥

पीयूषमथनोद्भूतनवनीतस्यपिंडवत्॥प्रोतस्वर्णंमरकतच्छायशृंगद्वयांचितं॥२५॥नीलरत्न
सणंकृत्स्नकंठकंभूषितं॥रत्नपल्याणसंयुक्तंनिबद्धश्वेतचामरं॥२६॥घंटिकाघर्घरैःशब्दैःपू
रयंतंदिशोदश॥तत्रासीनंमहादेवंशुद्धस्फटिकविग्रहं॥२७॥

४३ रत्नमयेनपल्याणेनआस्तरणेनसंयुक्तं॥श्वेतचामरैर्निबद्धं॥२६॥घंटिकेति॥घंटिकाःक्षुद्रघंटाःघर्घराःभूषणवि
शेषाःतैर्विविधैर्यन्नरणिताःशब्दाःतैर्दशदिशःपूरयंतं॥तत्रेति॥तत्रतस्मिन्पूर्वोक्तेवृषेतत्रासीनंमहादेवंददर्श ४३
रघुनंदनइतिवक्ष्यमाणेनान्वयः॥महादेवस्यविशेषणानिशुद्धस्फटिकेत्यादीनि॥२७॥ ॥शिवायनमः॥

नानाविधेति॥नानाविधानियान्यायुधानितैरुद्भासितंशीलंयेषांतेनानायुधोद्भासितःतथाभूताःदशबाहवोयस्यतंतथो
क्तं॥ननुउद्भासीतिणिनिप्रत्ययोनुपपन्नःसुप्यजातावितिसूत्रेसुबुक्तेःप्रादिनिनिरुनोर्थेतिकातिकादौसिद्धांतित
त्वादितिचेद॥नउपसर्गस्यापपरत्वाभावात्प्राप्तोणिनिर्भवतीतितद्धर्थात्॥अन्यथाब्राह्मणानामंत्रयितेति

कोटिसूर्यप्रतीकाशंकोटिशीतांशुशीतलं॥व्याघ्रचर्मांबरधरंनागयज्ञोपवीतिनं॥२९॥
सर्वालंकारसंयुक्तंविद्युत्पिंगजटाधरं॥नीलकंठंव्याघ्रचर्मोत्तरीयंचंद्रशेखरं॥३०॥
नानाविधायुधोद्भासिदशबाहुंत्रिलोचनं॥युवानंपुरुषश्रेष्ठंसच्चिदानंदविग्रहं॥३१॥

दुदाहृतस्यअजातिप्रत्युदाहरणस्यासंगतिप्रसंगादितिप्राचः।यस्तुतरुउपसर्गाद्गतिधाताविति सूत्रे
केय्यटेनसुजावितिसुग्रहणंप्रादिषुप्रत्त्यर्थं॥तेनप्रादावाणिर्भवत्येवेत्युक्तत्वात्शीत्यानचात्रांकान्योत्तर
मितिदिक्॥३१॥

तत्रैवचेति॥तत्रैववृषभेसुखासीनांजगन्मातरमंबिकांरघुनंदनोददर्शेतिवक्ष्यमाणेनान्वयः॥अंबिकाया
एवंविशेषणानिपूर्णचंद्रनिभाननामित्यादीनि॥नीलानांइंदीवराणांयद्दाममालातद्वाभांतत्सदृशीउद्यंती
आविर्भवंतीमरकतस्येवप्रभायस्यास्तां॥३२॥मुक्तेति॥मुक्ताएवाभरणानितैःसंयुक्तां॥अतएवताराभि

तत्रैवचसुखासीनांपूर्णचंद्रनिभाननां॥नीलेंदीवरदामाभांउद्यन्मरकतप्रभां॥३२॥
मुक्ताभरणसंयुक्तांताराभिरचितामिव॥विंध्यक्षितिधरोत्तुंगकुचभारभरालसां॥३३॥
सदसत्संशयाविष्टमध्यदेशांतरांबरां॥३४॥

र्नक्षत्रैरचितांभूषितांरात्रिमिवस्थितां॥विंध्यक्षितिधरवदुत्तुंगयोरत्युन्नतयोःकुचयोर्योभारःतत्तस्य
योभरःअतिशयःतेनालसां॥अथातिशयोभरइत्यमरः॥३३॥सदसदिति॥सदसंशयेअस्तिनवेत्येवंरूपे
संदेहेआविष्टविषयभूतांमध्यदेशांतरंमध्यदेशावकाशोयस्यास्तां॥अंतरमवकाशावधीत्याद्यमरः॥वरांसर्वोत्कृष्टां॥३४॥

दिव्येति॥दिव्यानांमाल्यानांअंबराणांधरां॥धारयित्रीं॥तांबूलस्यग्रासेनभक्षणेनशोभितां॥[illegible]॥३५॥
शिवेति॥शिवस्यआलिंगनेनसंजातैःपुलकैःरोमांचैरुल्लसितंशीलंयस्यतथाभूतोविग्रहोदेहोयस्यास्तां॥सौं
दर्यसारस्यसंदोहोमेलनंयस्यास्तां॥ननुबहुव्रीहौविशेष्यनिपातात्कथमितिसौंदर्यसारस्यसंदोहइतिषष्ठीतत्पुरुषेतुपरव

दिव्यमाल्यांबरधरांनीलेंदीवरलोचनां॥अलकोद्भासिवदनांतांबूलग्रासशोभितां॥३५॥
शिवालिंगनसंजातपुलकोद्भासिविग्रहां॥सच्चिदानंदरूपाढ्यांजगन्मातरमंबिकां॥३६॥
सौंदर्यसारसंदोहांददर्शरघुनंदनः॥स्वस्ववाहनसंबद्धान्नानायुधसमुल्लसत्करान्॥बृहद्रथ
तरादीनिसामानिपरिगायतः॥३७॥

लिंगत्वात्पुंस्त्वंस्यात्॥३६॥स्वेति॥रघुनंदनःदिक्पालांश्चददर्शइत्यन्वयः॥कीदृशान्दिक्पालान्॥स्वस्ववाहनैरैरा
वतादिभिःसंबद्धान्॥नानायुधैर्वज्रादिभिर्लसंतःशोभमानाःकरायेषांतान्॥एहत्सामेति॥सामिहत्त्वामहइत्यस्यामृ
चिगीतं॥तथारथंतरंसामअभित्वाशूरनोनुमइत्यस्यामृचिगीतं॥एतच्चरथंतरंबृहद्रथंतरंआदीयेषांतानि॥आ
दिशब्दाद्वाजसनेयिहिरण्यपुरुषगणादीनांसंग्रहः॥तानिसामानिपरियागतःकुर्वतइत्यर्थः॥गीतिषुसामाख्येतिसिद्धांतात्॥३७

त्येति॥स्वस्वकांताभिःप्राचीप्रभृतिभिःसमायुक्तान्परितःत्रीवयोःसमंतात्स्थितान्॥३८॥अग्रगमिति॥अग्र
जनार्दनंददर्शेत्यन्वयः॥कालांबुजंनीलोत्पलं॥कृष्णेनीलासितश्यामकालश्यामलमेचकाइत्यमरः॥तेनसदृ
शंनित्यसमायोगमित्युक्तंप्राक्॥३९॥पश्चादिति॥पश्चाद्ब्रह्माणंददर्शेत्यन्वयः॥चतुर्भिर्मुखैर्वेदचतुष्टयरूपरूपस्व

स्वस्वकांतासमायुक्तान्दिक्पालान्परितस्स्थितान्॥अग्रगंगरुडारूढंशंखचक्रगदाधरं३८
कालांबुजप्रतीकाशंविद्युत्कांत्याश्रियायुतं॥जपंतमेकमानंसारूढाध्यायंजनार्दनं॥३९॥
पश्चाच्चतुर्मुखंदेवंब्रह्माणंहंसवाहनं॥चतुर्वक्त्रैश्चतुर्वेदरूपस्तैःकैर्महेश्वरं॥स्तुवंतंभारसंयुक्तंदी
र्घकूर्चजटाधरं४०

कैर्महेश्वरंस्तुवंतंभारतीयुक्तं॥सरस्वत्यासहितं॥दीर्घकूर्चः॥श्मश्रुयंयस्यतंदीर्घकूर्चं॥कूर्चमस्त्रीभ्रुवोर्मध्यमि
त्यमरः॥दीर्घश्मश्रुमितिवा॥कूर्चोविकत्थनेमध्येभ्रुवोःश्मश्रुणिकैतवेइतिविश्वः॥४०॥ ॥शिवायनमः॥

अथर्वेति॥मुनीनांमंडलःसंघःतंददर्शेतिसंबंधः॥मंडलशब्दस्यत्रिलिंगत्वेप्यत्रपुल्लिंगस्यैवनिर्देशः॥कथंभूतंमंड
लंअथर्वशिरसाअथर्ववेदप्रसिद्धेनतेदेवावैस्वर्गंलोकमगमन्नित्यादिनाउपनिषद्विशेषेणदेवंसदाशिवंस्तुवंतं॥अं
बुधिंचददर्शकीदृशंगंगादिभिस्तटिनीभिर्नदीभिर्युक्तं॥नीलविग्रहं॥शरीरविशेषधारिणमित्यर्थः॥४१॥श्वेतेति॥श्वेता

अथर्वशिरसादेवंस्तुवंतंमुनिमंडलं॥गंगादितटिनीयुक्तमंबुधिंनीलविग्रहं॥४१॥
श्वेताश्वतरमंत्रेणस्तुवंतंगिरिजापतिं॥अनंतादिमहानागान्कैलासगिरिसन्निभान्४२
कैवल्योपनिषत्पाठान्मणिरत्नविभूषितान्॥सुवर्णवेत्रहस्ताढ्यंनंदिनंपुरतःस्थितं४३

श्वतरोपनिषद्रूपेणमंत्रेणगिरिजापतिंस्तुवंतमित्यंबुधेर्विशेषणं॥अनंतआदिर्येषांतान्महानागान्महतःसर्पान्
ददर्श॥४२॥कैवल्योपनिषदंपठंतीतिकैवल्योपनिषत्पाठाः॥तान्सुवर्णेति॥सुवर्णप्रचुरोवेत्रःसुवर्णवेत्रःतत्स
हितेनहस्तेनाढ्यंपुरतःस्थितंनंदिनंचददर्शेत्यन्वयः॥४३॥

दक्षिणइति॥दक्षिणेनागगणेनांददर्श॥कीदृशंमूषिकंआरूढोमूषिकारूढः॥तंमूषिकान्भूकारमध्योनतुअकारमर्मं
भ्यइतिधातुरत्यादिस्फुटः॥मयूरएववाहनंतदारूढंषण्मुखंउत्तरेददर्शेतिसंबंधः॥४४॥४५नटंती॥त्रिनटन्तंतथाभृ
ङ्ग्यासोभृंगिरिटिर्गणविशेषस्थंतंददर्श॥नानाविकाराविवदनादियेषांतान्प्रमथाधिपानददर्श॥४६॥४७॥दिविनं

दक्षिणेमूषिकारूढंगणेशंपर्वतोपमं॥मयूरवाहनारूढमुत्तरेषण्मुखंतथा॥४४॥
महाकालंचचंडेशंपार्श्वयोर्भीषणाकृती॥कालाग्निरुद्रंदूरस्थंज्वलद्दावाग्निसंनिभं॥४५॥
त्रिपादंकुटिलाकारंनटद्भृंगिरिटिंपुनः॥नानाविकारवदनान्कोटिशःप्रमथाधिपान्॥४६॥
नानावाहनसंयुक्तंपरितोमातृमंडलं॥पंचाक्षरीजपासक्तान्सिद्धविद्याधरादिकान्॥४७॥
दिव्यरुद्रकगीतानिगायत्किन्नरवृंदकं॥तत्रत्रैयंबकंमंत्रंजपद्द्विजकदंबकं॥४८॥

किंनरवृंदकंददर्श॥केत्रावृत्अस्मात्अघत्रर्थेकविधानमितिकप्रत्ययः॥४८॥त्रीण्यंबकानिलोचनानियस्यासो
त्र्यंबकः॥तस्येमंत्रैयंबकंमंत्रंजपद्द्विजकदंबकंब्राह्मणवृंदंददर्श॥४८॥ ॥शिवायनमः॥ ॥

४६

४६

MEMORIAL

नादनृत्तेति॥अप्सरोगणान्ददर्श॥नृत्यतः नृत्यंकुर्वतः॥तथानादंचनृत्यंच॥तयोःसमाहारोनादनृत्तंतेनो
ल्लसितान्॥केचिन्नृत्यंकुर्वंतिअपरेतुनादंकुर्वतीत्यर्थः॥कःपुनरेषांभेदइतिचेत्शृणु॥वाक्यार्थाभिनयो
नाद्यं॥पदार्थाभिनयोनृत्यं॥यत्तुसर्वाभिनयवर्जितंगात्रविक्षेपमात्रंशास्त्रोक्तंगभूतभंगरूपंतन्नृत्तं॥स्पष्टंचे

गायंतंवीणयागीतंनृत्यंतंनारदंदिवि॥नृत्यतोनादनृत्तेनरंभादीनप्सरोगणान्॥४९॥
गायच्चित्ररथादीनांगंधर्वाणांकदंबकं॥कंबलाश्वतरौनागौनुकर्णकुंडलतांगतौ॥५०॥
गायंतौकंबलौगीतंकपालंकंबलंतथा॥एवंदेवसभांदृष्ट्वाकृतार्थोरघुनंदनः॥५१॥

षड्जातुवनिषुक्षीरस्वामीत्याह॥नृत्तंविवाहाभ्युदयेकादिविषयमंगविक्षेपमात्रं॥नाद्यंतुसर्वरसंपंचसंधि
चतुर्वृत्तिदशरूपकाश्रयंनटकर्मेति॥विस्तरोन्यत्र॥४९॥५०॥गायंताविति॥कपालंकंबलंचएतन्नामधेयौ
नागौददर्श॥५१॥ ॥इतिशिवगीताव्याख्यायांचतुर्थोध्यायः॥ ॥४॥ ॥शिवार्पणमस्तु॥ ॥
श्री

अथेति॥ अथ रामकृतप्रणामानंतरं तत्र तस्यां देवसमायां हिरण्मप्रचुरः हिरण्मयः दंडिनायनादिसूत्रेण निपातनात् साधुः॥ हिरण्मयश्चासौ रथश्च स प्रादुरभूत्॥ प्रादुर्भूतः॥ कीदृग्रथः॥ अनेकरत्नानां अंशुभिः किरणैः किर्मीरितः॥ चित्रवर्णीकृतं दिगंतरं येन तथाभूतः॥ चित्रं किर्मीरकल्माषशबलैताश्च कर्बुरे इत्यमरः॥ तत्करोति ण्यंतात्कर्मणि

स्तउवाच॥ अथ प्रादुरभूत्तत्र हिरण्मयरथो महान्॥ अनेकदिव्यरत्नांशुकिर्मीरितदिगंतरः॥१॥ नवोपांतिकपंकाढ्यमहाचक्रचतुष्टयः॥ मुक्तातोरणसंयुक्तश्वेतच्छत्रशतावृतः॥२॥ ४७

४७ क्तः॥१॥ नवेति॥ नवितुं स्तोतुं योग्यः नव्यः नव्येन स्तुत्येन हेम्ना उपांते प्रांते भवेन औपांतिकेन पंकेन कर्दमेन आढ्यं लिप्तं महतां चक्राणां चतुष्टयं यस्मिन् स तथोक्तः॥ चक्रप्रांतस्थः पंकोपि कस्तूर्यादिनोप्यति सुरभितया सुरंजितया परमश्च रसः॥ संनिधानविशेषवत्तया वस्तुतिं एयत्यर्थः॥ एवमुक्तो॥ अर्हैकत्वयहार्थेश्वचोयद्॥ मुक्तामयेन तोरणेन बहिर्द्वारेण संयुक्तः॥२॥

शुद्धेत्यादि॥ शुद्धं यद्धेमसुवर्णं तत्प्रचुराः खुराः तैराढ्या ये तुरंगगणाः तैः संयुक्तः॥ अत्राढ्यत्रादृस्य संबंधित्वेपि समासः उक्तं हि वाक्यप्रदीपे संबंधिशब्दः सापेक्षो नित्यं सर्वः समस्यते॥ वाक्यवत्सापेक्षास्य वृत्तौ न पिनहीयते इति॥ मुक्तेति॥ मुक्ताविताने मौक्तिकनिर्मितोल्लोचः॥ अस्त्री वितानमुल्लोच इत्यमरः॥ तेन विलसन् शोभमान ऊर्ध्वं ध्वजा

शुद्धहेमखुरैराढ्यतुरंगगणसंयुतः॥ मुक्तावितानविलसदूर्ध्वदिव्यवृषध्वजः॥३॥
मत्तवारणिकायुक्तः पंचतत्त्वोपशोभितः॥ पारिजातरुहत्पुष्पमालाभिरंजितः॥४॥

ग्रस्थितो दिव्यवृषो यस्मिन् एवंभूतो ध्वजो यस्य रथस्य स तथोक्तः॥३॥ मत्तेति॥ मत्ताभिर्वारणिकाभिर्हस्तिनीभिर्युक्तः॥ नवैय रत्ना पंचम्येण्यास्यत्वमिति॥ भागवतोक्तेः॥ पंचतत्त्वैः तदधिष्ठात्रीभिर्देवताभिरुपशोभितः॥ पारिजाततरूद्भूतानां पुष्पाणां मालाभिः अभिरंजितो भूषितः एवं ताकः॥४॥ विवायनमइति॥

मृगस्यनाभौसमुद्भूतोयःकस्तूरीरूपोमदःतेनमृगमदरूपयाकस्तूर्येतियावत्॥पंकिलःसंजातपंकःमृत्स्या
दिभवकस्तूर्य्यपर्सयोस्तुस्पर्शविशेषोसूचयितुंमृगनाभीतिविशेषणोपादानं॥५॥संवर्त्तेति॥प्रलयकालीनाये
घनास्तद्वत्महाघोषावाद्याः॥वीणादिस्वनोसक्तेनकिन्नरीगणेनसंकुलः॥६॥एवमिति॥तत्ररथेपद्मतल्पेस्थेपद्मयेभ्य
तारेणत्वांकरोद्भविनोदात्उपविष्टः॥७॥सुरेति॥नीलःकंठे॥लोहितःकेशेषु॥अतोनीललोहितइतिवेदभाष्यकाराः॥इयः॥८॥

मृगनाभिसमुद्भूतकस्तूरीमदपंकिलः॥कर्पूरागरुधूपोस्यगंधाकृष्टमधुव्रतः५
संवर्त्तघनघोषाढ्योनानावाद्यसमन्वितः॥वीणावेणुस्वनासक्तकिन्नरीगणसंकुलः६
एवंदृष्ट्वारथश्रेष्ठंवृषादुत्तीर्यशंकरः॥अंबयासहितस्तत्रपद्मतल्पेविशत्तदा॥७॥
सुरनारीजनैस्त्राणांश्वेतचामरचालनैः॥दिव्यमज्जनपातेश्चप्रहृष्टोनीललोहितः८
क्वणत्कंकणनिध्वानैर्मंजुमंजीरसिंजितैः॥वीणावेणुस्वनैर्गीतैःपूर्णमासीज्जगत्त्रयं॥९॥

क्वणदिति॥क्वणतांकंकणानांनिध्वानैःप्रतिशब्दैःतथामंजुभिर्मनोहरैःमंजीराणांनूपुराणांशिंजितैःशब्दैःपादांगदंतुला
कोटिर्मंजीरोनूपुरोस्त्रियामित्यमरः॥भूषणानांतुशिंजितमितिच॥अयंचतालव्यादिर्दंत्यादिः॥घोषयति
कि विशेषणादिदर्शनात्॥अतएवक्वणकारादीनांप्रकरणेबोपदेवोपदेवपंडितैःशिंजिधातुःपठितइतिदिक्॥९॥

शुकेति॥शुकवाकस्वरूपैश्चकरावाश्चयममधुराःशब्दास्तैःजगद्भूपंपूर्णमासेतिप्राक्तनेनान्वयः॥ध्वनौतुमधुरास्फुटेकल
इत्यमरः॥उन्निद्रेति॥उन्निद्राणांहर्षादुल्लसतांभूषापकेलिनांदर्शनादिवहेतोःबर्हिणोमयूराः॥कोटिसंख्ययाउपरिस्थितान्स्व
नेत्रात्मीयान्चंद्रइवचंद्रकास्तान्चंद्राकारान्मेचकापरपर्यायान्मंडलविशेषान्॥इत्येप्रतिथितिकनसम्प्रायइकेमेचक

शुकवाक्यकलारावैःश्वेतपारावतस्वनैः॥उन्निद्रभूषकालिनांदर्शनादिवबर्हिणः॥१०॥
प्रणमंततोराममुत्सृज्यवृषभध्वजः॥आनिनायरथंदिव्यंप्रहृष्टेनांतरात्मना॥११॥
कमंडलुजलैःस्वच्छैःस्वयमाचम्ययत्नतः॥समाचम्याथपुरतःस्वांकेराममुपानयत्१२

वित्यमरः॥दर्पितःसंतोनन्तुः॥१०॥११॥कमंडल्विति॥कमंडलुःकुंडिका॥अस्त्रीकमंडलुःकुंडीत्यमरः॥तस्यात
स्मिन्यास्थितैर्जलैःस्वयमाचम्यरामंचआचाम्यआचमनंकारयित्वानकस्यमिवमामितिमित्यनिषेधान्नकृत्यःस्वस्य
कोउत्संगेउत्संगचिह्नयोरंकइत्यमरः॥उपानयत्॥उपनीतवान्॥१२॥

अथेति।अथस्यांकेतुपयेन्द्रानानंतरंतस्मैरामायदिव्यंधनुः।तथाअक्षयंतूणीरं निषंगः महापाशुपतास्त्रंचददौ।।१३।।
किमुक्तंतदेवदर्शयति।।जगदिति।।रौद्रंरुद्रदेवताकंअतएवायंभीषणंसामान्यैःसाधारणैः अतिप्रबलैःसहसमरःसामान्य
समरः आदिशब्दात्प्रबलैरपिसह अल्पःकलहःतत्रेदंनप्रयोक्तव्यं।।१५।।अन्यदिति।।एतस्यपाशुपतास्त्रस्यप्रतिहन्यतेने
तिप्रतिघातंकुर्वीतत्साधनं।।उपसर्गस्यकी।तीतिदीर्घः।।अन्यत्पाशुपतास्त्रभिन्नंनास्ति।तस्मात्प्राणात्ययेतवोपस्थितेसं

अथदिव्यंधनुस्तस्मैददौतूणीरमक्षयं।।महापाशुपतंनामदिव्यमस्त्रंददौततः।।१३।।
उक्तश्चतेनरामोपिसादरंचंद्रमौलिना।।जगन्नाशकरंरौद्रमुग्रमस्त्रमिदंन्तप।।१४।।
अन्यन्नास्तिप्रतीघातमेतस्यभुवनत्रये।।तस्मात्प्राणात्ययेरामप्रयोक्तव्यमुपस्थिते।।१५
अन्यदैतत्प्रयुक्तंचजगत्संक्षयकृद्भवेत्।।१६।

भाविनिसतितत्प्रयोक्तव्यं।।विपक्षेबाधकमाह।।अन्यदेति।।चस्त्वर्थे।।अन्यदाबलवद्बाधकोपस्थितिकालभिन्नकाले
प्रयुक्तंतु एतत्पाशुपतास्त्रंजगत्संक्षयंकरोतीतितथाभूतंभवेत्।।१६।। ।। ।।द्वियायनमइति।। ।।

अथेति।।महानीश्वरोमहेश्वरः।।निरवधिकैश्वर्यशाली।।अतएवसुरश्रेष्ठानाहूयोवाच।।किमुवाचतदेवाहस्वस्वइति।।
हेदेवाःस्वंस्वंआत्मायआत्मीयंअस्त्रंप्रयच्छतददध्वंरामायत्रोषः।।१७।।एतेनभवदीयमेवमहादिष्टंसेत्स्यतीत्याह।।राघव
इति।।तैर्भवद्भिर्दत्तैरस्त्रैरस्त्रीसन्अयंराघवएवरावणंनिहनिष्यति।।ननुतद्धेतोरेवास्त्विति।।न्यायाहूयमेवस्यस्यास्त्रंत

अथाहूयसुरश्रेष्ठाल्लोकपालान्महेश्वरः।।उवाचपरमप्रीतःस्वंस्वमस्त्रंप्रयच्छत।।१७।।
राघवोयंचैतैरस्त्रैरावणंनिहनिष्यति।।तस्मैदेवैरवध्यत्वमितिदत्तोवरोमया।।१८।।
तस्माद्वानरतामेत्यभवंतोयुद्धदुर्मदाः।।साहाय्यमस्यकुर्वंतुतेनसुस्थाभविष्यथ।।१९।।

हनिष्यामइतिचेत्तत्राह।।तस्मादिति।।तस्मैरावणायदेवैरवध्यत्वमित्येवंरूपोवरोमयादत्तः।।नत्वन्येन।।अतोभवद्भिर्नायंह
न्तुंशक्यतइत्यर्थः।।ननुरावणेनसहयोद्धव्यमितिवयमप्याकांक्षामहे।।तत्कथमस्मदिष्टसिद्धिरत्राह।।तस्मादिति।।भवंतो
पियुद्धदुर्मदाःयुद्धोत्कंठाअपिवानरतामेत्यअस्यरामस्यसाहाय्यंकुर्वंतु।रावणवधेएतस्यैवमयादत्तोधिकारइत्यादितिभावः।।१९

रत्नेति॥रत्नीत्विसर्गः॥छांदसोल्पप्रु॥आङ्प्रश्लेषोवा॥२०॥धनंजयः अग्निः॥वीतिहोत्रोधनंजयइत्यमरः॥२१॥प्रभंजनोवायुः॥२२
ईशानः लोकपालविशेषः॥पाकचेकमिमि॥इदंचोत्तरेणविश्वेदेवाददुरित्यनेनसंबध्यते॥अथेति॥पूर्वोक्तदिव्यास्त्रलाभा
नंतरं॥व्यजिज्ञपत्॥विज्ञापितवान्॥लुङ्॥२५॥

तदाऽऽगात्क्षीरसागरस्यसुताप्रांजलयास्तदा॥प्रणम्यचरणौद्वौनेःस्वंस्वमस्त्रंददुर्मुदा॥२०॥
नारायणास्त्रंदैत्यारिरैंद्रमस्त्रंपुरंदरः॥ब्रह्मापिब्रह्मदंडास्त्रमाग्नेयास्त्रंधनंजयः॥२१॥
याम्यंयमोपिमोहास्त्रंरक्षोराजस्तथाददौ॥वरुणोवारुणंप्रादाद्वायव्यास्त्रंप्रभंजनः॥२२॥
५० कौबेरंचकुबेरोपिरौद्रमीशानएवच॥सौरमस्त्रंददौसूरःसौम्यंसोमश्चपावकं॥२३॥विश्वेदेवाद ५०
दौतस्मैवसवोवासवाभिधं॥२४॥अथतुष्टःप्रणम्येंद्रंरामोदशरथात्मजः॥प्रांजलिःप्रयतोभूत्वान
किंचुक्तोव्यजिज्ञपत्॥२५॥

विज्ञापनाप्रकारमाह॥भगवन्निति त्रिभिः॥मानुषैरेवेति॥एवकारोयसैर्वैरपिमनुष्यैरित्यर्थः॥किंच॥नोल्लंघ्यः लंघयितुंश
क्योनत्यर्थः॥किंच॥तत्रदुर्गमस्ति॥तदपितद्दुर्गांतरस्याधारं किंमुदेवदानवैरपिदुर्जयं॥२६॥तत्रापिसंरक्षकानमनु
ष्यादयः येनजीयेरन्निस्याह॥अनेकेति॥ननुएकत्वाद्वृत्तस्यनित्यैकवचनांततयानसमासस्यचान्यपदार्थप्राधान्ये

भगवन्मानुषैरेवनोल्लंघ्योरावणांबुधिः॥तत्रलंकाभिधंदुर्गंदुर्जयंदेवदानवैः॥२६॥
अनेककोटयस्तत्रराक्षसाबलवत्तराः॥सर्वेस्वाध्यायनिरताःशिवभक्ताजितेंद्रियाः॥२७

तिमहाभाष्यादौस्थापितत्वेनअनेकत्वाद्वृत्तेपिनित्यैकवचनांतः॥अतएवसत्नकारःप्रायुंक्त अनेकमन्यपदार्थइति॥अ
नेकमाधेपि॥सेव्यतेनैकयासन्नतापांगयेतिप्रायुक्तं॥तत्कथंकोटयइत्यनेनसामान्याधिकरण्यमितिचेत्॥अनेक
त्वाद्वृत्तानामेवबहूनामेकत्वात्तदुपपत्तेः॥स्फुटंचेतत्कैयटीयमहाविवरणादौ॥एतेनपरात्यनेकेरिवोर्मयइतिमाघेपिव्या
ख्यातःस्यादेतत्॥तथापिकोटित्वाद्वृत्तस्यबहुवचनांतत्वमनुपपन्नंविंशत्याद्याःसदैकत्वसर्वाःसंख्येयसंख्ययोः॥संख्यार्थेद्विब
हुत्वेस्तासुचावनतेस्त्रियइत्यमरसिंहेनसंख्येयपरतायामेकवचनस्यनियमितत्वादितिचेन्न॥एकांतसंख्यावृत्तिमात्र
एवैकवचनमेवेतिहितदर्थः॥ननुसंख्याव्यक्तिबहुत्वेप्येकवचनमिति॥तथान्योदाहृतममरस्योदाराईमप्येवंव्याख्येयं॥सं

ख्यारूपयोर्योर्थस्तादृशद्वित्वबहुत्वेसंख्यापरतायां॥ संख्येयपरतायांवोभयथापिस्त:॥ द्विवचनबहुवचनप्रवचनप्रवर्त्तकोन
घटात्पटेति॥ अत्रएवपूर्वार्द्धसंख्याग्रहणस्यापिसार्थक्यं॥ इदमेवाभिसंधायमुरारि:प्रायुंक्त॥ एकद्वित्रिचतु:क्रमेणनामे

अनेकमायासंयुक्ताबुद्धिमंतोग्निहोत्रिण:॥ कथमेकाकिनाजेयामयाभ्राताचसंयुगे॥२८
महाद्भुत० रावणस्यवधेरामरक्षसामपिमारणे॥ विचारोनत्वयाकार्यस्तस्यकालोयमागत:॥२९
अधर्मेतुप्रवृत्तास्तेदेवब्राह्मणपीडने॥ तस्मादायु:क्षयंयातितेषांश्रीरपिसुव्रत॥३०॥
राजस्त्रीलंघनासक्तोरावणंनिहनिष्यसि॥ पापासक्तोरिपुर्जेतुंसुकर:संगरांगणे॥३१॥
अधर्मनिरत:शत्रुर्भाग्येनैवहिलभ्यते॥३१॥ अधीतवेदशास्त्रोपिसदाधर्मरतोपिवा॥ विनो
शकालेसंप्राप्तेधर्ममार्गाच्च्युतोभवेत्॥३२॥

षाम्विवास्तायतांकुर्वाणामसफोचयद्भ्रातानांभोजसंवर्गिका॥ न्हवेपिक्रमशत्रा:प्रसारयितिता:संप्रत्यस्तमुपता:संख्यानु
सुफुल्लकलेवनलिनीभानो:सहस्रांकरानिति॥ महाद्भुतश्लोकार्थ:॥३०॥ राजस्त्रीसीता॥ पानासक्त:मदिरापानासक्त:॥३१॥ ॥

पीड्यंतइति॥ येनदेवब्राह्मणादय:पीड्यंतेतस्यनाशा:स्वयमेवभवदादिप्रयत्नंविनैवस्थित:॥ नाशकस्यइत्यर्थ:॥३३॥
किष्किंधेति॥ किंकिंदधातीतिकिष्किंधा॥ अनेकाद्भुतशालीनित्ययवयवार्थ:॥ योगरूढश्चायंशब्द:॥ पारस्करादिगणेनि
पातित:॥ किष्किंधाख्येनगरेबहवोवानरराजास्तेदेवांशोपबृंहिता:॥ तवसाहाय्यंकरिष्यंति॥ तैरेवसहायभूतै:पयोनिधिं

पीड्यंतेदेवता:सर्वा:सततंयेनपापिना॥ ब्राह्मणाऋषयश्चैवतस्यनाशा:स्वयंस्थित:॥३३॥
किष्किंधानगरेरामदेवानामंशसंभवा:॥ वानराबहवोजातादुर्जयाबलवत्तरा:॥३४॥ ॥
साहाय्यंतेकरिष्यंतितैर्बधानपयोनिधिं॥ अनेकशैलसंबद्धसेतौयांतुबलीमुखा:३५

बधान॥ समुद्रबंधनंकुर्वित्यर्थ:॥ हल:श्न:शानज्झाविति श्नाश्नादेश:॥ तत:अनेकै:शैलै:सम्यग्बद्धेसेतौबली
मुखा:मर्कटा:॥ बलीमुखेयेषांतेइतिविग्रह:॥ कपिप्लवंगप्लवगशाखामृगवलीमुखाइत्यमर:॥ यांतुगच्छंतु॥३५॥

दुर्जनेषु महास्त्रं न प्रयोक्तव्यमिति प्रागुक्तमेवार्थं दाढ्यार्थं स्मारयति ॥ नास्त्रैरिति ॥ ३७ ॥ चिंतां न कार्येति समाश्वासयन्

रावणं संगरे हत्वा तामानय निजप्रियां ॥ नास्त्रैर्युद्धे जयो यत्र तत्रास्त्राणि न योजयेत् ॥ शस्त्राणि मुंच दिव्यानि स्वयमेव विनंक्ष्यति ॥ ३६ ॥ अथवा किं बहूक्तेन मयैवोत्पादितं जगत् ॥ मयैव पाल्यते नित्यं मया संह्रियतेपि च ॥ ३७ ॥ अहमेको जगन्मृत्युः मृत्योरपि महीपते ॥ ग्रसेयमेव सकलं जगदेतच्चराचरं ॥ ३८ ॥ मम वक्त्रगताः सर्वे राक्षसा युद्धदुर्मदाः ॥ निमित्तमात्रं त्वं भूयाः कीर्तिमाप्स्यसि संगरे ॥ ३९ ॥ ॥ इति श्रीपद्मपुराणे शिवगीतासूपनिषत्सु दिव्यास्त्रप्राप्तिर्नाम पंचमोध्यायः ॥ ५ ॥ ॥ ॥ शिवार्पणमस्तु ॥ ५२

५२

पसंहरति ॥ अथवेति ॥ त्रिभिः स्पष्टोर्थः ॥ अत्र चराचरग्रहणादित्याद्यधिकरणेषु सिमेतत् ३९ ॥ ॥ इति श्रीपद्मपुराणे शिवगीतासूपनिषत्सु दिव्यास्त्रप्राप्तिर्नाम पंचमोध्यायः ॥ ५ ॥

DR. BHAU DAJI MEMORIAL
डाक्टर भाऊ दाजी स्मारक

भगवन्निति ॥ हे भगवन् ॥ अथ सृष्टिस्थितिसंहाराणामहमेव कर्तेत्येवंरूपे त्वदुक्तेर्थे मे मम महच्चित्रं प्रजायते विस्मयोद्भुतमाश्चर्यं चित्रमपीत्यमरः ॥ आश्चर्यबीजमाह ॥ शुद्धेत्यादिना ॥ मूर्तिः समुच्छ्रितः महाभाग्यशालिनि यावत् ॥ मूर्छा धातोः समुच्छ्रायवाचकात् क्तः इति ॥ राल्लोपः इति छलोपः वोरुपधाया इति दीर्घः ॥ आदितश्चेति नेट् ॥

श्रीराम उ० ॥ भगवन्नत्र मे चित्रं महदेतत्प्रजायते ॥ शुद्धस्फटिकसंकाशस्त्रिनेत्रश्चंद्रशेखरः ॥ १ ॥ मूर्तस्त्वं तु परिछिन्नाकृतिः पुरुषरूपधृक् ॥ अंबया सहितोत्रैव रमसे प्रमथैः सह २

परिछिन्नाकृतिः शरीरं यस्य सः पुरुषरूपधारी च त्वं पार्वत्या सहितः सन्नत्रैव रमसे अत्र पुरुषरूपेण धृष्णो तीति प्रगल्भते इति पुरुषरूपधृक् ॥ ञि धृषा प्रागल्भ्ये ॥ ऋत्विगस्योयस्मादिति वकुवीत्याश्च यणद्धगतीच निपातनात् कुत्वं ॥ तथा च धृषो धषद् इत्यादिरूपं बोध्यं ॥ धृज गतावित्ति ॥ न्यादि ॥ तस्मात् धृजतीति धृक् इति क्विपि धृजो धनद् इत्यादि बोध्यं ॥ पुरुषरूपं गच्छति प्राप्नोतीति चास्मिन्पक्षेर्थः ॥ २ ॥ ॥ ॥ शिवाय नमः ॥

त्वंकथमिति॥एवंभूतस्त्वंपंचभूतान्यादिर्यस्यतथाभूतंचराचरंकृत्स्नमेतज्जगत्कथंकरोषिपालयसिहंसिवा
इतिशेषः॥सर्वात्मकत्वंतुनाक्षिप्यते॥तस्यपूर्वाध्यायेशेषेणावतारणात्॥तथाव्याख्यायांसप्तमाध्यायप्रथ
मभागेनसहविरोधाच्च॥तत्रहीत्वंवक्ष्यति॥भगवन्यन्मयापृष्टंतत्कथंवस्थितंविभो॥परिच्छिन्नपरीणामेदं

त्वंकथंपंचभूतादिजगदेतच्चराचरं॥तद्ब्रूहिगिरिजाकांतमय्यतेनुग्रहोयदि॥३॥श्री
भगवानुवाच॰शृणुराममहाभागदुर्ज्ञेयममरैरपि॥तत्प्रवक्ष्यामियत्नेनब्रह्मचर्ये
णसुव्रत॥पारंयास्यस्यनायासाधनसंसारवारिधेः॥४॥ ॥श्रीवायनमः॥

हेभगवतस्तावदुत्पत्तिःपंचभूतानांस्थितिर्वाविलयःकथमिति॥तथाचपूर्वपक्षस्यायमाशयः॥कुलालादे
र्घटकर्तुरिवदेहांतरीयकार्यासाधारीरतदवयवतत्संयोगादिषुचकर्तृत्वासंभवात्॥अपिचभोगासक्तस्यच
स्थित्यादिजनकत्वं॥एवंपालकत्वेसंहारकत्वेचानुपपत्तिरिति॥शृणुरामेति॥हेसुव्रतरामयत्नेनब्रह्मचर्येण
चशृणु॥यतोदुर्ज्ञेयंप्रवक्ष्यामियेनज्ञानेनसताअनायासात्संसारसागरस्यपारंयास्यसीतिसंबंधः॥४॥ ॥

कुलालादेर्घटादिकर्तृत्वंअहंकारोपाधिकंशरीरादिसापेक्षंच॥अतोव्यवहितविप्रकृष्टादिकर्तृकुलालादि
तःप्रभवतीतियुक्तंममजगत्कर्तृत्वंतुनाहंकारवृत्तिसापेक्षं॥किंतुस्वरूपज्ञानेनैवकल्पितभेदेन॥निर्वात्य
हेमायाहृत्सावयभयथापिशरीरापेक्षातत्रनास्तितथाचकर्तृभूतास्यमायोपहितबिंबचैतन्यात्मनोम

दृश्यंतेपंचभूतानियेचलोकाश्चतुर्दश॥समुद्राःपर्वतादेवासुराऋषयस्तथा५
दृश्यंतेयानिचान्यानिस्थावराणिचराणिच॥गंधर्वाःप्रमथानागाःसर्वेतमद्विभूतयः६

मसकलप्रपंचेनसहाव्यवधानमेव॥उपादानमपिचैतन्यंवामायायासमष्टिर्वाविति पक्षत्रयेपितेनस
हप्रपंचस्याविप्रकर्षोस्तिलीलाविग्रहस्यतुपरिच्छिन्नत्वेपिकर्तृत्वंनानुपयोगित्वकल्पितादोषइतिअभिसंधा
यसर्वप्रपंचोमद्विवर्तमात्रमित्याह॥दृश्यंतेइत्यादिना॥पंचभूतानिसमुद्राइत्यादीनियानिवस्तूनि
दृश्यंतेसर्वेपितेपदार्थामद्विभूतयएव॥ननुस्वतंत्राः॥६॥ ॥ ॥श्रीवायनमः॥ ॥

इममेवार्थंप्राक्तनकथोपन्यासेनदृढयति॥आकृतिमिति॥लीलाविग्रहविशेषमित्यर्थः॥७॥कृत्वेति॥
मांस्कृत्वाप्रांजलयःसंतस्तस्थैवपुरतःस्थिताः॥लीलाविग्रहएवपरमार्थभूतोइतिबुध्यापरिछिन्नस्यैवध्या

पुराब्रह्मादयोदेवाद्रष्टुकामाममाकृतिं॥मंदरंप्रययुःसर्वेममप्रियतरंगिरिं॥७॥कृत्वाप्रां
जलयोदेवामांतत्पुरतस्थिताः॥८॥तांदृष्ट्वाथमयादेवान्लीलाकुलितचेतसः॥तेषामपहृ
तंज्ञानंब्रह्मादीनांदिवौकसान्॥९॥

५४

नेआसक्ताइत्यर्थः॥८॥तानिति॥लीलाकुलितंलीलाविग्रहमात्रेपरिनिष्ठितंचेतोयेषांतथाभूतान्देवान्
दृष्ट्वामयातेषांज्ञानंसगुणेपारमार्थिकमुत्कृष्टंचेदमितितदपहृतं॥प्रश्नावतारणद्वारैवकंपरमंतत्वमुप
दिश्यसंसाराब्धेःतानुद्धरिष्यामीत्याशयेनप्रश्नप्रयोजकीभूतोसंभ्रमादिर्मयातेषांसंपादितमितिभावः॥९॥

५४

देवाः॥अज्ञानात्॥अज्ञानंप्राप्यल्यब्लोपेकर्मणिपंचमी॥आसन्॥अतिष्ठन्॥असभुविइतिधातोर्लङ्॥मांभवान्कइतिसह
दाहुः॥पप्रच्छुरित्यर्थः॥आहेलट्प्रतिरूपकोनिपातोयं॥अथप्रश्नानंतरंअहंदेवानब्रुवंउक्तवान्॥पुराभवःपुरातनः॥अहमे
व॥१०॥ननुपूर्वमस्माकमनादयइतिशास्त्रकारणानुरोधः॥तथाचाहमेवपुरातनइत्यवधारणमसंगतमित्याशंक्यप्रकृ

आसन्तेसहदज्ञानान्मामाहुःकोभवानिति॥अथाब्रुवमहंदेवानहमेवपुरातनः॥१०॥
आसंप्रथममेवाहंवर्त्तामिचसुरेश्वराः॥भविष्यामिचलोकेस्मिन्मत्तोनान्योस्तिकश्चन॥११॥

मेवस्योपपत्तिमाह॥आसमिति॥प्रथममहमेवासंअहमेवचेदानींवर्ते॥अग्रेहमेवभविष्यामिस्थास्यामीत्यर्थः॥मत्तोन
अविद्यातत्संबंधादिःकश्चनकोपिनसन्पारमार्थिकोनेत्यर्थः॥तथान्यमिथ्याभूतानामविद्यादीनांअधिष्ठानेनत्रैकालिक
निधनस्यसंभवादहमेवेत्यवधारणबलेनप्रतीयमानइतरव्यवच्छेदोनासंगतइत्यर्थः॥अत्रवर्त्तइतिवक्तव्येपरस्मैपद
प्रयोगआर्षः॥श्रुतिरस्यानुकरणंच॥तथाचश्रुतिः॥तेदेवारुद्रमपृच्छन्॥कोभवानिति॥सोब्रवीत्॥अहमेकःप्रथममा
संवर्त्तामिचभविष्यामिचेत्यादिः॥११॥

व्यतिरिक्तं चेति॥ इयमुक्तोप्यर्थोऽत्र पुनरभ्यस्यते॥ तात्पर्यनिर्णयाय॥ अभ्यासो हि तात्पर्यलिंगं॥ तथा च छांदोग्ये तत्त्वमसीति नवकृत्व
भ्यस्तमुक्तं च भामत्यां॥ अभ्यासो हि भूयस्त्वमर्थस्य भणति॥ नात्यंतमपि प्रागेवोपचरितार्थत्वमिति॥ हे सुरेश्वराः॥ अन्य
पि अवि॰ द्यादिभ्यो भिन्नमपि घटपटादिकं यत्किंचिद्दृश्यते तन्मत्तोऽतिरिक्तं नास्ति॥ किंतु मय्यध्यस्तत्वान्मत्तादात्म्यापन्नमेवे

व्यतिरिक्तं च मत्तोऽस्ति नान्यत्किंचित्सुरेश्वराः॥ नित्योऽनित्योऽहमनघो ब्रह्मणां ब्रह्मणः पतिः॥१२॥

५५ त्यर्थः॥ तादात्म्यं च घटः सन्नित्यादिसामानाधिकरण्यप्रतीतिनिर्वाहकः कश्चिद्दाविधको धर्मः॥ नचैवमनंतपदार्थस्य ५५
कारगौरवं॥ व्यक्तीयत्तावैकोऽविकादिभिरपि दुर्वचत्वाद्धि नाजकोपाधिप्रत्ययानुसिद्धांतेपि सुलभाद्धिज्ञउत्याऽभ्यां विजननात्
॥ उक्तं सर्वतादात्म्यमेव विवृणोति॥ नित्य इति॥ नित्योऽहं॥ स्वरूपेण॥ अनित्योऽहं॥ घटाद्यनित्यतादात्म्यात्॥ अनघः कालत्रया
बाध्यः॥ ब्रह्मणां वेदानां ब्रह्मणो हिरण्यगर्भस्य च पतिर्नियंता॥ ईषद्भेदस्यापि सत्वात्॥१२॥ ॥न्नीवायनमः॥

दक्षिणस्यामंचतीति दक्षिणांचः॥ दक्षिणदिक्स्थाः पदार्थाः॥ उत उत्तरस्यामंचतीत्युदंचः॥ प्रपूर्वस्यामंचतीति प्रांचः
॥ प्रतिपश्चिमायामंचतीति प्रत्यंच॥ अधरस्यां दूत्यंचः॥ पूर्वाधराणामसिपुरधवश्चैषामिति सावधुः॥ विदिशः॥ दिशो मध्य
दक्षिणपूर्वादिः॥१३॥ सावित्रीति॥ तदाह व्यासः॥ गायत्री प्रोच्यते यस्मात्सविता देवता यस्यां सा सावित्री गायतीति गायन्तं जपक

दक्षिणांच उदंचोहं प्रांचः प्रत्यंच एव च॥ अधश्चोर्ध्वं च विदिशो दिशश्चाहं सुरेश्वराः॥१३॥
सावित्री चापि गायत्री स्त्री पुमान्नपुमानपि॥ त्रिष्टुब्जगत्यनुष्टुप्च पंक्तिश्छंदस्त्रयीमयः॥१४॥

र्तारं त्रायते इति गायत्री॥ तदाह व्यासः॥ गीयते प्रोच्यते यस्माद्गायंतं त्रायते ततः॥ सवितृद्योतनात्सैव सावित्री परिकीर्तिता॥
एकस्यैव मंत्रस्य कालविशेषोपाधिकभेदाद्द्वयगुपादानं॥ तथा च व्यासः॥ गायत्री नाम पूर्वाह्णे सावित्री मध्यमे दिन इति
॥ अपुमानपि॥ नपुंसकमित्यर्थः॥ त्रिष्टुबिति॥ यस्या एकादशाक्षरः पादः॥ जगतीति॥ यस्या द्वादशाक्षरः पादः॥ अनुष्टुबि
ति॥ यस्या अष्टाक्षरः पादः॥ पंक्तिश्छंद इति॥ पंचानां संघः पंचत् दौ पंचतो इति पंक्तिः॥ पंक्तिविंशतेत्यादिति॥ पाणिनीसू
त्रे निपातनात्साधुः॥ दशाक्षरघटितपादशालित्वात्पंक्तिश्छंद इत्युच्यते॥१४॥ ॥न्नीवायनम इति॥

गुरोःकर्मगौरवंअध्यापनादि॥१५॥अतिशयेनवृद्धोवर्षिष्ठः॥प्रियस्थिरेत्यादिनावृद्धस्यवर्षादेशः॥अपांपतिःसमुद्रः॥ननु
वरुणः॥तस्यपृथग्वक्ष्यमाणत्वात्॥आदिःपूर्वोरुकस्यतेजसआदित्यायुरित्यर्थः॥१६॥अथर्वणोङ्गिरसश्चमन्त्रः॥चतुर्थोवेदः
इतिहासोमहाभारतादिः॥पुराणानिब्राह्म्यादीनि॥कल्पयतिबोधयतिप्रयोगमितिकल्पः॥तदाकुर्मरपादःसिद्धरूपः॥प्र

सत्योहंसर्वतःश्रांतःस्वेताग्निर्गौरवंगुरुः॥गौर्यहंगह्वरश्चाहंघोरहंजगतांविभुः॥१५॥ज्येष्ठःसर्वस्य
श्रेष्ठोवर्षिष्ठोहमपांपतिः॥अर्योहंभगवानीशस्तेजोहंचादिरप्यहं॥१६॥ऋग्वेदोहंयजुर्वेदःसा
मवेदोमहात्मभृः॥अथर्वणश्चमंत्रोहंतथाचांगिरसोवरः॥१७॥इतिहासपुराणानिकल्पोहंक
ल्पवाहनं॥नाराशंसीचगाथाहंविद्योपनिषदोस्म्यहं॥१८॥ ॥ श्रीबायनमः॥

५६ योगोयैःकर्मणांप्रयुज्यते॥तेनकल्पालक्षणानिधर्मसूत्राणीतिप्रवक्ष्यंतइतिकल्पवान्॥तद्वयकाभासवान्॥नरैर्मनु ५६
ष्यैःसमंतात्छंस्यतेइतिनराशंसोरुद्रःतस्येयंनाराशंसीगाथारुद्रप्रतिपादकोयंथविशेषः॥विज्ञानेश्वरआह॥नाराशं
सी॥रुद्रदेवत्यामंत्रः॥गाथातुयज्ञगाथेंद्रगाथादिकेति॥उपनिषदोविद्या॥उपनिषद्रूपाविद्येत्यर्थः॥उपनिषच्छब्दःस

॥

त्सूहिषेतिक्विप्॥उपसमीपेस्थित्वाहृदयमारुह्येतियावत्॥निषादयतिनिश्रेणींकरोति॥अविद्यामित्युपनिषत्॥अंतर्भा
वितोण्यर्थः॥वार्तिककारास्तु॥उपनीयप्रमातारंब्रह्मणस्त्वाह्वयंयतः॥निहंत्यविद्यांतज्जंचतस्मादुपनिषद्भवेदित्याहुः॥१८॥श्लो
काइति॥श्लोकाःप्राणुक्तेषुपुराणादिष्वनंतर्भूताः॥गोवलीवर्दन्यायात्॥सूत्राणिब्रह्मसूत्रादीनि॥अनुव्याख्यानंतस्ये
दमनुव्याख्यानंनवनीतकल्पकम्पवेदेष्वेवकृतं॥व्याख्यानानि॥इतरत्रकृतानिविद्याः॥पूर्वोक्तास्वनंतर्भूताअपिगां॥

श्लोकाःसूत्राणिचैवाहमनुव्याख्यानमेवच॥व्याख्यानानितथाविद्याइष्टंहुतमथाहुतिः॥१९

रि विद्याः॥यद्यपिबृहदारण्यकव्याख्यायांपुराणादिवाक्यान्यपिवैदिकदेवविशेषपरतयैवनीतास्तथापिअस्यमहतो
भूतस्येत्यकपक्रमानुसारात्तत्रतथैवयुक्तं॥इहतुरुद्रैपरित्यागेप्रमाणाभावाद्व्याख्यानमेवसाधु॥इष्टंयागः॥
हुतंहोमः॥आहूयतइत्याहुतिर्होमद्रव्यम्॥१९॥ ॥

दत्तइति॥दत्तोदानकर्म॥भूतोगयादिः॥दत्तंदानं॥लोकः इहलोकइत्यर्थः॥वदिश्चाहमित्यादि यद्यपिदक्षिणांचइत्यादिनाउक्तं॥पुनरुक्तं॥तथापिप्रागुक्तमित्यातात्यमसीतिनचरुक्तत्वाभ्यासवदेवनेयं॥तथाचाहुर्भाष्यकाराः॥पूर्वमीमांसायां नपुनरुक्ततामहान्दोषोवक्तुकत्वेपिहिपथ्यवद्दितव्यमिति॥एतदेवास्मिन्प्रकरणेप्रताप्यमानेषुपौनरुक्त्येषुसमा॥

दत्तोदत्ताहंलोकःपरलोकोमहत्परं॥वदिश्चाहंतथाचांतःपुरस्तादहमव्ययः॥२०॥

५७

धानंमंतव्यं॥इयंचसिद्धस्यगतिरुच्यते॥अतोनातिप्रतिसंगत्यायादनीयः॥अतएववाजसनेयिनांउषस्तकहोल ब्राह्मणयोःपठ्यमानंयत्साक्षादपरोक्षाद्ब्रह्मयआत्मासर्वांतरइतिवाक्यंव्याकुर्वद्भिर्भाष्यकारादिभिरित्ययम वनिर्णीतं॥तथाच॥व्याससूत्रमपि॥अंतराभूतग्रामवत्स्वात्मनः॥अन्यथाभेदानुपपत्तिरितिचेत्नोपदेशां तरवदिति॥२०॥

तन्मात्राणीति॥अपंचीकृतपंचभूतानीत्यर्थः॥विषयाणि विषयत्वेनाख्यायमानानिवस्तूनि॥यद्यपिविषयशब्दो नित्यपुल्लिंगस्तथापितदाचद्युच्छद्इतिरिजंतात्कर्मणिएरचिसमोज्ञेयं॥एरजंतएकानामनित्यस्यभाष्यकारैरनादृतत्वात्॥नयेवमपि

ज्योतिश्चाहंतमश्चाहंतन्मात्राणींद्रियाण्यहं॥बुद्धिश्चाहमहंकारोविषयाण्यहमेवहि॥२१॥
ब्रह्माविष्णुर्महेशोहमुमास्कंदोविनायकः॥इंद्रोग्निश्चयमश्चाहंनिर्ऋतिर्वरुणोनिलः॥२२॥
कुबेरोहंतथागणोभूर्भुवःस्वर्महर्जनः॥तपःसत्यंचपृथ्वीचापस्तेजोनिलोस्म्यहं॥२३॥
आकाशोहंरविःसोमोनक्षत्राणिग्रहाण्यहं॥प्राणकालस्तथामृत्युरमृतंभूतमप्यहं॥२४॥

अजंतत्वात्तस्यापत्तिः॥नावेद्यन्जपाःपुंसीतिसिद्धत्वात्॥उक्तयकर्मार्थस्यदर्शितत्वात्॥एतद्यसंबंधमनुवर्तिष्यतइतिमहाभाष्यकारा यस्यैकैयटादिभिःस्फुटीकृतमितिदिक्॥२१।२२।२३॥ग्रहाणीति॥ग्रहइत्याख्यायमानानिवस्तूनीत्यर्थः॥विषयाणीत्यस्यव्याख्यानेनव्याख्यानमेतत् ॥२४॥

Dr. BHAU DAUJI MEMORIAL
डाक्तर भाऊदाजी स्मारक

ओमादाविति॥ सदाजपतांगायत्रींजपंकुर्वतांमुनीनांबुध्येतिशेषः। आदौपठ्यमानःॐकारःअहमेवः मध्येपठ्यमानंभूर्भुवःस्वरि
त्येतदप्यहमेव॥ तदनंतरंयत्पठ्यतेगायत्रीत्रिपदावाक्यंतदपितथैव॥ अहमेवेत्यर्थः॥ शीर्षंचओमापइत्यादिअहमेव। यतोहंकिंभू
रूपइतिस्वरूपात्मिकयास्फूर्त्याभासयतीतिविश्वरूपः। तथाचसर्वात्मकतादार्ढ्यार्थमेवअसाधारणस्यवाचकेनकतिप

भव्यंभविष्यत्कृतंचविश्वंसर्वात्मकोप्यहं॥ ओमादौचतथामध्येभूर्भुवःस्वस्तथैवच॥२५॥ ॥
ततोहंविश्वरूपोस्मिशीर्षंचपतांसदा॥ असितंपाचितंचाहंकृतंचाकृतमप्यहं॥ परंचैवापरंचाह
महंसर्वपरायणः॥२६॥ अहंजगद्धितंदिव्यमक्षरंसूक्ष्ममव्ययं॥ प्राजापत्यंपवित्रंचसौम्यमग्राह्यमग्रियं२७

यपदार्थतादात्म्यंप्रतिपाद्यतइत्यर्थः॥२६॥ अक्षरमिति॥ नक्षरतीत्यक्षरं॥ अश्नुतेव्याप्नोतीतिवाअक्षरं॥ तदुक्तंमहाभाष्ये॥ न
क्षरत्यक्षरंविद्यादश्नोतेर्वासरोक्षरमिति॥ तथाचव्याससूत्रेअक्षरमंबरांतधृतेरित्यस्मिन्नेतस्यैवाक्षरस्यैवविश्वकृतित्वमक्षरप
रंब्रह्मपरतयानिर्णीतंप्राजापत्यंप्रजापतिदेवताकंतथासौम्यंसोमदेवताकं॥२७॥ ॥ शिवायनमः॥ ॥

अग्राह्यंदुरवगाहार्थंअग्रेभवंअग्रियंश्रेष्ठतमंइदंगुणोपेतं। पवित्रंपूयतेऽनेनेतिव्युत्पत्त्यापापक्षयकरंसूक्तं॥ तत्रप्रा
जापत्यंहिरण्यगर्भइत्यादिप्रसिद्धंसौम्यंतुऋग्वेदसंहितायांनवमंडलं॥ तत्सर्वमहमेवेत्यन्वयः॥ अत्रप्राजापत्यत्वाद्वृद्धि
त्यदितीत्यानारापः। सौम्यत्वाद्वैसोमाद्यण॥ अग्रियत्वाद्वाअग्राह्यत्व॥ छंदोच्चितियच्च॥ पवित्रत्वाद्वैवपुःसंक्रांतरयंति

अहमेवोपसंहर्तामहाग्रासौजसांनिधिः॥ हृदयंदेवतात्वेनप्राणत्वेनप्रतिष्ठितः॥२८॥ ॥

तात्प्रत्ययः॥२७॥ महांतोनगसागरादयोग्रास्यंतइतिग्रासाः। भक्ष्याणिषांतानिमहाग्रासानितादृशानिचतानिओजां
सिचप्रलयानलादीनितेषांनिधिरधिष्ठानंउपसंहर्तासंहारकश्चाहमेव॥ हृदयंसर्वप्राणिनामंतःकरणं॥ तत्र
देवतात्वप्राणत्वाभ्यांप्रतिष्ठितश्चाहमेव॥२८॥ ॥ शिवायनमः॥ ॥ ॥

विराट्रूपोप्यहमेवप्रणवात्मकश्चेत्याह शिरश्चेति॥यस्यममन्तरतः।उत्तरस्यांदिशिवर्त्तमानाःसर्वपदार्था
शिरः॥तथादक्षिणदिक्स्थाःपदार्थाःसर्वेपादौचरणौयस्यअवशिष्टःसर्वोपिप्रपंचश्चांतरःमध्यभागःसाक्षा
दोंकारःकीदृशःॐकारःतिस्रोमात्रायस्यसःत्रिमात्रकः।पूर्वंशिरश्चरणौमध्यंचेतिसकलप्रपंचस्यत्रैकं यो

शिरश्चोत्तरतोयस्यपादौदक्षिणतस्तथा॥यस्यसर्वान्तरःसाक्षादोंकारोहंत्रिमात्रकः॥२९॥
ऊर्ध्वमुन्नामयेयस्मादधश्चापनयामथ।तस्मादोंकारएवाहमेकोनित्यःसनातनः॥३०॥

ऽयनंकृतं॥तत्रैवत्रितयेमात्रामयेयस्मादधश्चापनयाम्यथ।त्रितयमितिबुद्धिंकृत्वाप्रणवाभेदेनाहंउपास्यइत्यर्थः।
२८ॐकारःअकारस्यउकारस्यचकल्पनायांअक्षरसाम्येनार्थंनिर्वक्ति॥ऊर्ध्वंस्वर्गादिकंप्रतिउन्नामयेन
यामि॥यस्मादेवंतस्मादुकारःअत्रह्रस्वदीर्घयोरुवर्णयोःसवर्णदीर्घयोर्बोध्यः॥अथपुण्यक्षीणसतिअधःअ
पनयामिच।यस्मादेवंतस्मादाकारः॥अत्रह्रस्वयोरवर्णयोरवर्णयोःसवर्णदीर्घः।तथाचआकारादुकारपरेआद्गुणइत्योकारः

एवंरूपःसन्नम्यतेगम्यतेइतिॐम्॥अनुगतावित्यस्माद्धिच्॥इदंचाक्षरसाम्येननिर्वचनंवैयाकरणानामपि
संमतं॥तथाकात्यायनः॥नाचधातुजमाहनिरुक्तेव्याकरणेशकटस्यचतोकमित्यादि॥निरुक्तकारश्चाह।अथाक्ष
रसाम्यान्निर्ब्रूयादिति॥त्रिमात्रत्वंचप्रातिशाख्यादौवैकल्पिकयोकमितिदिक्॥३०॥तदेवमोंकारोनिर्वचनपूर्वकंस्त
स्मिन्योजितः॥एवमन्यपियेऽपाद्यस्मात्तायनकतिपयानांनिर्वचनंप्रदर्शयति॥ऋचइति॥सोहंतेनहेतुनाप्रणवोमतः॥

ऋचोयजूंषिसामानियोब्रह्मायज्ञकर्मणि॥प्रणामयेब्राह्मणेभ्यस्तेनाहंप्रणवोमतः॥३१॥

स॥ऋ॥सोहंब्रह्माख्यऋत्विग्विशेषतःसन्यज्ञकर्मणिब्राह्मणेभ्यःहोतृप्रभृतिभ्योपध्यायोम्यंऋचःयजूंषिसामा
निचप्रणामये।प्रणतानिउपस्थितानिकुर्वे॥यद्वेदिहौत्रंऋक्साध्यं॥आध्वर्यवंतुयजुःसाध्यं।औद्गात्रंसामसाध्यं
ब्रह्मातुहोतृप्रभृतिभ्यस्तत्कालापेक्षितान्ऋगादीनुपस्थापयति।इदंचऋग्वेदेऐतरेयब्राह्मणेअष्टमाष्टकेऋत्व्यःपोषमित्ये
तस्यांऋचोव्याख्यायांचेदंभाष्यादौस्फुटं।णसलायने॥नुदादिःणुस्तुतावित्यदादिः।प्रणुवन्तिप्राणेतिवाप्रणवः॥

प्रस्तावक इत्यर्थः पचाद्यच् ॥ ३१ ॥ स्नेहइति ॥ स्नेहो घृतादिद्रव्यं मांसखंडं कर्मव्याप्नोति रसासृगादिधातुरूपेण परिणम्य मांसं प्रतिपरिणामी सन्ननुगछति ॥ तथा व्यापयति च ॥ मांसस्याप्यभिवृद्धः ॥ तद्वदहमपि सर्वलोकान् अधिष्ठानत्वेनानुस्यूतः सन् व्याप्नोमि ॥ तां अव्यापयामि स्थूलावस्थापन्नान् करोमि यतो हेतोः सर्वं व्याप्नोति इति व्यापयति चेति व्युत्पत्त्या सर्वव्यापी अ

स्नेहो यथा मांसखंडं व्याप्नोति व्यापयत्यपि ॥ सर्वलोकानहं तद्वत्सर्वव्यापी ततोस्म्यहं ॥ ३२ ॥ ब्रह्मादिभ्यो भगवानाद्यंतौ नोपलब्धवान् ॥ ततोनंत्यश्च सुरा यस्मादनंतोहमतो मतः ॥ ३३ ॥ गर्भजन्मजरामृत्यु संसारभयसागरात् ॥ तारयामि यतो भक्तांस्मात्तारोहमीरितः ॥ ३४ ॥ चतुर्विधेषु देहेषु जीवत्वेन वसाम्यहं ॥

स्मि ॥ ३२ ॥ आदिश्चांतश्च तयोः समाहारः आद्यंतं ब्रह्मादयोपि नोपलब्धवंतः अतोहमंताभावादनंतः ॥ ३३ ॥ तारयतीति तारः तरतेर्ण्यंतात्पचाद्यच् ॥ ३४ ॥ चतुर्विधेषु जरायुजांडजस्वेदजोद्भिज्जेषु अहं जीवो भूत्वा वसामि ॥ ३५ ॥ ॥

ह्म इति ॥ स्वभावतः सूक्ष्मत्वाभावेपि अंतःकरणोपाधिकं सूक्ष्मत्वमस्तीत्यर्थः ॥ एतेन जीवोणुरात्मा चेतसा वेदितव्य इत्यादिश्रुतयो औपाधिकाणुत्वपरा इति स्फुटीकृतं भवति ॥ तेन स्वाभाविकमणुत्वं जीवस्येति वदंतः पांचरात्रागमोपजीविनः परास्ताः ॥ स्वभावतोऽणुत्वेऽणुना प्रकोष्ठेन सहात्यंताभेदादेहस्यावस्थीकृतस्य स्वस्याघातापत्तेः विरुद्धधर्मानपि श्वरत्वाकियलेन स्वीत्रि

सूक्ष्मो भूत्वाथ हृद्देशे यत्तान् सूक्ष्मः प्रकीर्तितः ॥ ३५ ॥ महत्तमसि मग्नेभ्यो भक्तेभ्यो यत्प्रकाशये ॥ विद्युद्वदतुलं रूपं तस्माद्वैद्युतमस्म्यहं ॥ ३६ ॥

यंतवृत्तिजीवब्रह्मभेदस्य तदभिमतस्य व्याघातापादकत्वादुपेक्ष्यमितरन्यत्र विस्तरः ॥ ३५ ॥ यद्यस्मात्कारणान्महातमसि मग्नेभ्यो भक्तेभ्यो चित्तशोषणशीलतरतिविद्युत्सौदामनी तद्वदतुलं ॥ प्रकाशकत्वार्थप्रकाशत्वेन तमःशोषकत्वेन निवर्तकत्वेन च साम्यात् ॥ परमार्थतस्त्वतुलं तुलारहितं रूपं प्रकाशये तस्माद्वैद्युतमिति नाम्नाभागहमस्मि ॥ ३६ ॥ ॥ ॥ त्रिवायनमः ॥

॥
एकएवेति॥विसृजामिसंहरामीत्यर्थः॥उपसर्गविशेषसमभिव्याहाराल्लभ्योयमर्थः॥विनाशयामीति॥लोकाल्लोकांतरंप्राप
यामिगतकल्पान्॥तथाचसर्वजगतःसृष्टिस्थितिसंहारेषुपरलोकादिप्रापणेचममैकस्यैवयस्मात्स्वातंत्र्यंतस्मात्सगुणेमयि
एकशब्दप्रयोगइत्यर्थः॥३७॥इदानींनिर्गुणेप्येकशब्दप्रयोगबीजमाह॥नद्वितीयइति॥यतःयस्माद्गुणःद्वितीयोनास्तेस्तितुआत्म
निसंहृत्यएकएववसामि॥मोक्षदशायांसर्वप्रपंचमूलभूताज्ञानस्यसविलासस्यनिवृत्तेः॥ननुसंहृतेत्यादिगुणविशिष्टस्या

एकएवयतोलोकान्विसृजामिसृजामिच॥विनाशयामिगतकल्पांस्तस्मादेकोहमीश्वरः॥३७॥
नद्वितीयोयतस्तस्मात्तुरीयंब्रह्मयत्स्वयं॥भूतान्यात्मनिसंहृत्यचैकोरुद्रोवसाम्यहं॥३८॥ ॥

६१ यस्थानाभ्युपगमेपियद्विप्रपंचेनकिमपराद्धंइत्याशंक्यआत्मानंविशिनष्टितुरीयमिति॥गुणत्रयोपाधिकास्त्रयोभेदाःइदं ६१
तुतेभ्यश्चतुर्थंनिर्गुणमित्यर्थः॥अतएवाहयत्स्वयमिति॥आत्मनोनिजस्वरूपंकइत्थावेदयत्रसइतिश्रुत्यानिर्दिष्टमितिभा
वः॥तरस्थइत्यत्रछंदसिलुङ्लिङ्लिटितिकालविशेषनिरपेक्षालिट्॥३८॥ ॥ ॥शिवायनमः॥

॥
सर्वलोकानिति॥यद्यस्मात्कारणात्ईशायंत्वमीस्यंइतीशान्यंईश्वरत्वादिसंपादिकाःणिजंतादाशीप्नोतेर्लिनिः।ताभिःशक्ति
निर्मायाशक्तिभिःसर्वान्लोकानईशे।नियमये।तत्तस्मात्कारणादहंमातृशानोस्मीतिसंबंधः।अत्रार्थेऋग्वेदपंचमाष्टकत्रींशा
ध्यायस्थांश्रुतिमर्थतःपठति॥३९॥ईशानमित्यादिना।सर्वदेत्यंतेनश्रुतिपाठस्त्वित्थं।अभित्वाशूरनोनुमोदुग्धाइवधेनवः।ईशा

सर्वलोकान्यदीशोहमीशानीभिश्चशक्तिभिः॥ईशानमस्यजगतःस्वर्दृशंचसुरीश्वरं॥३९॥ ॥
ईशानमिंद्रतस्थुषःसर्वेषामपिसर्वदा॥ईशानःसर्वविद्यानांयदीशानस्तदस्म्यहं॥४०॥ ॥

नमस्यजगतःस्वर्दृशमीशानमिंद्रतस्थुषइति॥अस्येतरर्थस्येश्वर्यंहिस्मरइंद्रपरमात्मन्॥इंदतीतिइंद्रइतिव्युत्पत्तेः॥इदिपरमैश्वर्ये।
अन्वेत्यादिसूत्रेणरन्प्रत्ययांतोनिपातितः॥अस्यजगतोजंगमस्यईशानंईश्वरं।तस्थुषःस्थावरस्यचईशानं॥स्वर्दृशं।स्वर्गति
गुणातिरेकशालिनामेवव्यासानादुपर्यपिपारायणःसंभवादितिभावःसर्वस्याध्यक्षःस्वर्दृशंद्रष्टारंवयमानं।वावयंअभिस्तोनोनु
मः।अभिमुख्याःशास्त्रविशेषभाजकःसंतःपुनःपुनरभिष्टायेनवास्तुमः।पूरस्ततो।यकुपकिरुद्व॥कीदृशावयं॥अदुग्धाधे
नवइव।स्थिताः।यथाअभिनवक्षीरपूर्णाधःशालिन्योगावःतद्वत्तदभिषेकार्थक्षीरपूर्णभाजनशालिनःयज्ञानुष्ठानकालेसोमर

सर्वांश्चमसधारिणश्चेति भावः इति भाष्यकाराः॥ यद्यपियोषिल्येतिसप्तर्चिंनात्यर्थेचंद्रदेवताकेसूक्तेइयंद्वादशीकृ
तश्चापिसर्वनियामकत्वादिलिंगानांजातेःसंभवनाकांक्षास्तल्लिंगादिसाद्यधिकरणन्यायाद्बहुलपरीक्षोध्या।तथाच
मंत्रवर्णेपि।इदंमित्रंवरुणमग्निमाहुरित्युपक्रम्यएकंसद्विप्राबहुधावदंतीतिदर्शयति॥ अनुक्रमणिकाराश्चा
हुः।एकएववामहानात्मादेवतातत्त्रयस्थानात्अन्यास्तद्विभूतयइति॥एवंस्थितेशिवगीताश्लोकस्येत्थंयोजना॥ई
शानस्यजगतःस्वर्दृशमीशानमिंद्रतस्थुषइतितृतीयचतुर्थचरणाभ्यांश्रुतिप्रतीकंगृहीतं॥तत्रजगतस्तस्थुषइतिपदद्वयंतत्प
र्यंतोव्याचष्टसर्वेषामपीति॥ईशानमित्यस्यविवरणंईश्वरमिति॥अत्रईशऐश्वर्यइतिधातोःस्वहलाभासेतिसूत्रवि
हिताच्छीलार्थकेनचानश्प्रत्ययेनईशानशब्दःआनाद्यं[illegible]ताच्छील्यवयोवचनशक्तिरिति
स्त्रेणविहितस्ताच्छीलिकः॥यानशानन्तुशानशितिदर्शयति।ताच्छील्यंविवृणोति॥सर्वदेति॥आमोक्षमित्यर्थः॥य
द्यपिलसार्वधातुकत्वाभावेनतास्यनुदात्तेत्यस्याप्रवृत्तावंतोदात्तापत्तिस्तथापिस्वरव्यत्ययोभविष्यतीतिभावः॥
वरचोपिकर्तव्यमात्रेतात्पर्याच्छानजेवायमितिच॥तथान्यस्मिन्दोषलेशोपिनेतिदिक्॥सर्वदृश्यामीत्यस्याव्याचष्टेचक्षु
रिति॥अयमर्थः॥चष्टइतिचक्षुः॥अभिव्यंजकंस्फूर्तिप्रदमित्यर्थः॥चक्षिङ्धातोर्व्यक्तायांवाचिनोऽभिव्य

क्तिरूपेविशेषणांशेनिरूढोभागत्यागलक्षणेति॥पश्चाम्तस्यचक्षणमितिश्रुतिव्याख्यायांभाष्यकाराः॥धनर्त्ता
त्यादिसूत्रेणउसुप्रत्ययः॥स्यन्नाथस्यसकलभुवनचक्षकइति॥श्रुतिस्थस्यस्वर्दृशमित्यस्यव्याख्यानांतरंप्रागु
क्तं॥याजुषंश्रुत्यंतरमुदाहरति॥ईशानइति॥यत्यस्मात्ईशानःसर्वविद्यानामीश्वरःसर्वविद्यामीश्वरःसर्व
भूतानामित्यादियजुष्यपिपठ्यतेतस्मादित्यन्वयः॥४०॥यस्मात्कारणात्सर्वानतीतानागतान्व्यवहितादींश्च
भावानहंनिरीक्षयामि।तथामतः॥महापुरुषान्साधनचतुष्टयसंपन्नातियावत्॥आत्माज्ञायतेऽनेनेति
तथाभूतांश्चात्मासाक्षात्कारसाधनंयोगंनिरीक्षयेबोधयामि॥तथासम्यक्अयेगच्छामिप्राप्नोतीत्यर्थः॥अतःका
रणात्अहंभगवान्मतः।भगंश्रीकाममाहात्म्यंचेत्सर्वज्ञातत्वोपदेष्टत्वंव्यापकत्वंचेत्यादियस्मिन्नित्यर्थः॥४१॥४२॥ ॥

सर्वभावान्निरीक्षेहमात्मज्ञानंनिरीक्षये।योगंचसमयेयस्माद्भगवान्महतोमतः॥४१॥द्वैपायनम
अजस्त्रयक्षरस्मिविसृजामिसृजामिच॥सर्वाल्लोकान्समायान्तिसोनाहंवैमहेश्वरः॥४२॥

महत्स्थिति। सोहंमहादेवोस्मीतिसंबंधः दीप्यति॥ क्रीडतीतिदेवः महांश्चासौदेवश्चेति विग्रहः। ननुअन्येष्वपि क्रीडत्सु क
पंचवेदे महत्वमित्याशंक्य क्रीडाविशेषंप्रकटयति॥ यः पुरुषः आत्मज्ञानंचयोगाश्चतैर्महीयते। ऐश्वर्यैश्च महीयते स
र्वान्भावान्सृजतिब्रह्माख्यः। अवतिरक्षति। नारायणाख्यः॥ सोहमेवमहत्सुमध्येमहादेवइतिसंबंधः॥ जगत्सृष्टिस्थितिसंहार
पाक्रीडाममेवनान्येषां॥ अतोमहत्वमुचितमितिभावः॥४३॥ महत्वमेवद्रढयन्। एषहिदेवः प्रदिशोनुसर्वाइत्यादिश्रुतिमर्थतः पठ
ति॥ एषोस्मीति॥ सर्वतोमुखस्तिष्ठतीतिश्रुत्यादयोहवै पुरुषउक्तः एषोअहमेवदेवोस्मीतिसंबंधः॥ सर्वतोमुखत्वमेवविवृणोति

महस्यात्मज्ञानयोगैरैश्वर्यैश्च महीयते॥ सर्वान्भावान्महादेवः सृजत्यवतिसोस्म्यहं॥४३॥
एषोस्मिदेवः प्रदिशोपिसर्वाः पूर्वोहजातोस्म्यहमेवगर्भे॥ अहंहिजातश्चजनिष्यमाणः प्रत्यग्जनास्तिष्ठतिसर्वतोमुखः
४४

सर्वाः प्रदिशोपिअस्मि सर्वत्रास्मीत्यर्थः॥ देवाकाशगंतव्याः कर्मसंस्थकर्मणामितिकर्मत्वं दिगुपाधीनमपिदेशत्वात्॥ पूर्वोजातः आ
दाउत्पत्त्यर्थः॥ तथागर्भेजातोप्यहमस्मितथाजातः गर्भाद्बहिर्निर्गतः जनिष्यमाणः उत्पत्स्यमानश्चाहमेव॥ अतएवसर्वतोमुखः॥ भूतभविष्य
हदिरभेदविकल्पितापत्तिरित्याशंक्याह॥ प्रत्यगिति॥ प्रतिप्रतीपं ज्ञानतादिभ्यो अहंकारादिभ्यः प्रातिकूल्येनसत्यज्ञानानंदतयाअ
ञ्चतिप्रकाशतेइतिप्रत्यक् विवर्ताधिष्ठानमात्रमित्यर्थः॥४४॥

DR. BHAU DAJI MEMORIAL

बाहुत्वाश्च स्थानेहस्तत्वाश्वेनपठितयाजुषः पाठः॥ पृथिवीत्वाश्च स्थले भूमित्वाश्चपठितस्तत्रस्वेदपाठः। तदिदंश्रुतिद्वयंसमानार्थं
कमर्थं लं पठति॥ विश्वतइत्यादि। विश्वतश्चक्षुः सर्वसाक्षीत्यर्थः। विश्वतोमुखः सर्वतोवक्त्रः॥ सर्गाद्युकालिकव्यवहारप्रवर्तनकर्तृ
त्वात्सर्वकर्तृत्वाह॥ विश्वतोबाहुः विश्वविषयकप्रयत्नवान्॥ बाहृप्रयत्ने॥ उण्प्रत्ययः॥ प्रयत्नश्चेहमायावृत्तिरूपस्तद्वात्मा।

विश्वतश्चक्षुरुतविश्वतोमुखोविश्वतोबाहुरुतविश्वतस्पात्॥ संबाहुभ्यांधमतिसंपतत्रैर्द्यावाभूमी
जनयंदेवएकः॥४५॥

नेस्वयमकुरुतेत्युक्तसिद्धः। सचयद्यपिनकर्तृत्वशरीरघटितः वृत्तिमात्रप्रसंगात्तथापिनस्वरूपतोनिराकार्यः॥ देवताविग्रह
न्यायसिद्धत्वात्॥ उतेति॥ अपिचेत्यर्थः॥ विश्वतस्पात्॥ लक्षणयासर्वगइत्यर्थः॥ बाहुभ्यांतथासंपतत्रैर्गमनशीलैः पादैश्च
दिवंपृथिवींचसंधमति॥ धमतिर्गतिकर्मा॥ पाणिपादग्रहणंचोपलक्षणमात्रं॥ पाणिपादस्थानापन्नैः सहकारिभिरज्ञानध
र्माधर्मादिभिरित्यर्थः॥ द्यावापृथिवीइत्यपिकार्यमात्रोपलक्षणं॥ सर्वंजगत्सृजतीत्यर्थः॥ तथापिदेवएकएव॥ सृष्टेर्मायिक

त्वादितिभावः॥युक्तंचैतत्॥इयमादिश्येतिचतुर्दशार्चस्यसूक्तेप्रथममंत्रेणसृष्टेरुपक्षेपेकृतेसतिद्वितीयमंत्रेणकिंचिदासीदधि
ष्ठानमारंभणमित्यनेनअधिष्ठानाद्यसंभवात्कथंसृष्टिरितिप्रश्नेयतारितेसतितदुत्तरंदातुंप्रवर्त्तनानेनतृतीयमंत्रेणा
धिष्ठात्रीभूतब्रह्मणएवोच्यमानतयासंदर्भस्यरसेनप्रपंचोमिथ्यात्वस्यलाभात्॥परिणाममानाद्यानंविषयोप्यधि
ष्ठानं॥परिणामस्त्वेकवाऽन्यथाभावइतिदिक्॥अतएवकिंस्विद्वनमित्यादिनातदुत्तरमंत्रेणापिप्रपंचस्यानिर्वचनी
यतैवस्फुटीक्रियते॥उक्तंच॥यथासतोजनिर्नैवसमतोपिननिर्नच॥अन्यत्वमेवजन्यस्यमायिकत्वसमर्थकमि
ति॥धियमीरयंतिप्रेरयंतीतिधीराःविचारकुशलाःयेपुरुषाआत्माजीवःसन्तिष्ठतीत्यात्मस्थःशोधितत्वंपदार्थः॥तंमां
मंदभिन्नंअनुपश्यंतिश्रवणादिकासम्यक्साक्षात्कुर्वंतितेषांअप्रतिबद्धमद्भेदसाक्षात्कारवतांशाश्वतींशांतिंमो
क्षसुखंआविर्भवतिइतरेषांतुनेतिसंबंधः॥कीदृशंजीवंहृदयस्यमध्येवालाग्रलोमात्रकेशाग्रप्रमाणंस्वरूपेणव्या
पकत्वेप्यौपाधिककपरिच्छेदवंतमित्यर्थः॥कीदृशंमां॥विश्वाधीनत्वाद्विश्वात्मकंतदर्थामिणंचेत्यर्थः॥ननुजाबा
र्षित्वंस्तुवन्नेज्ञातवेदइतिमंत्रेऋग्मंत्रेणअग्नेःसर्वांतर्यामित्वंश्रुतंननुतदेत्याशंक्यसोप्यहमेवेत्याह॥जातवेदइतिइदं
मित्रावरुणमग्निमाहुरित्यादिश्रुतिबलात्॥अग्निप्रभृतिशब्दाअपियामेवाहुरित्यर्थः॥वेदोधनं॥तज्ज्ञातंयस्मान्स
तथा॥अग्नेःप्रजातंपरिपद्धिरण्यमितिश्रुतेः॥विद्लाभेइतिधातोर्भिन्नअकारांतःपुल्लिंगोवदन्नाह॥असुन्प्रत्ययतु
हृतेसकारांतोनपुंसकः॥तदाजातवेदसमित्यपिभवति॥वरेण्यंभजनीयम्॥४६॥ ॥शिवायनमः॥

ननुविश्वात्मकत्वंपूर्वश्लोकेनउक्तं॥तथाधिष्ठानतयावाच्यं॥नचतत्संभवति॥रज्ज्वादिरेवरजताधिष्ठानत्वादित्याशंक्याह॥
अहमिति॥येनियोनिअधिष्ठानत्वेनसंभाव्यमानंरज्ज्वादिकंसर्वंअहमधिष्ठामि॥शुक्त्याद्युपहितोहमेवरजतादेरधिष्ठानं
जडस्याज्ञानाविषयतयाधिष्ठानत्वानुपपत्तेरितिभावः॥मूलाज्ञानकार्येषुतुविषयदधिष्ठानवच्छिन्नोहमेवाधिष्ठानमित्याह॥मयेदमि

**वालाग्रमात्रंहृदयस्यमध्येविश्वंदेवंजातवेदंवरेण्यं॥मायात्मस्थंयेनुपश्यंतिधीरास्तेषांशांतिःशाश्व
तीनेतरेषां॥४६॥अहंयोनिमधितिष्ठामिचैकोमयेदंपूर्णंपंचविधंसर्वं॥मामीशानंपुरुषंदेवमीड्यं
विचार्यमाणंशांतिमत्यंतमेति॥४७॥**

तिपंचविधंभूतात्मकंसर्वंमयैवाधिष्ठानभूतेनपूर्णंआविद्यकतादात्म्यापन्नमित्यर्थः॥इत्थंपूर्वोक्तरीत्याविचार्यमाणंमांशांतिंप्राप्नो
ति॥अर्थाद्विचारकर्तैवविचार्यमाणंप्राप्नोतीतिलभ्यते॥तथाचश्रुतिः॥ब्रह्मवेदब्रह्मैवभवतीति॥कीदृशंमां॥अत्यंतंशांतिं
प्रपंचोपशमंशिवमद्वैतमितिश्रुतेरितिभावः॥४७॥

प्राणेऽपीति॥ यस्मिन्मनसि अशनाया अशनविषयिणी इच्छा अस्ति॥ अशनं भोक्तुमपि अशनायात्रोदन्येति निपातनादि त्यानाये अप्रत्ययादिप्रत्ययः॥ तथाच यस्मिन्मनसि तृष्णा प्यासमाच अस्ति तादृशस्य मनसो लिंगं तत्कार्यभूतामिच्छादिवृत्तिं प्राणेष्वाहुः॥ तथाच श्रुतिः आत्मनि आहुः अंतःकरणपरिणामादिरूपाः कामादयो अन्यत्राप्यध्यास्यंते इत्यर्थः॥ तस्मान्मनोनि

प्राणेष्वंतर्मनसो लिंगमाहुर्यस्मिन्नशनाया तृष्णा समाच॥ तृष्णां छित्वा हेतुजालस्य मूलं बुध्या चितं स्थापयित्वा मयीह॥४८॥

६५ अहण्यावन्नयक इत्याह॥ तृष्णां छित्वेति॥ ननु धर्माधर्मयोर्जयेऽपि तृष्णा किं करिष्यतीत्याशंक्य तृष्णायां सत्यां तदितरजय एव दुर्लभ इत्याशयेन तृष्णां विशिनष्टि हेतुजालस्येति हेतुजालस्यानर्थहेतूनां धर्माधर्मादीनां संघस्य मूलभूतामित्यर्थः॥ तृष्णाजयानंतरं कर्तव्यमाह॥ बुध्येति॥ इहमपि इहैवोक्तरीत्या ध्यायमानाः ध्यायंतः॥ ध्यानशानतुशानच॥ परस्मैपदित्यात्॥ एवंभूताः संतो ये भजंते तेषां शांतिर्मोक्षसुखं भवति॥४८॥ ॥ ॥श्रीशिवायनमः॥ ६५

॥

उपसंहरति॥ यतो वाच इति॥ वाचः शब्दाः यतः यस्माद्ब्रह्मणः निवर्तंते न च वं सति औपनिषदत्वं भज्येतेत्याशंक्याह अप्राप्येति॥ शक्तिमलब्ध्वेत्यर्थः॥ तथाच विशिष्टे शक्तानां ज्ञानानंदादिपदानां जडांशपरित्यागेन लक्षणया अखंडस्य चिद्धनबोधकत्वाभ्युपगमान्न कश्चिद्दोष इति भावः॥ मनसा सहेति॥ तथाच मनोऽपि वर्तत इति भावः॥ श्रूयते च॥ यतो

यतो वाचो निवर्तंते अप्राप्य मनसा सह॥ आनंदं ब्रह्मणो विद्वान्न बिभेति कुतश्चन॥५०॥ ॥
श्रुत्वेति दिव्यामहार्थ्यं कैवल्यज्ञानमुत्तमं॥ जपतो मम नामानि मम ध्यानपरायणः॥ ॥५१॥ ॥

नसा न मनुत इति॥ न चैवं मनसो ज्ञानु द्रष्टव्यमिति श्रुतिविरोधः॥ परिपक्केन समाहितयत इत्येवं तदर्थात्॥ निषेधस्य तु अपरिपक्कमनो विषयत्वादिति दिक्॥ केवलस्य भावः कैवल्यं निष्प्रपंचमात्मस्वरूपं तद्ज्ञाप्यते अनेनेति कैवल्यज्ञानं॥ अद्वैतात्मतत्वज्ञानसाधनमित्यर्थः॥५१॥ ततः कारणाद्येयपदार्थाद्भूतंते तृष्णाविषयाः ते सर्वे मद्विभूतयः॥ यच्छब्दबलात्तच्छब्दो ध्याहार्यः॥५२॥

उक्तमेवार्थंकैवल्योपनिषत्संवादेनद्रढयति॥मय्येवेत्यादि॥त्रिः॥अध्यायपर्यंतंकैवल्योपनिषद्वक्तिपपद्यर्णमसासे
नपठ्यते॥५३॥अणोरिति॥अणोरप्यतिशयेनाणुरणीयान्औपाधिकपरिच्छेदयानित्यर्थः॥महानिति॥स्वरूपतोऽप
परिच्छिन्नःविश्वंसर्वाधिष्ठानत्वात्तत्तादात्म्यापन्नःविशुद्धइति॥प्रपंचस्यमिथ्यात्वाप — ह्लूपरहितःनचारोपितेनाशु

मय्येवसकलंजातंमयिसर्वंप्रतिष्ठितं॥मयिसर्वंलयंयातितद्ब्रह्मास्म्यहमव्ययं॥५३॥अणोरणीया
नहमेवतद्वन्महानहंविश्वमहंविशुद्धः॥पुरातनोहंपुरुषोहमीशो॥हिरण्मयोहंशिवरूपमस्मि॥५४॥
अपाणिपादोहमचिंत्यशक्तिःपश्याम्यचक्षुःसशृणोम्यकर्णः॥

त्मास्यानायिकंस्फटिकस्यच्छत्वमपैतीतिभावः॥पुरातनःपुरुषईशोहिरण्मयइत्यादिश्रुतिस्तास्तासूपनिषत्सुब
हुधाव्यवह्रियमाणोअहमेवास्मीतिसंबंधः॥५४॥अपाणीति॥लोकेपाणिपादविकलःसर्वकार्येष्वशक्तइतिजीवा
नांस्थितिःअहंतुपाणीचपादौचपाणिपादंअविद्यमानंपाणिपादंयस्यतथोक्तःसन्नपिअचिंत्यशक्तिःतथाचक्षु
षारहितःसन्नपिपश्यामि।चक्षुर्ग्राह्यसकलपदार्थानंद्रष्टा॥कर्णरहितःसन्नपिशृणोमिसकलशब्दसाक्षात्कारवान
स्मि।कारणंविनिकथंकार्यमित्याह॥

अहमिति॥विविक्तंअनावृतंरूपंसस्यतथाभूतः॥तथाचस्वरूपज्ञानेनैवसर्वद्रष्टाहंननुवृत्तिबलेन।चक्षुःश्रोत्रादितुदृशावे
हेतुःसाचतत्रिवर्ग्याचरणरहितत्वान्मयिहिनापेक्षितेतिभावः॥५५॥वेदैरिति॥वेदैर्वेद्यःउपनिषज्जन्यवृत्तिविषयइत्यर्थः॥नच
शिवत्वाममेत्यव्यवहितःपूर्वोक्तंतुफलमाप्तिविरहपरं॥तत्रहेतुःयैवचित्सदाहमितिचिद्रूपत्वंप्रागुक्तं।वृत्तिविषयतांतुननिवार्यते॥

अहंविजानामिविविक्तरूपोनचास्तिवेत्तामममचित्सदाहं॥५५॥वेदैरनेकैरहमेववेद्योवेदांतकृद्वेद
विदेवचाहं॥नपुण्यपापेममनास्तिनाशो॥नजन्मदेहेंद्रियबुद्धिरस्ति॥५६॥ ॥शिवायनमः॥

अतएवशास्त्रतोनित्याधिकरणेद्वितीयवर्णकेनविस्पष्टमेतदुक्तंवार्तिककृद्भिः॥फलव्याप्यत्वमेवास्यशास्त्रकृद्भिर्निवार्यते॥ब्र
ह्मण्यज्ञाननाशायवृत्तिव्याप्यत्वमिष्यतइति॥इदंचअहंवेद्यइति॥वक्तव्येअहमेवसर्वकारणंअखंडार्थतोस्फुटीक्रियतेयुक्तंचैत
त्॥अन्वयव्यतिरेकाभ्यांनिवर्तनीयाज्ञानेकार्यगोचरस्यैवज्ञानस्याज्ञाननिवर्तकत्वादितिदिक्॥नास्तिनाशइति॥ममेतिनाश॥
जन्मदेहेंद्रियसहिताबुद्धिःजन्मदेहेंद्रियबुद्धिःसापिनास्तीतिसंबंधः॥क्वचित्तुनजन्मदेहेंद्रियबुद्धिर्नास्तीतिपाठः॥तत्रशाकपद्
मंबुध्यंतानांचसमाहारद्वंद्वः॥तथाचेदंयोजनंजन्मनास्ति॥देहादिचनास्तीति॥५६॥ ॥शिवायनमः॥ ॥

भूम्नीत्यादिनामिथ्यात्वघटकीभूतःप्रपंचाभावोबोध्यते॥गुहायामज्ञानेस्रोतेइतिगुहान्तरायंजीवानमत्यावृतमित्यर्थः॥५७॥स
मस्तेति॥साक्षीत्याख्यायमानःसाक्षिः॥तंआख्याताएएतात्कर्मेति॥औणादिकइन्॥साक्षिणमित्यर्थः॥फलितोर्थः॥सदसद्भ्यां
कार्यकारणाभ्यांविहीनं॥५८॥सएवनान्यइति॥कर्ममात्रासक्तोवासगुणमात्रासक्तोवानमोक्षभागित्यर्थः॥नचैवंकर्मणा

नभूमिरापोनचवह्निरस्ति॥नचानलोमेस्तिनमेनकश्चन॥एवंविदित्वापरमात्मरूपंगुहान्तरायंनिष्क
लमद्वितीयं॥समस्तसाक्षिंसदसद्विहीनंप्रयातिशुद्धंपरमात्मरूपं॥५८॥एवंमांतत्वतोवेत्तियस्तुराम
महामते॥सएवनान्योलोकेषुकैवल्यफलमश्नुते॥५९॥ ॥इतिपद्मपुराणेशिवगीतायांषष्ठोध्यायः६॥

वैयर्थ्यंविविदिषादिसंपादनद्वारासार्थक्यात्॥सगुणोपासनानामपिपरंपरयैवोपयोगात्॥तदुक्तं॥निर्विशेषंपरंब्रह्म
साक्षात्कर्तुमनीश्वराः॥येमंदास्तेनुकंप्यंतेसविशेषनिरूपणैरिति॥कैवल्यफलमिति॥कैवल्यमेवफलंकैवल्यमितिकर्म
धारयः॥ ॥इतिश्रीपद्मपुराणेशिवगीतासूपनिषत्सुविभूतियोगोनामषष्ठोध्यायः॥६॥ ॥शिवायनमः॥ ॥

पूर्वाध्यायेअहंसर्वाधिष्ठानमितिप्रपंचंभगवतोक्तं॥तत्रअहंशब्दप्रयोगबलादहंकाराद्यवच्छिन्नस्याधिष्ठानतेतिप्रत
ीयतेतच्चासंगतमित्याक्षिपतिद्वाभ्यांश्लोकाभ्यांभगवन्निति॥१॥परिच्छिन्नेति॥परिच्छिन्नंपरिमाणंयस्यतथा॥मूलेतुप
सर्गस्यघञीतिसर्वत्रबहुलग्रहणाद्दीर्घः॥भगवतोदेहेसर्वभूतानामुत्पत्तिःस्थितिःप्रलयोवाकथंब्रह्मांडाद्युचितस्यावकाशस्य

श्रीरामउवाच॥भगवन्यन्मयापृष्टंतत्तथैवस्थितंविभो॥अत्रोत्तरंमयालब्धंत्वत्तोनैवमहेश्व
र॥१॥परिच्छिन्नपरीमाणेदेहेभगवतस्तव॥उत्पत्तिःपंचभूतानांस्थितिर्वाविलयःकथं॥२॥स्व
स्वाधिकारसंबद्धाःकथंनामस्थिताःसुराः॥

परिच्छिन्नेदेहमध्येअनायासात्कथंसृष्टिः॥नहिघटमध्येपर्वतादयोमांतीतिभावः॥२॥स्वस्वेति॥स्वस्वाधिकारेःसंबद्धाःसुराःपरि
च्छिन्नपरीणामेदेहेकथंसंगच्छतइतिभावः॥ननुअहंकाराद्यवच्छिन्नजगदधिष्ठानतांनब्रूमः॥किंतुअपरिच्छिन्नचिन्मात्रस्य॥
अहंशब्दप्रयोगोपिलक्षणयाचिन्मात्रपरः॥अतोनोक्तदोषइत्याशंक्यतत्राप्यनुपपत्तिरेवेत्याह॥ ॥ शिवायनमः॥ ॥

६८

तः सर्वं इति॥ ते देवाः सर्वे त्वं॥ तथा चतुर्दश भुवनानि च त्वमिति कथं॥ न ह्येकस्य उत्पत्तिं विना आरहितस्य चिद्रूपस्य तव बहुभि
र्भूतैः उत्पत्तिं विना आयुद्धि जडैः सह अभेदः संभवति॥ विरुद्धधर्माध्यस्तत्वादिति भावः॥३॥ त्वत्त इति॥ मे मम त्वत्तः श्रुत्वापि श्रव
णानंतरमपि अत्रार्थे संदेहो महान् अभूत्॥ अप्रत्यायितं असंभावनाभूत्यनिश्चयमप्रापितं चिरायस्य तथाभूतस्य मे संशयं त्वमेव छे

तः सर्वं त्वं कथं देव भुवनानि चतुर्दश॥ त्वत्तः श्रुत्वापि देवात्र संदेहो मे महानभूत्॥३॥ अप्रत्यायित
चित्तस्य संशयं छेत्तुमर्हसि॥४॥ श्रीभगवानुवाच॥ वटबीजे सुसूक्ष्मेऽपि महावटतरुर्यथा॥

त्तुमर्हसि॥ जगद्रूपिणा भगवता बहुरूपया बोधनीयोऽहं॥ अत्यंतगहनानां न्यायानां गुरूपदेशं विना दुरधिगमत्वादिति भावः॥४
परिच्छिन्नस्य सर्वाधिष्ठानत्वं यद्यपि न सिद्धं तत् संभवति तथापि नो किं नु राज्ञायमनुरुध्यते तदपि समर्थयितुं दृष्टांतमाह॥ वटे
ति॥ सुतरां सूक्ष्मेऽपि वटस्य बीजे सर्वदा महान् वटतरुरास्ते यथा॥ तद्वन्मम तनौ भूतानामागतिर्लये श्चेत्यन्वयः॥ ननु दृष्टांतो
प्यसंप्रतिपन्नः॥ प्रागत एव वृक्षस्य सद्भावे रिसमवहिताद्बीजादुत्पन्ने॥ अत एव गौतमकणादादिग्रंथेषु येऽप्युत्पातादि

गौतमकणादादिग्रंथेषु तथैव तन्निरस्याप्याह॥ अन्यथेति॥ अन्यथा सूक्ष्मरूपानभ्युपगमे वृक्षः कुतो हेतोरायाति तद्वदेवे
संबंधः॥ अयं भावः॥ असतोऽप्युत्पत्तौ शशशृंगमप्युत्पद्येत॥ अविशेषात्॥ प्रागभावप्रतियोगित्वमेव प्रयोदे विशेष इति चे
त्॥ घटस्यासत्वे तद्रूपात्मिकायाः प्रतियोगितायाअप्यसत्वात्॥ अखंडोपाधिरूपा प्रतियोगितेति चेत्॥ अखंडोपा
ध्यभ्युपगमे जातिविलयापत्तेः॥ समवायस्यापि तत्रापाद्यत्वात्॥ अस्यादि निर्वचनं कुत्रापि यथापरो श्च॥ किंच॥ अख

सर्वदास्तेऽन्यथा वृक्षः कुत आयाति तद्वद॥ तद्वन्मम तनौ राम भूतानामागतिर्लयः॥५॥

दु प्रतियोगिताबलेन च घटवत् शशशृंगादिकमप्युत्पद्येत॥ शशशृंगे सा नास्तीति चेत्॥ तर्हि किं घटेऽस्ति॥ अस्तीति चेत्॥ सि
द्धं तर्हि प्रागुत्पत्तेरपि घटः॥ न च प्राक् सत्वे कारणव्यापारवैयर्थ्यं॥ स्थूलावस्थायास्तदधीनत्वान्न च तस्यामपि सत्यासत्व
विकल्पेऽस्यापस्य तिरोभावक्षणादेरपि अघटितघटनापटीयस्या मायाया अनिर्वचनवादे तत्समाधानात्॥ नचैवं
सूक्ष्मरूपवैफल्यं॥ कृतहानाकृताभ्यागमादिदोषपरिहारार्थं स एव तु कर्मानुस्मृतिश्राद्धविध्यनुपपत्त्याद्यधिकरणो
तत्समाधानात्॥ विस्पष्टं चैव तच्छ्रीगणग्रंथोत्पत्तिगौरवभयादुपरम्यते॥५॥ ॥ श्रीरामायनमः॥

ननु क्षरीत्या कुलालादिव्यापारात्पूर्वमपि घटादेः सत्वात्तदुपलंभः कुतो नेत्याकायां सूक्ष्मत्वादेव विद्यमानस्याप्यनुप
लंभ इति समाधानसमीप्रेत्य सतोप्यनुपलंभे दृष्टांतमाह ॥ महासैंधवेति ॥ महानपि सैंधपिंडः जलक्षिप्तः सन् विलीय
सूक्ष्मावस्थापन्नो भवति ॥ ततो न दृश्यते ॥ ततः पुनः पाकात्पूर्ववत्स्थूलावस्थापन्नः सन् आयातीत्येतत्स

महासैंधवपिंडोपि जले क्षिप्तो विलीयते ॥ न दृश्यते पुनः पाकात्तत्रायाति पूर्ववत् ॥ ७ ॥ प्रातः प्र
र्यथालोको जायते सूर्यमंडलात् ॥ एवं मत्तो जगत्सर्वं जायते च विलीयते ॥ ८ ॥ मय्येव सकलं राम तद्
जानीहि सुव्रत ॥

र्वकार्यमित्यर्थः ॥ न च दृष्टांते संप्रतिपत्तिः ॥ विलयदशायामपि जले लवणरसोपलायोगात् ॥ ७ ॥ प्रातः प्रातरिति ॥
सूर्यमंडलाद्यथा आलोको जायते ॥ एवं मत्तो जगत्सर्वं जायते ॥ तद्वदेव ॥ सकलं मय्येव अस्ति विलीयते च इति जानीहि ८

ननु दृष्टांते विषमः ॥ बीजमध्ये हि सूक्ष्मो वृक्षस्तिष्ठति न तु स्थूलः कार्यासमोपि त्वयि तु स्थूलप्रपंचस्थितिरनुपपन्नैव ॥
किंच ॥ एकस्य बहुभिः सह कथमभेद इति रावणमदीयप्रश्नोत्तरमलभ्यमेव ॥ यदि तु गूढादिसंधिना भगवतासर्वत्र
स्मिन्नर्थे स्पष्टमुत्तरं न दीयेत तदा संक्षिप्य कथितमपि मत्संशयनिवृत्तावसमर्थमेवेत्याह श्रीरामः ॥ कथितेपीति ॥

रामउ० ॥ कथितेपि महाभाग दिग्जडस्य यथा दिशि ॥ निवर्तते भ्रमो नैव तद्भ्रमं करोमि किं ॥ ९ ॥ श्रीभ
गवानुवाच ॥ मयि सर्वं यथा राम जगदेतच्चराचरं ॥ वर्तते तद्दर्शयामि न द्रष्टुं क्षमते भवान् ॥ १० ॥

दिग्मोहो यथा कथितेपि दोषप्राबल्यादनुवर्तते तद्वन्मदीयोपि भ्रम इत्यर्थः ॥ ९ ॥ यद्यप्यपि पूर्वं प्रश्ने एव सर्वाधिष्ठानं न
दुलाला विग्रह विशिष्टं अतो नो उक्तदोष इति समाधानमुक्तं एवं तथापि स्थानप्रपंचमिव परिच्छिन्ने विग्रहे तांतां प्रपं
चं दर्शयित्वा मायिकतां स्फुटीकरिष्यामि अग्राधिपकं तादात्म्यं चमुत्पादयिष्यामि तेन द्वितीयप्रश्नेप्युत्तरं दत्तं भविष्यतीत्याश
येन श्री भगवानाह ॥ मयीत्यादि ॥ दर्शयामि दर्शयिष्यामि ॥ वर्तमानसामीप्ये वर्तमानवद्वेति लट् ॥ १० ॥ द्विवायनमः ॥

Dr. BHAU DAJI MEMORIAL

दिव्यंचक्षुरिति॥मायिकप्रपंचविशेषदर्शनानुकूलंसामर्थ्यमित्यर्थः॥ इतिदर्शयिष्यमाणंमामेकंमहः प्रपंचविशेषं

दिव्यंचक्षुःप्रदास्यामितुभ्यंदशरथात्मज॥ तेनपश्यसियंस्वकाममत्तेजोमंडलंध्रुवं॥११॥ नचर्मचक्षु-
षाद्रष्टुंशक्तोमामकामहः॥ नरेणवासुरेणापितन्ममानुग्रहंविना॥१२॥ सूत उ० इत्युक्त्वाप्रददौतस्मै
दिव्यंचक्षुर्महेश्वरः॥ अथादर्शयदेतस्मैवक्त्रंपातालसन्निभं॥१३॥ विद्युत्कोटिप्रभादीप्तमतिभीमंभ-
यावहं॥ तद्दृष्ट्वैवभयाद्रामोजानुभ्यामवनिंगतः॥१४॥ प्रणम्यदंडवद्भूमौतुष्टावचपुनःपुनः॥
अथोत्थायमहावीरोयावद्देवंप्रपश्यति॥ वक्त्रंपुरभिदस्तावदंतर्ब्रह्मांडकोटयः॥१५॥ चट-
७० काइवलक्ष्यंतेज्वलज्ज्वालासमाकुलाः॥ मेरुमंदरविंध्याद्यागिरयःसप्तसागराः॥१६॥ ७०

विशिष्टंस्वरूपंममानुग्रहंविनाद्रष्टुंनशक्यते॥१३॥ विद्युदिति॥ रामोऽतिभीमंतद्वक्त्रंदृष्ट्वाभयावहंपश्यतामन्येषामपिभयंकरं यथाभवतितथा॥ अवनिंगतः॥१४॥ तत्रवक्त्रेअंतर्ब्रह्मांडकोटयः॥ ज्वलंतीभिर्ज्वालाभिः॥ समाकुलाश्चटकाःकलविंकाइवविनाशोन्मुखाःलक्ष्यंतेइत्यन्वयः॥१६॥

सुराःपरमेश्वरस्यसमंतात्दृष्टपूर्वदृष्टाःदेवाअपि॥१७॥ प्रतीति॥ प्रतिब्रह्मांडएवंमेरुमंदरसूर्यचंद्रादिकंसर्वंदृष्ट्वाभयाविष्टः

दृश्यंतेचंद्रसूर्याद्याःपंचभूतानितेसुरासुराः॥ अरण्यानिमहाभागभुवनानिचतुर्दश॥१७॥ प्रति-
ब्रह्मांडमेवंतुदृष्ट्वादशरथात्मजः॥ सुरासुराणांसंग्रामानत्रपूर्वापरानपि॥१८॥ विष्णोर्दशावता-
रांश्चतत्कर्तव्यानिचद्विजाः॥ पराभवांश्चदेवानांपुरदाहंमहेशितुः॥१९॥ उत्पद्यमानमुत्पन्नं
सर्वमपिविनश्यतः॥ दृष्ट्वारामोभयाविष्टःप्रणनाममुहुर्मुहुः॥२०॥ उत्पन्नतत्वज्ञानोपिभ-
वन्रघुनंदनः॥ यथोपनिषदांसारैरर्थैस्तुष्टावशंकरं॥२१॥

सन्प्रणनामेतिवक्ष्यमाणेनान्वयः॥ पूर्वापरान्अतीतानागतान्॥१८॥ तत्कर्तव्यानीति॥ तेषुअवतारेषुतत्कर्तव्यानि रावणवधादीनि॥ देवानांपराभवमिति॥ दैत्यैरितिशेषः॥१९॥२०॥ उत्पन्नेति॥ दृश्यमानस्यासद्रूपतयातद्दृष्टांतेनसर्वानुभूतप्रपंचेपिमिथ्याभूतत्वंनिर्गुणतांचनिश्चित्येतिभावः॥२१॥

देवेति।अदितित्रायस्व॥आर्षरूपं॥यद्वात्रायतेइतित्राःरक्षकः॥सख्याचसत्रादिरक्षितृत्वादिधर्माणामाविष्कत्वेनवि
स्मसराकृताआत्यार्ष्टिपाल्यतेयथाअरुणइवस्फटिकोइवदृश्यतइत्यादौइवत्राबोन।एवंचकर्त्रीरिष्टिभूतारष्टिपिपर

देवप्रपन्नार्तिहरप्रसीदप्रसीदविश्वेश्वरविश्ववंद्य॥प्रसीदगंगाधरचंद्रमौलेमांत्राहिसंसार
भयादनाथं॥२२॥त्वत्तोहिजातंजगदेतदीशत्वय्येवभूतानिवसंतिनित्यं॥त्वय्येवशंभोविलयं
प्रयांतिभूमौयथावृक्षलतादयोपि॥२३॥ब्रह्मेंद्ररुद्राश्चमरुद्गणाश्चगंधर्वयक्षाःसुरसिद्ध
७१ संघाः॥गंगादिनद्योवरुणालयाश्चवसंतिशूलिंस्तववक्त्रमंते॥२४॥ श्रीवायनमः॥ ७१

त्रिपदाद्यनुपपत्तिरपिनेतिदिक्॥२२॥त्वत्तोहीति॥उपादानत्वंकर्तृत्वंचपंचम्यर्थः॥जनिकर्तुःप्रकृतिरितिसूत्रेप्रकृतिग्र
हणंहेतुमात्रलक्षकइतिप्राचीकसिद्धांतात्॥उभयस्यचैवंसंभवात्॥२३॥ब्रह्मेंद्रेति॥हेशूलिन्ब्रह्मादयःसर्वेतववक्त्रांत
िवक्त्रस्यसमीपेजन्मध्यइतियावत्॥अंतिकशब्दोंतिकपर्यायः॥प्रसिद्धतरोयंदेयदंतितःअदूरकेइत्यादौ।तद्योगेयद्यपिष

ष्ठीपंचम्यौचापेक्ष्येतेदूरांतिकार्थैःषष्ठ्यन्यतरस्यामितिपाणिनिसूत्रात्तथाप्यार्षोविभक्तिव्यत्ययः॥यद्वावक्त्रेवसं
तीतिसम्यगर्थः।अंतकालं।अंतगताःकर्मसंज्ञात्वकर्मण्यमितिकर्मत्वेनद्वितीया॥२४॥ननुजगदुपादानत्वेसविका
रतापत्तिरित्याशंक्याह॥त्वन्माययेति॥जनःएतत्सर्वंप्रपंचजातंभ्रांत्यापश्यति।शुक्तौरूप्यमिवेतिसंबंधः॥ननुयद्यपि

त्वन्माययाकल्पितमिंदुमौलेत्वय्येवदृश्यत्वमुपैतिविश्वं॥भ्रांत्याजनःपश्यतिसर्वमेतच्छुक्तौ
यथारूप्यमहिंचरज्जौ॥२५॥

प्रपंचप्रतीतिभ्रमरूपाया॥तर्हिनाद्वैतंतदुपादानमित्यागतं॥अन्यस्यान्यत्रभानंहिभ्रमइत्याशंक्याह॥त्वन्माययाक
ल्पितमिति॥त्वय्येवदृश्यत्वमुपैतीतिचसत्वेनानायोगात्तथात्वेवारजतस्याप्यसतोभानापत्तेरायसत्ख्यातिपक्षस्यापत्तेः
॥अन्यथाख्यातावसत्ख्यातौचापरोक्षत्वानुपपत्तिसाम्याच्च।तस्माददैवविद्ययाकल्पितमित्युपेयमिति॥२५॥

परमतेपरोक्षतामुपपत्तिंघनयन्सिद्धांतेऽपरोक्षतांसमर्थयते॥तेजोभिरिति॥समस्तांजगत्शुक्तिरूप्यरज्जुसर्पादिविषयादिचतेजोभिःस्फुरत्याद्युपहितचैतन्यैःस्वरूपचैतन्यैःस्वरूपचैतन्येनच आपूर्यतादात्म्येनावच्छिन्नाप्रकाशमानः सन्प्रकाशतइतिप्रकाशंकुरुषे॥अनावृतसाक्षितादात्म्यत्वपरोक्षत्वंतत्रोदर्शितरीयस्यतुच्छस्यचनसंभवतीतिभावः॥तदेवंवैशेषिकादिमतासिद्धाअन्यथाख्यातिवाद्यसमताअसख्यातिश्चनिराकृता॥अस्तुतर्हिदिशोक्याह॥विनेति॥

तेजोभिरापूर्यजगत्समस्तंप्रकाशमानःकुरुषेप्रकाशं॥विनाप्रकाशंतवदेवदेवनदृश्यतेविश्वमिदंक्षणेन॥२६॥

७२ इदंविश्वंक्षणेननदृश्यतेअधिष्ठानसाक्षात्कारेणशीघ्रतरंनदृश्यतीत्यर्थः॥तथाचज्ञाननिवर्त्यत्वान्मिथ्यात्वमितिभावः ७२
अस्तुतर्हिअधिष्ठानमपिमिथ्यैवेत्याशंक्याह॥तवप्रकाशंविनेति॥तवस्वरूपभूतःप्रकाशएवपरंनबाध्यतेनिःसा
क्षिकस्यबाधस्यासंभवेनसर्वबाधावधिभूतत्वादितिभावः॥२६॥

परिदृश्यमानस्यप्रपंचस्यमिथ्यात्वंयुक्त्यंतरेणापिसमर्थयसे॥अल्पेति॥अल्पस्यासावाश्रयश्च अल्पाश्रयः सःस्वापेक्षयाबृहंतमर्थंनधत्तएव॥अत्रदृष्टांतः॥एकोऽणुर्विंध्यशैलंनहिधत्तइति॥ततःकिंतत्राह॥एतज्जगत्त्वत्सूक्ष्ममात्रे अस्तितस्मात्वन्माययैवकृतंनतुवास्तवमितिनिश्चिनोमिनिर्णयामि॥स्वप्नसृष्टिवदितिभावः॥तथाचभ

अल्पाश्रयोनैवबृहंतमर्थंधत्तेणुरेकोनहिविंध्यशैलं॥त्वत्सूक्ष्ममात्रेजगदेतदस्तित्वन्माययैवेतिचनिश्चिनोमि॥२७॥

गवताबादरायणेनस्वप्नस्य प्रातिभासिकत्वेदेशाकालापनोचित्यंसाधयतासूत्रितं॥मायामात्रंतुकार्त्स्न्येनानभिव्यक्तस्वरूपत्वादितिसूत्रार्थस्तु॥स्वप्नसृष्टिर्मायामात्रमेव॥कुतः॥कार्त्स्न्येनसाकल्येन अनभिव्यक्तंउचितदेशकालाद्यसंबद्धंस्वरूपंयस्यास्तथात्वात्नह्यतिसूक्ष्मनाडीमध्येगिरिनदीसमुद्रादीनामुचितोदेशोस्ति॥नयानिशीथेसूर्यग्रहणाद्युचितःकालोस्तीति॥२७॥

स्यादेतत्॥ प्रपंचस्य मिथ्यात्वे कार्यभ्रमता न स्यात्तथा च बंधनिवृत्त्यर्थं शास्त्रमथ नारंभणीयं स्यादित्याशंक्याह॥ रज्जाविति॥ यथा रज्जौ भुजंगो वस्तुतो न जायते नास्ति नाशं च एति तथापि भयं ददातीति भयदः॥ तथा त्वन्मायया आत्मनि प्रपंचः सद्विलक्षणस्वरूपवत्॥ तथा च सति मायिकस्यापि प्रीतिभयाद्यर्थक्रियाकारित्वादादाय श्रवणादि सार्थकमेवे

रज्जौ भुजंगो भयदो यथैव न जायते नास्ति न चैति नाशम्॥ त्वन्मायया केवलमात्मरूपे तथैव विश्वं त्वयि नीलकंठ॥२८॥

ति भावः॥ आत्मरूपमित्यनेन सद्विलक्षणस्य कथं कारणतेति शंकां व्यावर्तयति॥ विद्यमानतामात्रेण तदुपपत्तेः॥ उक्तं च खंडनकृद्भिः सर्वसंबंधनियमहेतुत्वेनास्य एव नो हेतुत्वबहिर्भूतसत्वासत्वकथा हृद्येति॥२८॥ शिवाय नमः

ननु स्वरूपस्य मिथ्यात्वे नीलकंठशब्देन संबोध्यमानविग्रहविशिष्टस्यापि मिथ्यात्वापत्तौ तव विश्वस्याधारत्वं कथं मिथ्यैव स्याद्व्याघातादित्याशंक्य तदुपलक्षितचिन्मात्राभिप्रायेणेदं शरीमित्याह विचार्यमाण इति॥ अविचारदशायां परपरिच्छिन्नस्याधिष्ठानतेति मम भ्रमः स्थितः॥ यद्वा आत्मपरिच्छिन्नपरिमाणे देहावकथं विभोः स्यादिभागप्राह॥ इदानीं तु त्वहोपाधिकादि स्थ

विचार्यमाणे तव यच्छरीरमाधारभावं जगतामुपैति॥ तदप्यवश्यं मदविद्ययैव पूर्णश्चिदानंदमयो मतस्त्वं॥२९॥

निर्विशेषमिति भावः॥ यदिदं तव शरीरं जगतामाधारभावमुपैति॥ आधारतयोपलभ्यते तच्छरीरमपि मम अविद्ययैव त्वं तु पूर्णश्चिदानंदमयो मतः॥ तथा च पूर्णत्वाच्चिल्लीलाविग्रहः प्रपंचस्य तयोराधाराधेयभाव श्रुतिसर्वमभ्यस्तां अत एव पादोऽस्य विश्वा भूतानि पादोहमित्यादिपूर्वोक्तमपि संगच्छत इति भावः॥ तदेवं परिच्छिन्नपरिमाणत्वादिनोपन्यस्तो प्रथमप्रश्नस्योत्तरं अभिलषं॥ इदानीं एकस्यैव बहुभिर्भेदः कुत इति द्वितीयप्रश्नस्याप्युत्तरं अभिलषन्नाह॥ एक इति॥ हे पुरारे किंचिदेव किमपि प्रपंचजीवं तत्तो भिन्नं नास्ति॥ अयं भावः दृश्यस्य नश्वरस्येयोरैक्यवदविद्यकमैक्यं मिथ्याभूतमेवं गृहीत्वा सर्वं ब्रह्मेति व्यवहारः

नचैवमपिव्यावहारिकतयासमानसत्ताकयोर्भेदाभेदयोरनुपपत्तिरेवेति वाच्यं॥ चंद्रप्रादेशिकत्वादेः प्रतिबिंबेअसमानसत्ताकयोरपिभेदाभेदयोरभ्युपगमात्॥ अस्तुवाकश्चिदाविद्यकोधर्मएवतादात्म्यपराभ्युपेतासमवायादिस्थानापन्नः॥ अस्तुवाभिन्नत्वसत्यभिन्नसत्ताकत्वंसर्वथाप्यद्वैताविरोधिभ्यांप्रक्रियायामाग्रहाभावात्॥ यथाहुर्वार्त्तिककाराः॥ यथायभवेत्पुंसोव्युत्पत्तिः प्रत्यगात्मनि॥ सासैवप्रक्रियासाध्वीह्यसासाचानवस्थितेति॥ भिन्नंकमपिनास्त्येवेतितुनिष्कर्षः॥ तद्दुरूहंचास्यतिमिश्रैः॥ नत्वभेदंब्रूमः किंतुभेदव्यासेधामइति॥ इदमेवचोच्यते॥ बाधायांसामानाधिकरण्यमितीति दिक्॥ तर्हि

यज्ञेष्टपूर्त्तादिफलंक्रियाणांभोक्तुंफलंयच्छसियस्त्वमेव॥ मृषैतदेवंवचनंपुरोक्तंत्वत्तोस्तिभिन्नंचनकिंचिदेव ३०॥

कर्मकांडादिकमितिमिथ्यार्थबोधिकाः॥ एवमेवेत्याह॥ मृषेति॥ एतत्पूर्वार्द्धप्रतिपादितार्थकंएवंजातीयमन्यच्चमयाइत्यस्य॥ तर्हि अप्रमाणमेव नेत्याह॥ त्वत्तमेवेति॥ अवांतरतात्पर्यपर्यालोचनायांव्यवहारकालाबाध्यार्थबोधकत्वेनमहातात्पर्यपर्यालोचनायांतुवेदैश्चसर्वैरहमेववेद्यइतिकैवल्योपनिषत्प्रतिपादितरीत्याब्रह्मपरत्वेनप्रमाणमेवेत्यर्थः॥ एतद्वचनमित्यत्रएतच्छब्देननिर्दिष्टमर्थमाह॥ यज्ञेति॥ यज्ञादेयज्ञः॥ इष्टंयागः॥ पूर्त्तंतडागारामादि॥ तथाक्रियाणांफलंस्वर्गादि॥ तच्चभोक्तुंयज्वनः॥ फलंत्वंयच्छसि॥ फलमतउपपत्तेरितिन्यायात्॥ सएवैनमिंद्रःप्रजयापशुभिर्देवस्तर्पयतीत्यादिश्रुतेश्चेति भावः॥ ३०॥

अतएवअविद्यावद्विषयकाणिशास्त्राणीत्याह॥ अज्ञानेति॥ अज्ञानेनमूढाः॥ अतएवमननशीलामुनयःमननस्योपलक्षणत्वादंतःकरणशुद्ध्युपायान्॥ असंभावनादिनिरासोपायांश्चान्वेषयंतःपुरुषाःयज्ञादिभिर्गिरीशस्तोषंभजतीतिवदंति॥ यद्वाअज्ञानमूढाःमूढयंतःसंतोवदंति॥ अविद्यादशामाश्रित्यप्रतिपादयंतीत्यर्थः॥ तच्चमिथ्यातोषस्यमायावृत्तिरूपत्वात्॥ न

अज्ञानमूढामुनयोवदंतियज्ञोपचारादिबहुक्रियाभिः॥ तोषंगिरीशोभजतीतिमिथ्याकुतस्त्वमूर्त्तस्यतुभोगलिप्सा॥ ३१॥ किंचिद्दलंवाचुलुकोदकंवायत्त्वंमहेशप्रतिगृह्यदत्से॥ त्रैलोक्यलक्ष्मीमपियज्जनेभ्यःसर्वंत्वविद्याकृतमेवमन्ये॥ ३२॥

त्वमूर्त्तस्यलिप्सादयःवास्तवाःसंभवंतीतिभावः॥ ३१॥ अस्यैवप्रपंचः किंचिदिति॥ दलंतुलसीबिल्वादिमात्रं॥ चुलुकंकिंचिदेवभक्तेभ्योपहृतंप्रतिगृह्यदत्सीकृतमतंतेभ्योभक्तेभ्यः त्रैलोक्यलक्ष्मीमपिददासीतियत्तत्सर्वंपत्राद्युपहारप्रतिग्रहः त्रैलोक्यतद्दानंचेतिसर्वंआविद्यकमेवमन्येनिश्चिनोमि॥ अविद्याकृतमित्यनेनपूर्वश्लोकस्थस्यमिथ्यात्वस्यानिर्वचनीयतारूपत्वपरनेतिस्फुटीकृतं॥ ३२॥

आप्नोषीति॥ एकः पुराणः पुरुषस्त्वं विश्वं आप्नोषि अधिष्ठानत्वेन तादात्म्यापन्नः सन्न तु गच्छसि तस्मिन्विश्वस्मिन्नष्टेऽपि
तव हानिर्नास्ति। वास्तवे भेदे त्वेवं स्यात्। कल्पितत्वादात्मन्य तु नायं दोषः॥ रजतादिबाधे शुक्त्याद्यवस्थानदर्शनादिति भावः॥
घटेति॥ नष्ट इति संबंधिनो नभस इत्यस्मिन्नर्थे दृष्टांत इति बोध्यं॥ ३३॥ ननूक्तरीत्या वियदादेर्मिथ्यात्वेऽपि जीवानां बहुत्वादि
तत्स्थितिः स्यादेवं तर्हि वियदादिवज्जीवोऽपि मिथ्येति युक्तं बंधमोक्षयोर्वैयधिकरण्यप्राप्तेरित्याशंक्याह॥ यथेति हे देव॥ त्वं अंतः

आप्नोषि सर्वा विदिशो दिशश्च त्वं विश्वमेकः पुरुषः पुराणः॥ नष्टेऽपि तस्मिंस्तव नास्ति हानिर्घटे वि
नष्टे नभसो यथैव॥३३॥ यथैकमाकाशगमर्कबिंबं क्षुद्रेषु पात्रेषु जलान्वितेषु॥ भजत्यनेकप्रतिबिं
बभावं तथा त्वमंतःकरणेषु देव॥३४॥

७५

करणेषु तथा अनेकप्रतिबिंबभावं भजसि। तथेति कथं। यथा आकाशगं एकं अर्कबिंबं क्षुद्रेषु जलान्वितेषु अनेकप्रतिबिं
बभावं भजति॥ अनेन यथा ह्ययं ज्योतिरात्मेति श्रुतेरर्थ उपनिबद्धः॥ तथा च जीवानां पारमार्थिकत्वेऽपि भेदसाध्यत्वान्नाद्वैतक्षतिरिति
भावः॥३४॥

DR. BHAU DAJI MEMORIAL

अन्येयं परमार्थतः॥ सच्चिदानंदरूपत्वं मिथ्याभूतशरीरत्वं च जीवब्रह्मणोरविशिष्टं॥ तथा च संसारिता भगवतोऽपि स्यादित्या
शंक्याह॥ सुसर्ज्जन इति॥ विश्वस्य सृष्टिस्थितिविलयेषु सत्सु तत्प्रयुक्तं कार्यं तव किमस्ति॥ नास्ति॥ अनावृतस्वरूपेण पूर्णा
नंदस्य सर्वदा प्राप्तत्वात्॥ यद्यप्येवं तथापि अनादिभिः प्रवाहानादिभिर्देहभृतां जीवानामदृष्टैः सहकारिभूतैः स्वप्नवत्सर्गा

सुसर्ज्जनेवाप्यवनेविनाशे विश्वस्य किंचित्तव नास्ति कार्यम्॥ अनादिभिर्देहभृतामदृष्टैस्तथा
पि तत्स्वप्नवदातनोषि॥३५॥

दीनातनोषि॥ तथा च सूत्रं॥ वैषम्यनैर्घृण्ये न सापेक्षत्वात्तथा हि दर्शयतीति॥ एवं चावरणतदभावाभ्यां वैलक्षण्यं उपा
धिकृतमतस्य प्रतिबिंबमुखवदेव आवरणस्यापि जीवनिष्ठत्वमेव स्थितत्वादिति भावः॥३५॥ ॥शिवायनमः॥

ननुस्थूलशारीरस्यैवप्रमातृत्वकर्तृत्वादिकमितिलोकायताआहुः॥ अहंकाराख्यसूक्ष्मदेहस्यप्रमातृत्वादितिसां
ख्याः॥ तदुभयंविहायचैतन्यस्यैवान्वयःकिमर्थंस्वीकर्तव्यइत्याशंक्याह॥ जडेति॥ हेरांभोःस्थूलस्यसूक्ष्मस्यवादेहस्यपरि
णामभूतोचेच्चित्तर्हिजडस्यभूतासाजडैवस्यात्॥ ततःकिंतत्राह॥ अविनानास्तीति॥ अतत्वोऽस्यः आत्मा॥ अतस्तितत्य

स्थूलस्यसूक्ष्मस्यजडाजडस्यदेहस्यरांभोनचिदंविनास्ति॥ अतस्त्वदारोपणमातनोतिश्रुतिःपु
रारेसुःखदुःखयोःसदा॥३६॥

मनेउप्रत्ययःयह॥ अयतेप्रकाशतइतिअः॥ साक्षी॥ अयगतौ॥ अचिदू॥ ननुचिपू॥ गुरुप्रसंगात्॥ तंविनाअस्तिन॥
अयंभावः॥ जडपरिणामोजडःस्यात्॥ सचस्वप्रकाशात्मचैतन्यसंबंधाः॥ नचजडेज्ञानमेवस्वप्रकाशंइतिपुरं॥ बहूनां
स्वप्रकाशत्वेगौरवेणसुषुप्त्यनुसंधानंचलसिद्धस्यएकस्यैवप्रकाशत्वकल्पनात्तदास्यैवचआत्मत्वात्॥ नचायं

केवलसाक्षीएव॥ किंतुएतदुपष्टभ्यासक्तिरपिचैतन्येचंदंद्रीयतीत्याह॥ अतइति॥ अतउक्तात्तर्कान्निर्णीततात्पर्याश्रुतिः
स्वेनसजीवःसुखदुःखभोक्तेतिकैवल्योपनिषत्प्रभृतिः२ कासुखदुःखयोःत्वदारोपणंबिंबीभूतेत्वय्यारोपंसदायावदा
विद्यंआतनोति॥ उत्तरमीमांसायांकर्तृशास्त्रार्थवत्वादित्यधिकरणमपीहानुसंधेयं॥३६॥ सच्चिदंभोधेहंसइव॥ तस्मै॥

नमःसच्चिदांभोधिहंसायतुभ्यंनमःकालकंठायकालात्मकाय॥ नमस्तेसमस्ताघसंहारकर्त्रेन
मस्तेमृषाचित्तवृत्त्यैकभोक्त्रे॥३७॥ एवंप्रणम्यविश्वेशंपुरतःप्रांजलिःस्थितः॥ विस्मितःपरमप्रीतं
जगदरघुनंदनः॥३८॥ उपसंहरविश्वात्मन्विश्वरूपमिदंतव॥ प्रतीतंजगदैकात्म्यंशंभोभवदनुग्रहात्
॥३९॥

लीलाविग्रहस्यकर्पूरगौरतयाहंसत्वेनोत्प्रेक्षा॥ मृषाभूतानांएकस्मैअसाधारणायभोक्त्रे॥ सुखदुःखादिनिखिलमनो
वृत्तिसाक्षिणइत्यर्थः॥३७॥ पुरतइति॥ संनिधानादीश्वरस्यैवपुरतःस्थितः॥ जगदेजगादआत्मपदं॥३८॥

पश्येति ॥ पूर्वार्द्धं भगवद्वाक्यं ॥ उत्तरार्द्धमारभ्य सूतवाक्यं ॥ ४० ॥ ४१ ॥ व्याघ्रचर्मैवांबरं ॥

श्रीभगवानुवाच ॥ पश्य राम महाबाहो मत्तो नान्योस्ति कश्चन ॥ इत्युक्त्वैवोपसंजह्रे स्वदेहे देवतादिकान् ॥ ४० ॥
मीलिताक्षः पुनर्हर्षाद्यावद्रामः प्रपश्यति ॥ तावदेव गिरेः शृंगे व्याघ्रचर्मोपरि स्थितं ॥ ४१ ॥ ॥
ददर्श पंचवदनं नीलकंठं त्रिलोचनं ॥ व्याघ्रचर्मांबरधरं भूतिभूषितविग्रहं ॥ ४२ [illegible] ॥
फणिकंकणभूषाढ्यं नागयज्ञोपवीतिनं ॥ व्याघ्रचर्मोत्तरीयं च विद्युत्पिंगजटाधरं ॥ ४३ ॥

॥ तस्य धरं अंतरीयरूपेण धारकं ॥ उत्तरीयस्योत्तरश्लोके पृथगुपादानात् ॥ ४२ ॥ ४३ ॥

मृगो हस्ते यस्येति । विग्रहे आहिताग्न्यादित्वात् मृगशब्दः परः सप्तमीति वा समर्थयितव्यं यद्वा ॥ मृगसहितो हस्तो यस्येति वा ॥ लक्षणया च साहित्यलाभेन न तु मध्यमपदलोपी समासः ॥ प्रहृतेति द्वितीयकानामप्रवृत्तेः आध्यकारैः सर्वत्र तत्

एकाकिनं चंद्रमौलिं वरेण्यमभयप्रदं ॥ चतुर्भुजं खड्गपरशुं मृगहस्तं जगत्पतिं ॥ ४४ ॥
अथाज्ञया पुरस्तस्य प्रणम्योपविवेश राघवः ॥ ४५ ॥ अथाह रामं देवेशो यद्यत्प्रष्टुमभीप्सितं ॥
तत्सर्वं पृच्छ राम त्वं मत्तो नान्योस्ति ते गुरुः ॥ ४६ ॥ ॥ इति पद्मपुराणे शिवगीतायां सप्तमोध्यायः ७ ॥

व्याख्यानाद्येति दिक् ॥ परशुं मृगो चोर्ध्वहस्तद्वयबोध्यौ ॥ तथा च हृदन्तो वक्ष्यति ॥ पराभ्यामूर्ध्वहस्ताभ्यां बिभ्राणं परशुं मृगमिति ॥ ४४ ॥ ४५ ॥ ४६ ॥ ॥ इति श्रीपद्मपुराणे शिवगीतासूपनिषत्सु विश्वरूपदर्शनं नाम सप्तमोध्यायः ॥ ७ ॥

सप्तमाध्यायशेषेत्वंनुभोक्तं ॥ यद्यत्प्रष्टुमभीप्ससि ॥ तत्सर्वं पृच्छ राम त्वमिति ॥ तदेवोपजीव्य लोकान्प्रति विरक्त्यादिदार्ढ्योपप
न्नत्वं शरीरादिभिः सारत्वं महेश्वरमुखेनैव प्रकटीकर्तुं प्रश्नं प्रागुक्तरीत्या निरूप्य ततस्तयः सन्नन्विपृच्छति पांचभौतिकेति ॥

श्रीरामउ० ॥ पांचभौतिकदेहस्य चोत्पत्तिर्विलयः स्थितिः ॥ स्वरूपं च कथं देव भगवन्वक्तुमर्हसि ॥ १ ॥
श्रीभगवानुवाच ॥ पंचभूतैः समारब्धो देहोऽयं पांचभौतिकः ॥ तत्र प्रधानं पृथिवी शेषाणां सहकारिता ॥ २ ॥

७८

देहे लिंगशरीरे पांचभौतिके देहस्थूलशरीरस्य उत्पत्त्यादिकं कथं देव वक्तुमर्हसि प्रधानमिति ॥ पृथिव्यंशस्य भूतैर्यस्त्वादिति
भावः ॥ शेषाणामिति ॥ जलादीनामित्यर्थः ॥ तदंशस्याल्पत्वस्त्वादिति भावः ॥ २ ॥

७८

उद्भिदंति भूमिमित्युद्भिदः ॥ ग्रस्यादिः ॥ इगुपधलक्षणः कप्रत्ययः ॥ प्रधानत्वादिति ॥ धर्मधर्माधिसाधनतया पुरुषार्थसाधन
येनाभ्यर्हितत्वान्मनुष्यदेहस्येति भावः ॥ ४ ॥ शुक्रशोणिताभ्यां संभूता वृत्तिर्यस्य तथाभूत एव न तु निरपेक्षोत्पत्तिकोपि ॥ ज

जरायुजोऽण्डजश्चैव स्वेदजोद्भिज्जस्तथा ॥ एवं चतुर्विधः प्रोक्तो देहोऽयं पांचभौतिकः ॥ ३ ॥ मान
सोऽपि परः प्रोक्तो देवानामेव संभवः ॥ तत्र वक्ष्ये प्रथमतः प्रधानत्वाज्जरायुजं ॥ ४ ॥ शुक्रशोणित
संभूता वृत्तिरेव जरायुजः ॥ ५ ॥ स्त्रीणां गर्भाशये शुक्रमृतुकाले विशेत्तदा ॥ रजसा योषितो युक्तं
देहस्याज्जरायुजं ॥ ६ ॥

शये जातो जरायुजः ॥ स्त्रीणामिति ॥ गर्भ आसमन्तात् शेतेऽस्मिन्निति गर्भाशयः ॥ पेशीविशेषो जरायुर्नाम वाच्यः ॥ गर्भाशये जरायुः स्या
दित्यमरः ॥ तस्मिन्यदा शुक्रं ऋतुकाले वक्ष्यमाणलक्षणे विशेत्तदा योषितो रसा युक्तं तद्देहशुक्रं जरायुजं स्यात् ॥ ६ ॥ ॥

बाहुल्यादिति॥ बाहुल्यात्स्त्री॥ शुक्राधिक्याचुपमान्॥ शुक्रशोणितयोः साम्येतुनपुंसकं भवति॥ षंढो भवतीत्यर्थः॥ नस्त्री
पुंसोनपुंसकं॥ नभ्राएनन्यादितिसाधुः॥ तृतीयाप्रकृतिः॥ षंढः क्लीबः षंढोनपुंसकमित्यमरः॥ नपुंसको भवती
महाभाष्यप्रयोगात्पुल्लिंगपाठेपिसाधुरेव॥७॥ ऋतुस्नातेति॥ अत्रोनारार्थेट पृथग्वाक्यं॥ प्रथमतृतीयार्ध्ययोरसंबंधः॥

बाहुल्याद्रजसः स्त्रीस्याच्छुक्राधिक्येपुमान्भवेत्॥ शुक्रशोणितयोसाम्येजायेततुनपुंसकं॥
ऋतुस्नाताभवेन्नारीचतुर्थदिवसेततः॥ ऋतुकालस्तुनिर्दिष्टआषोडशदिनावधि॥ तत्रायु
ग्मदिनेस्त्रीस्यात्पुमान्युग्मदिनेभवेत्॥७॥

तद्यथा॥ षोडशदिनरूपोवधिः॥ षोडशदिनावधिः॥ तमभिव्याप्येत्याषोडशदिनावधि॥ तथाचरजोदर्शनादारभ्यषोड
शदिवसात्मकः॥ ऋतुकालोनिर्दिष्टः॥ शास्त्रकारैरितिशेषः॥ एवंस्थितेनारीचतुर्थदिवसेऋतुस्नाताभवेत्॥ ततश्चतुर्थदि
वसानंतरं॥ तत्रऋतावयुग्मदिनेपंचमादौस्त्रीस्यात्॥ युग्मदिनेषष्ठादौपुमान्भवेत्॥ यद्यपिरजोबाहुल्यादिकंस्त्रीत्वादौहे

तुतयाप्रयुक्तं॥ तथापिअयुग्मायांरजोबाहुल्येयुग्मायांचतावद्विरोधएव। यदात्वयुग्मायांशुक्रबाहुल्यंतदातुपुमा
नेवभवतिकिंतुस्त्र्याकृतिः॥ कालरूपनिमित्तकारणापेक्षयाउपादानकारणीभूतस्यरजसः प्राबल्यादितिविज्ञानेश्वरप्र
भृतयः॥ एवंयुग्मायांरजोबाहुल्येपिस्त्र्येवपुरुषाकृतिर्भवतीतिबोध्यं॥ अत्रचषोडशदिनात्मकमृतुंनिर्दिश्यचतुर्थदिव
सानंतरमेवपुत्राद्युत्पत्तिंवदताआद्यंचतुष्टयंवर्ज्यमितिसूचितं॥ तथाचयाज्ञवल्क्यः॥ षोडशर्तुनिशास्त्रीणांतासुयुग्मा
सुसंविशेत्॥ ब्रह्मचर्येवपर्वण्याद्याश्चतस्रश्चवर्जयेदिति॥ तत्रचतुर्थ्यांतैत्रैकल्पिकंगमनंबोध्यं॥ विहितप्रतिषिद्धत्वा
त्॥ तथाचहारीतोवदति॥ चतुर्थेह्निस्नातायांगर्भाधानमप्यसमर्थमिति॥ व्याससस्तुनिषेधमिति। चतुर्थेसानंतव्ये
ति॥ अवस्थितश्चायंविकल्पः॥ रजोनिवृत्तौसत्यांचतुर्थ्यांगंतव्या॥ तदनुवृत्तौप्रतिषेधइति॥ तथाचमनुः॥ रजस्युप
रतेसाध्वीस्नातेनस्त्रीरजस्वलेति॥ साध्वीगर्भाधानयोग्यत्यर्थइतिमाधवाशयः॥ आपस्तंबोपि॥ स्नानंरजस्वलायास्तु
चतुर्थेह्निविशस्यते॥ गम्यानिवृत्तिरस्तीजेनानिवृत्तकथंचनेति॥८॥ राजाक्षत्रियः॥ तथाचवेष्ट्यधिकरणेराजशब्दःक्षत्रि
यत्वजातिवचनोनतुप्रजापरिपालनमात्रनिमित्तकइतिस्थितं॥ ब्राह्मणादिस्तुषोडशोज्ञानसंपन्नोभवतीतिबोध्यं॥ तदु
क्तं॥ लिंगपुराणेचतुर्थसानगम्याह्निगतास्यायुःप्रसूयते॥ विद्याहीनंव्रतभ्रष्टंपतितंपारदारिकं॥ दारिद्र्यार्णवमग्नंचतन्

यंवाप्रसूयते॥ कन्यार्थिनैवगंतव्यापंचम्यांविधिवत्पुनः॥ षष्ठ्यांगम्यांमहाभागसत्पुत्रजननीभवेत्॥ सप्तम्यांचैवकन्या-
र्थीगच्छेत्सैवप्रसूयते॥ अष्टम्यांचैवसंपन्नंतनयंसंप्रसूयते॥ नवम्यांदारिकार्थीस्याद्दशम्यांपंडितंतथा॥ एकादश्यांवकन्य-
कास्याद्द्वादश्यांकुलसुतः॥ त्रयोदश्यांतथानारीवर्णसंकरकारिणी॥ चतुर्दश्यांयदागच्छेत्सुपुत्रजननीभवेत्॥ पंचदश्यां
चधर्मज्ञंषोडश्यांज्ञानपारगमिति॥ स्यादेतत्॥ त्रिवर्गानाध्यमलोकस्यक्षत्रियविषयीत्वमसंगतं॥ तेषांचतुर्दशादिवसेष्वप्यृतु

षोडशेदिवसेगर्भोजायतेयदिसुभ्रुवः॥ चक्रवर्तीतदाराजाजायतेसनसंशयः॥१०॥

संगमनचरमावधित्वात्॥ तथाचजातिभेदेनोपगमकालविशेषमाहदेवलः॥ ब्राह्मण्यांद्वादशाहंस्याद्द्वेदेरक्तऋतुसंगमः॥
दशाहेषट्चशूद्राणांविधीयतेऽनुपूर्वशइति॥ पंचदिवसादारभ्यद्वादशादिसंख्यावगतअवधिमाधवादयः॥ नचऋतौगच्छे-
देतिनियमस्यक्षत्रियंप्रतिचतुर्दशदिवसपर्यंतमेवांकुरीत्वात्प्रवृत्तावपितदुत्तरकालेऽगतः॥ प्रसक्तिःकेनवार्यते॥ इतिवाच्यं
॥ अनृतौगमनस्यनिषिद्धत्वात्॥ यथाहबोधायनः॥ ऋतौनोपैतियोभार्यामनृतौयश्चगच्छति॥ तुल्यमाहुस्तयोःपापमयोनौयश्च
सिंचतीति॥ अस्यचनिषेधस्यक्षत्रियंप्रतिपंचदशदिवसमारभ्यप्रवृत्तेः॥ नचनिषेधोल्लंघनेनप्रवृत्तस्यषोडशदिवसरूपकालब-

लेनचक्रवर्तीपुत्रोभवति॥ शंकाग्रंथार्थद्वितीयुक्तं॥ चतुर्थदिवसेतत्रास्यादिपूर्वग्रंथस्यरसेनानिषिद्धानामेव
यकुमुचितत्वादितिचेन्न॥ यथाकामीभवेद्वापिस्त्रीणांवरमनुस्मरन्नितियाज्ञवल्क्यादिवचनैःस्त्रीकामनायसं-
त्यांअनृतावपिगमनस्यानियमितत्वयानेनानृतौनगच्छेदितिनिषेधस्यस्त्रीविषयेबाधेनतत्फलपरत्वस्यैवत्रिवर्गा
तावाक्येअभिप्रेततयासर्वसामंजस्यात्॥ नचैवंयथाकामीभवेदेवेत्यनेनअनृतौनगच्छेदितिनिषेधस्यवइतरेषा-
मपिनिषेधानांबाधापत्तिः॥ संतिचेतरेऽपिनिषेधाः॥ मघामूलंचवर्जयेदितियाज्ञवल्क्योक्तिः॥ अमावस्यामष्टमींच
पौर्णमासींचतुर्दशीं॥ ब्रह्मचारीभवेन्नित्यमप्यृतौस्नातकोद्विजइतिमनूक्तेःइतिवाच्यं॥ यथाकामीत्यस्योक्तदोष-
रहितानृतुमात्रपरतयावचनबलेनव्यवस्थापनात्॥ तथाचविष्णुपुराणेऽनोंयेनोक्तं॥ इतिमत्वास्वदारेषुऋतु-
मत्सुनरोव्रजेत्॥ यथोक्तदोषहीनेषुसकामेष्वनृतावपीति॥ एतेनश्राद्धादिदिवसेष्विनियमह्यापृष्टमेनातिप्रसं-
गापादनपरास्तांऋतुस्नातांगच्छेदेवेतिनियमस्यश्राद्धादौब्रह्मचर्यविधानस्यचपरस्परपरिहारेणलब्धावकाश-
स्यसामान्यविशेषभावनापन्नस्यक्वात्रप्रसक्तेःकिंबाध्यंइतिसंशयेगच्छतोऽपिनब्रह्मचर्यभंगइत्याशय-
नब्रह्मचर्यमेवेतिमूलमितिविज्ञानेश्वरेणव्याख्यातं॥ तदुक्तंसः॥ ऋतुकालेनियुक्तोवानैवगच्छेत्स्त्रियंयदिचेत्॥ इ-
तिश्राद्धप्रकरणस्थऋष्यमनुवचनविरोधात्॥ तस्मान्नारींवेपिदिवावर्जादित्येवलिखितस्मृतिप्रतिप्रसूततयाउपमन्य-
हो॥ आथर्वणश्रुतिवाक्यद्वयाज्ञवल्क्यग्रंथेऽपिब्रह्मचर्येतिकिरप्यर्थवादरूपेतिमाधवाचार्यप्रभृतीनांग्रंथरोऽयमबलइति
दिक्॥ श्रुतिस्त्विथंप्रमाणंवाएतेप्रस्कंदंतियेदिवारत्यासंयुज्यंतेब्रह्मचर्यमेवतत्॥ यद्रात्रौसंयुज्यंतइति॥१०॥

MEMORIAL

तत्पत्नेयदिति॥ततस्मात्कारणात्॥ वत्तघृतस्तातोदृत्ताविसव्ययेषमरः॥११॥ जरायुतत्राब्दस्ययोगरूढतांदर्शयिष्यन्पूर्वपदा
र्थतावदाहयास्त्रीति॥सूक्ष्मायास्त्रीचर्मावृत्तिः॥स्त्रीसंबंधिनी चर्मरूपा आवणसाधनी भूतापत्री साजरायुरिति निगद्य
तेयद्यपिगर्भाशयेजरायुःस्यादित्यमरेणजरायुशब्दः पुल्लिंगएवोक्तः साहचर्याच्चकुत्रचिदितिपरिभाषितत्वात्तथापि

ऋतुस्नातायस्यपुंसः साकांक्षंमुखमीक्षते॥तदाकृतिर्भवेद्गर्भस्तत्पत्न्येयत्स्वामिनोमुखं॥११॥
यास्त्रीचर्मावृतिःसूक्ष्माजरायुःसानिगद्यते॥शुक्रशोणितयोर्योगस्तस्मिन्नवभवेद्यतः॥१२

उद्देश्यलिंगानुरोधेनजरायुःसेतिनिर्देशोनविरुध्यते॥कर्मणायमभिप्रेतिसंप्रदानमितिवत्॥यदात्तुविधेयलिंगानुरो
धस्तदाजरायुःसइत्यभिप्रयोगः॥साधु॥तेरणोयत्कर्मणोचसकर्णेतिवत्॥अतएवाहकैयटः॥उद्दिश्यमानप्र
तिनिर्दिश्यमानयोरेकत्वमापादयंतिसर्वनामानिक्रमेणोभयलिंगभांजीति॥तस्मिन् जठराये॥यतोयोगः॥तस्मात्
तत्रजरायौगर्भोभवेत्॥यस्माच्चजरायौभवेत्तेनहेतुनाजरायुजःप्रोक्त इतितस्माच्छब्दाध्याहारेणतत्रगर्भोभवेदितिपदत्रय
स्यचारत्या योज्यं॥१२॥

१३।१४।जन्मकर्मेति।जन्मजननं।आगतिविशेषावृक्षभवारीरात्मजः।तदनुकूलंयत्कर्मतद्वशादेवस्त्रीयोनौ
निषिक्तं शुक्रंरजसासंमिलितंद्रवीभूतंसत्प्रथममासितिष्ठति॥१५॥बुद्बुदमिति।इदंसर्वंकिंद्रवीभूतंशुक्रंयत्
तद्बुद्बुदरूपं।कललंपेशी।घनंचभवतीतिप्रथममासमध्येक्रमभाविन्यश्चतस्रोवस्थाःदृष्टाः।द्वितीयमास

तत्रगर्भोभवेद्यस्मात्तेनप्रोक्तोजरायुजः॥अंडजाःपक्षिसर्पाद्याःस्वेदजामशकादयः॥१३
उद्भिज्जावृक्षगुल्माद्यामानसाश्चसुरर्षयः॥१४॥जन्मकर्मवशादेवनिषिक्तंस्मरमंदिरे
शुक्रंरजःसमायुक्तंप्रथमेमासितद्द्रवत्॥१५॥बुद्बुदंकललंतस्मात्ततःपेशीभवेदिदं॥पे
शीघनंद्वितीयेतुमासिपिंडःप्रजायते॥१६॥करांघ्रिशीर्षकादीनितृतीयेसंभवंतिहि॥अभि
व्यक्तिश्चजीवस्यचतुर्थेमासिजायते॥१७॥

तुपिंडोजायते१६॥अभिव्यक्तिश्चेति।जीवस्यजीवोपाधेःलिंगशरीरस्येतियावत्।अभिव्यक्तिःस्पा
यभिव्यक्तिश्चतुर्थेमासिजायते॥१७॥ततोदुःखाद्यभिव्यक्तेर्हेतोःजठरस्थतापिस्तनएवगर्भश्चलति१८।१९।

अंगेति। तदा तु यैमासे। अंगानि करचरणादीनि। प्रत्यंगानि अंगुल्यादीनि तेषां भागा अंशाः सूक्ष्मा युगपत्स्युः।
श्मश्रुदंतादीन् विहाय। तथा च श्मश्रुप्रभृतयः परं न जायंते इति रक्तकरचरणप्रम

ततश्चलति गर्भोऽपि जनन्याजठरे स्थितः ॥ पुत्रश्चेद्दक्षिणे पार्श्वे कन्या वामे च तिष्ठति ॥१८
नपुंसकस्तूदरस्य भागे तिष्ठति मध्यतः ॥ अतो दक्षिणपार्श्वे तु शेते माता पुमान्य
दि ॥१९॥ अंगप्रत्यंगभागाश्च सूक्ष्माः स्युर्युगपत्तदा ॥ विहाय श्मश्रुदंतादीन्
जन्मानंतरसंभवान् ॥ चतुर्थे व्यक्तता तेषां भावानामपि जायते ॥२०॥ पुंसां
स्थैर्यादयो भावा भीरुत्वाद्याश्च योषितां ॥ नपुंसके च तन्मिश्रा भवंति रघुनंदन २१

तेऽपि सूक्ष्माः जायंते प्रथमं। पश्चाच्चतुर्थ एव तेषां करचरणावयवानां। तथा व्यक्तता जायते। तथा भावानामपि
वक्ष्यमाणानां चतुर्थ एव व्यक्तता जायते। २०। के ते भावा इत्याकांक्षायामाह। पुंसामिति। भीरुत्वं चांचल्यं। भीरुता
मियं स्त्रीलिंगमिति महाभाष्यप्रयोगस्य तस्यैव व्याख्येयव्याख्यानत्वात्। २१।

मातृजमिति। यतो मासद्वयं च। ततो मातुराकांक्षितान्विषयानभिकांक्षति। अतएव गर्भवि
वृद्धये मातुर्मनसोऽपि यदन्नपानादि अभीष्टं तत्कुर्यात् ॥२२॥ तां चेति। तां गर्भिणीं समानाका
ङ्क्षायतीं। अतएव द्विहृदयत्वात्तां नारीं दौहृदिनीमाहुः। इष्टादराद्दृश्या साधुः। उक्तं च

मासे चास्य हृदयं विषयानभिकांक्षति। ततो मातुर्मनोऽभीष्टं कुर्याद्गर्भविवृद्धये २२
तां च द्विहृदयां नारीमाहुर्दौहृदिनीं ततः ॥ अदानाद्दौहृदानां स्युर्गर्भस्य व्यंगतादयः
२३ सुश्रुतः। द्विहृदयां नारीं दौहृदिनीमाचक्षते। तत्तदभिलषितं दद्याद्वीर्यवंतं चिरायुषं पुत्रं जन
यतीति। गर्भवृद्धये मातुरिष्टं देयमिति प्रागुक्तं। अदाने तु न केवलं वृद्ध्यभावः किंतु व्यंगतादयोऽपि। साह। अ
दानादिति। दौहृदानां गर्भिण्या अभिलषितार्थानां अदानाद्गर्भस्य व्यंगतादयः ॥ अंगन्यूनताकु
रूपत्वं अत्राक्तं चेत्यादयः स्युः। यदाह याज्ञवल्क्यः। दौहृदस्याप्रदानेन गर्भो दोषमवाप्नुयात्।
नः वैरूप्यं मरणं वापि तस्मात्कार्यं प्रियं स्त्रियाः इति ॥२३॥

किंच। मातुर्यद्दूषयेल्लोभः तथैवार्थयेत। आकांक्षेतइति तथार्थः सुतो जायते। मातृजं चास्य हृदय
मिति प्रागेवोक्तत्वात्। प्रबुद्धमिति। पंचममासे चित्तं प्रबुद्धं चतुर्थमासापेक्षया अधिकतरज्ञानव
द्भवति। तथा मांसशोणितयोः पुष्टता च भवति। २४। षष्ठइति। नखराणि नखानि। नखाः
नखरा स्त्रियां नि समरः २५। पादाभ्यामंतरितौ यौ हस्तौ ताभ्यां श्रोत्रयोः कर्णयोः रं

मातुर्यद्दूषयेल्लोभस्तथार्थो जायते सुतः। प्रबुद्धं पंचमे चित्तं मांसशोणित
पुष्टता २४। षष्ठेस्थिस्नायुनखरकेशलोमविविक्तता। बलवर्णोपचयौ तौ स
प्तमे चांगपूर्णता। २५। पादांतरितहस्ताभ्यां श्रोत्ररंध्रे पिधाय सः। उद्विग्नो गर्भ
८३ संवासादस्ति गर्भभयान्वितः। २६। आविर्भूतप्रबोधोसौ गर्भदुःखादि ८३
संयुतः। हा कष्टमिति निर्विण्णः स्वात्मानं शोचते तथ २७ ७ ।५ ५

ध्रे छिद्रे पिधाय आच्छाद्य गर्भसंवासादुद्विज्यमानो दुःखप्रयोजकादुःखः संजातोद्वेगः त
था गर्भयिन भाविगर्भांतरप्रतिसंधानजनितेन भयेनान्वितः सन्स गर्भे अस्ति तिष्ठति २६ नि
र्विण्णः पश्चात्तापवान्। शोचती पुनःपुनरतिशयेन वा शोचतीत्यर्थः यद्दुर्गतात्यापस्यामिदं २७

एवंस्मरन्निति वक्ष्यति॥ तत्रैवं शोचनार्थमाह श्लोकषट्केन॥ अनुभूता इति॥ महासह्याश्शताः पुरस्थ महासह्यपुरः॥
नारकिशरीराणीत्यर्थः॥ पूर्वानुभूतस्य शरीरस्य वाचिनः कर्मधारये कृते कस्य पूरिति समासांतो च कृते परवल्लिंगं द्वंद्वतत्पु
रुषयोरिति स्त्रीत्वात् पूकारं भेति॥ करंभोदधिसक्तवः॥ तत्संबंधिन्यो वालुकाः। यत्र भर्जनार्थं तप्ताः सिकतामयास्तप्ताः अत

अनुभूता महासह्यपुरा मर्मच्छिदोसकृत्॥ करंभवालुकातापाग्न्यादत्यंतासु
खान्वयाः॥२८॥ जठरानलसंतप्ताः पितारव्यरसविप्लुषः॥ गर्भाशये निमग्नं तु दह
त्यति भृशं हि मां॥२९॥ उदर्यक्रिमिवक्त्राणि कूटशाल्मलिकंटकैः॥ तुल्यानि च तु
दंत्यार्तं पार्श्वास्थिक्रकचार्दितं॥३०॥

वासुखं दुःखं आशेते एषितः सुखान्वयाः सर्मस्थानानि दहंतः करंभवालुकाभिरेव तप्यमानाभिः मदीयानि मर्मस्थाना
निरूपानीत्यर्थः॥२८। उदर्येति। उदरे भवा उदर्याः शरीरावयवाद्यत्। उदर्याणां क्रिमीणां वक्त्राणि आर्तं मां तुदंतीत्यर्थः
॥ कीदृशानि वक्त्राणि कूटशाल्मलेः कंटैः तुल्यानि। कीदृशं मां॥ पर्श्वयोर्मातुः पार्श्वभागयोर्मातुः पार्श्वभागयोर्यान्यस्थीनि
तान्येव क्रकचास्तैरर्दितं पीड्यमानं॥३०॥

गर्भइति॥यदुःखंगर्भेण आप्तंतस्माद्दुःखात्तत्कुंभपाकाख्येनरके जातंकुंभपाकजं नदुःखमतिशयेन अल्पंकनीयः युवा
ल्पयोः कनित्यादेशः ॥३१॥ ३२ गर्भेद्र्याप्या इति । मयायाद्दुःखं अपि प्राप्तं कर्मीलतु ॥ बल
दुःखंकर्मनरकेषु यतदुःखंकस्तत्नातिरिच्यते।

गर्भे दुर्गंधभूयिष्ठे जठराग्निप्रदीपिते॥ दुःखं मयाप्तं यत्तस्मात्कनीयः कुंभपाकजं ॥३१
दृग्यासृक्श्लेष्मपायित्वं वांताशित्वं च यद्भवेत्॥ अशुचौ कृमिभावश्च तत्सर्वं गर्भशायिनः॥३२
गर्भशय्यां समारुह्य दुःखं यादृङ्मयाप्पितं॥ नातिरिच्यते महद्दुःखं निःशेषं नरकेषु यत्॥३३
एवं स्मरन्पुरा प्राप्तान् नानायातीश्च यातनाः॥ मोक्षोपायमभिध्यायन्वर्तते अभ्यासतत्परः ३४

अहो आकल्पभोक्तव्य नरकादप्यसह्यं गर्भे दुःखमित्यर्थः॥३३॥ एवमिति। नानाविधा जाता
अध्याल याधा। यातनाः तीव्रवेदनाः स्मरन्निति संबंधः। अतो जातसंतान् छोन संभाव्यते। अभ्युपर
तो द्वासमर्थस्तमपि समर्थनीयम्॥३४॥ शिवाय नमः॥

रक्तं च शुक्लं च श्रुत्वं। आईषत्पीतं रक्तं च ओजस्तेजः शब्दवाच्यं धातुपरिणामविशेषः सकं जीवनेयात्रिमित्तं तदष्टमे मासि
मतं ३५ मातरमिति। तत्रह्येकिमोजः चंचलत्वात् हितं चलतीति चंचलं। अतएव पुनर्मातरं पुनर्भगर्भं प्रधावति। ततोहेतोः
अष्टमे मासि जातो न जीवति॥३६॥ उसाप्रागुक्तेन तस्य कः। किं चाह इति। नवमादिषु प्रसवस्य समयः स्यात्॥

अष्टमे त्वक्श्रुती स्यातां ओजस्तेजश्च हृद्भवं॥ शुक्लापीतरक्तं च निमित्तं जीवितं मतं ३५॥
मातरं च पुनर्गर्भं चंचलं तत्प्रधावति॥ ततो जातोऽष्टमे मासि न जीवेत्सोजसोज्झितः ३६
किंचित्कालमवस्थानं संस्कारात्पीडितांगवत्॥ समयः प्रसवस्यात्तान्मासेषु नवमादिषु ३७

तथाच श्रुतिः। दशमे मासि सूतवा इति स्मर्यते याज्ञवल्क्येन। नवमे दशमे मासि प्रबलैः सूतिमारुतैः। निःसा
र्यते बाण इव यंत्रच्छिद्रेण सज्वर इति। पुनः प्रसवमासेषु किंचित्काल संस्कारात् पूर्वसंयोजकादृष्टवशात् अवस्था
नं चास्य परिसज्य अवस्थितिः। अत्र दृष्टांतः पीडितांगवादिति। यथा भाराद्यैर्नाश्रांतः किंचित्कालं सुखमुत्थ्यादिभि
श्चलः सन्नाक्रांत इत्यर्थः ३७

मातुरिति। अस्रं शोणितं वहति प्रवहः स्य नयासा अस्रवहा। तां नाडीमाश्रित्य नाभिस्थ नाडी अवनेता गरिता विस्तारि
ता। साच गर्भस्य मात्राहार संबंधिनं रसमावहतीति तथा भूता बोध्या। आवहे। कुवलात्पचाद्य... चिपश्चाद्रसेन षष्ठी
तत्पुरुषः। तेन कारणेन मात्राहारेण योषितः सन् गर्भोपि जीवति।।३८।। मेदश्च अस्रक् च ताभ्यां दिग्ध उपचितं सर्वमंगं
यस्य स तथाभूतः।।३९।।

मातुरस्रवहां नाडीमाश्रित्यान्ववतारिता।। नाभिस्थनाडी गर्भस्य मात्राहाररसावहा।।३८।।
तेन जीवति गर्भोपि मात्राहारेण पोषितः।। अस्थियंत्रविनिःपिष्टः पतितः कुक्षिवर्त्मना।।३९।।
मेदोसृग्दिग्धसर्वांगो जरायुःपुटसंवृतः।। निष्क्रामन् भृशदुःखार्तो रुदन्नुच्चैरधोमुखः।। यंत्रा
द्विविनिर्मुक्तः पतत्युत्तानशायुत।।४०।। अकिंचित्कस्तदा लोके मांसपेशीवदास्थितः।। श्व
मार्जारादिदंष्ट्रिभ्यो रक्ष्यते दंडपाणिभिः।।४१।।

उत्तानः शेते स उत्तानशायी। उतेति अपि वसर्थः। अकिंचित्क इति। तदा मांसपेशीवत् आस्थितो दृश्यमानो सौ श्वमा
र्जारादिभ्यो भक्षणार्थमागतेभ्यो दंडपाणिभिर्लोकैः स्वजनैः रक्ष्यते। न तु स्वरक्षणे स्वयं समर्थो भवति। तद्भावः अत्र हेतु
माह। अकिंचित्क इति। अविद्यमानं किंचित् विवेकः शरीरपाटवादिरक्षणसाधनं यस्य सः। अकिंचित्कः ४१

पित्रवदिति। राक्षसमपि पित्रवेदिति जानाति। डाकिनी राक्षसी शेषं मातृवेदिति। पूयं च क्षीरवदिति। अज्ञानात् विवेकाभावात्
उपलक्षणं चैतत् दृष्टा हृदयीति। शिशोर्भावः शैशवं। तत्र दीर्घकष्टं यस्मिन् तादृशं।४२। देवात् कश्चिदर्थो ज्ञातश्चे
न्न चापि स वक्तुं न शक्यते येन दुःखारि।।

पित्रवद्राक्षसं वेत्ति मातृवड्डाकिनीमपि।। पूयं पयोवदज्ञानाद्दीर्घकष्टं तु शैशवं।।४२।।
श्लेष्मणापिहिता नाडी सुषुम्णा यावदेव हि।। व्यक्तवर्णं च वचनं तावद्वक्तुं न शक्यते।।४३।।
अतएव च गर्भोपि रोदितुं नैव शक्यते।। दृप्तो थ यौवनं प्राप्य मन्मथज्वरविह्वलः।।४४।।
गायत्यकस्मादुच्चैस्तु तथाकस्माच्च वल्गति।। आरोहति तरून्वेगाच्छांतानुद्वेजयत्य
पि।।४५।। कामक्रोधमदांधः सन्न कांश्चिदपि वीक्षते।।४५।। द्वीपायनमः।। ।।

प्रकोरश्लाघा: प्रवर्तेरन्निसाह श्लेष्मणेति। अपिहिता निरुद्धरंध्रा पिहितेति वा। वष्टि भागुरिरल्लोपमवाप्योरुपसर्गयोरिति वै
कल्पिको अकारलोपः। अतएवेति श्लेष्मणा आच्छादनादेवेत्यर्थः।४३। दृप्त इति। दृप्तो गर्वितः विलासी विकत्थनः इत्यर्थः।।
४४। शांतान् निगृहीतेंद्रियान् तपस्विनोपि उद्वेजयति। दृप्तानुरोधाः किं कांश्चिदपि मातापितादीन् गुरुवर्गान् न वीक्षते न म
वजानीत्यर्थः।।४५

अस्थीति॥ अस्थिचमांसंचस्नायुश्च अस्थिमांसस्नायुरं तत्॥ आसमंतात् लाती सा अस्थिमांसस्नायुराली॥ तथाभूतायाः वामयं
स्त्रियाः मन्मथालयोनौ आसक्तः सन् आत्मनैव भन्नोदरहत इतिसंबंधः॥ कीदृशे मन्मथालये॥ उत्तानं अथच स्फुटितदं
धं सूत्रायतं मंडूकस्य पाटितं विदारितं उदरं तत्सन्निभे॥ विवृकदुर्गंधायां जुगुप्सितेतमेदस्सर्थः॥४६॥ ॥७॥

अस्थिमांसस्नायुरालायांवामायांमन्मथाले॥ उत्तानस्फुटितमंडूकपाटितोदरसन्निभे॥
४६॥ आसक्तःस्मरबाणार्त आत्मनाहन्यतेभवान्॥ अस्थिमांसस्नायुरालस्य किं
मन्यद्वर्ततेवपुः॥ वामानांमाययामूढानकिंचिद्वीक्षतेजगत्॥४७॥ ॥७॥

वामानांवपुः शरीरं अस्थिमांसप्रभृतिभ्योन्यद्वर्तते किं नारभ्येवेत्यर्थः॥ यद्यप्येवंतथापिमाययामूढायुवा
किमपिजगत्नईक्षते॥ तथावन्नजानाति किंतु निःसारमेवसारवत्तयापश्यतीत्यर्थः॥ यद्यपिअस्थ्यादीनांवैया
करणामिथतप्राण्यंगत्वसद्भावादेकवद्भावः प्राप्नोति॥ तथापिमुखनासिका चनइति सौत्रनिर्देशादनित्यत्वमाश्रि
त्यराजहंसाल्लुतवंनुचरणेलोहितैः सिताइत्यादिवत्समनीयं रावदेषयइतिव॥ कृतेकवद्भावानामेकवद्भावइति॥४७

डाक्टर भाऊदाजी
BHAU DAJI MEMORIAL

निर्गतइति॥ प्राणपवने निर्गतसति पंचभिः षड्भिर्वातिपंचषैर्दिनैः कतिपयैरेवदिवसैः शीघ्रमित्यर्थः॥ मृगीदृशोदेहोयथा
जायतेयामवस्थांप्राप्नोतितत्रनवीक्ष्यतेनपर्यालोच्यतएवतिमायामूढेनतायाः इवकोत्क्लायाः प्रपंचः॥ उक्तंच॥
सर्वकालेनबकलेवरौविदुःक्रिमिभस्मसंहितइति॥४८॥ ॥७॥

निर्गतेप्राणपवनेदेहोहंतमृगीदृशः॥ यथाहिजायतेनैववीक्ष्यतेपंचषैर्दिनैः॥४८॥
महापरिभवस्थानंजरांप्राप्यातिदुःखितः॥ श्लेष्मणापिहितोरस्कोजग्धमन्नंनजीर्यति॥४९॥
सन्नदंतोमंददृष्टिः कटुतिक्तकषायभुक्॥ वातभुग्नकटिग्रीवाकरोरुचरणोबलः॥५०॥

वार्द्धकदुःखमाह॥ मेहेति॥ जग्धं भक्षितं अन्नं आदनाद्विजीर्यतितन्न॥ जीर्णंनभवतीत्यर्थः॥ जग्धमित्य
त्रअदोजग्धिर्ल्यप्तिकितिजग्ध्यादेशः॥ अन्नमित्यत्रलुग्बहुलसंज्ञाछंदसीतिकाश्यायनवचनाद्दादेन्नोतीं
नभवति॥४९॥ नत्राविशीर्णाः दंतायस्यसतथा॥ कटुतिक्तादीन् व्याधिनिवृत्तयेभुंक्तइतितथाभूतः॥५०

गदाव्याधयः॥रोगव्याधिगदामयाइत्यमरः॥तेषामयुतेनदशसहस्रेणसमाविष्टोव्याप्तः॥निःशेषचःशेषश्चन्यः॥आ
नखमलोर्दृध्युपचितंअंगंयस्यतथाभूतः॥आलिंगितंप्राप्तंवरंमहत्तमंउपितंदोहोयनस॥आलिंगितवरा
प्ता॥दुःखबाकुल्यातदृश्यमानइत्यर्थः॥उपंदोहअस्माद्भूताभविक्लमस्य॥५१चलतिलुठतीतिचलः
बालकैरपिहस्यतेउपहस्यतेकिमुतारुणैरित्यर्थः॥५२॥

गदायुतसमाविष्टःपरिभूतःस्वबंधुभिः॥निःशेषोमलदिग्धांगआलिंगि
तवरार्पितः॥५१॥ध्यायन्सुखंभानुभोगान्केवलंवर्त्तते॥चलः॥सर्वक्रियाक्रिया
लोपाद्धस्यतेबालकैरपि॥५२॥ततोमृतिजदुःखस्यदृष्टांतोनोपलभ्यते॥य
स्माद्बिभ्यतिभूतानिप्राप्तान्यपिपराङ्रुजं॥५३॥नायतेमृत्युनाजंतुःपरि
त्यक्तोपिबंधुभिः॥सागरांतर्जलंगतोगरुडेनेवपन्नगः॥५४॥शावाय

शतइति॥ततःवार्द्धकानंतरंमृतिर्मरणंतेनजातस्यदुःखस्यनास्त्येवदृष्टांतः॥पराङ्रुजंप्राप्तान्यपिभूतानि
यस्मान्मृतिजदुःखाद्बिभ्यतिभयंप्राप्नुवंति॥५३॥नायतइति॥बंधुभिःपरित्यक्तोप्यालिंगितोपिमृत्युनानी अंतु
यते॥अत्रदृष्टांतः॥सागरस्यअंतर्जलमध्यगतःस्थितोपिपन्नगःपद्भ्यांनागच्छतीतिपन्नगःसर्पःगरुडेनेवेति५४

सुतदारादीनांयथाभवतितथाहाकांतेइत्यादिक्रंदमानआक्रोशन्नपियानत्यसमयेनुनेत्रानन्नरोमृत्युनायमदूतेननीय
ते॥५५॥मर्मस्थलेषुउत्कृष्यमाणेषुप्राणवायुनावियोज्यमानेषुहस्तपादादीनांसंधिषुमुच्यमानेषुयद्दुःखंसंभावि
तंतान्म्रियमाणस्यदुःखंमुमुक्षुभिःस्मर्यतां॥५६दृष्टाविति॥

हाकांतेहाधनंपुत्राःक्रंदमानःसुदारुणं॥मंडूकइवसर्पेणमृत्युनानीयतेनरः॥५५
मर्मस्वुत्कृष्यमाणेषुमुच्यमानेषुसंधिषु॥यद्दुःखंम्रियमाणस्यस्मर्यतांतन्मुमुक्षुभिः॥५६
दृष्टावाक्षिप्यमाणायांसंज्ञयाह्रियमाणया॥मृत्युपाशेनबद्धस्यत्रातानैवोपलभ्यते५७
संरुध्यमानस्तमसामहच्छित्तमिवाविशात्॥

दृष्टाविति॥दृष्टौयमदूतैराक्षिप्यमाणायांह्रियमाणयासंज्ञयाउपलक्षितस्यनिःसंज्ञस्येत्यर्थः॥मृत्युपाशेनबद्धस्यजंतोस्त्रा
तारक्षकःनोपलभ्यतेएव५७संरुध्यमानइति॥तमसाअज्ञानेननिरुध्यमानःसहत्चित्तंविवेकंआविशन्निवकथंचित्
सावधानतांप्राप्तःसन्नित्यर्थः॥५७

उपहूतः हेदेव दत्तेत्यादिनामग्रहण पूर्वकं संबोधितः सन्नतदातस्यामवस्थायां दीनचक्षुषाज्ञातानीक्षते॥ परिभाषणास
मर्थत्वादेवस्मरणमात्रं करोति॥ तदेतन्महतो विवेकस्य कार्यं॥ तदभावे तु ईक्षणमपि दुर्लभमिति भाव॥ चिंतासंज्ञाने भा
वेक्तः॥ उपाहूत इति पाठे उक्त अपि चेत्यर्थः॥ आहूत इति तु प्राग्वत्॥५८॥ अयः पाशेनेति कालेन बंधुभिश्च यथोक्तमंत्र

उपहूतस्तदाज्ञातीनीक्षते दीनचक्षुषा॥५८॥ अयःपाशेन कालेन स्नेहपाशेन बंधुभिः
आत्मानं कृष्यमाणं त्वमीक्षते परितस्तथा॥५९॥ हिक्कया बाध्यमानस्य श्वासेन परिशु
ष्यतः॥ स्फनाकृष्यमाणस्य नरकं त्वस्तिपरायणं॥६०॥

यःपाशस्नेहपाशाभ्यामाकृष्यमाणं तं पूर्वोक्तावस्थापन्नमात्मानं वीक्षते तथा परितः सर्वतो वीक्षते वक्ष्यमाणरीत्या
८८ चिंतयतीति सावधानता दशायां म्रियमाणस्य स्थितिकथनं मूर्छावस्थापन्नस्य तु एतावदपि नास्ति संसाराद्धोरा
पायचिंतनं तु तस्यामवस्थायां दूरायात्तमिति भाव॥५९॥ इक्षते परितस्तत्र्थमिति पूर्वश्लोके उक्तं॥ किमी ८८
क्षत इत्याकांक्षायां सार्धश्लोकद्वयेनाह हिक्कयेति॥ परायणं संरक्षकः॥६०॥

६१ किं करोमीत्यादि किंचित्कालं चिंतयित्वा तत इति कर्त्तव्यतामूढः सन्नसून्प्राणान्कृच्छ्रात्यजति ६२ यातनेति॥ इतोस्मा
ल्लोकादधः परलोकं गत्वा यातनायै तीव्रवेदनायै देहो यातनादेहस्तेन संबद्धः सन्यमदूतैरधिष्ठितश्च सन्यायास्ता विन्दीष्यव

संसारयंत्रमारूढो यमदूतैरधिष्ठितः॥ क्वयास्याम्यतिदुःखार्तः कालपाशेन योजितः॥६१
किं करोमि क्व गच्छामि किं दृष्टामित्यजामिकं॥ इतिकर्तव्यतारूढः कृच्छ्राद्देहात्यजसस्तव ६२
यातनादेहसंबंधो यमदूतैरधिष्ठितः॥ इतो गत्वानुभवति या यास्ता यमयातनाः॥६३ तासु यल्लभ
ते दुःखं तद्वक्तुं सहते कुतः॥

कक्ष

कुमत्राकपायतत्संबंधिनी यातनाः अनुभवति तासु मध्ये यद्दुःखं अयःकुंभीपाकच दारणादि जन्यं तन्मते तदेकमपि वक्तुं कुतः
सह्याद्न्वयः सर्वा यातना अनुभवितुं न शक्नोतीति किमु वक्तव्यं॥ यत्र एकैकव्यक्तिरपि अनुभवैकवेद्यानतु विन्दीष्यवक्तुं शक्येति भावः ६३

कर्पूरेति ॥ यद्वपुः नारीरं कर्पूराद्यैर्लिप्यते ॥ सुवस्त्रैः कष्टैर्वस्त्रैः परिधाप्यते ॥ तद्वपुः जीवेन सक्तं सदा
अस्थैर्यस्य स्थैर्ययोग्यं अप्रशंसनीयं नायोग्यं च जायते ॥

कर्पूरचंदनाद्यैस्तु लिप्यते सततं ह्ययत् ॥ भूषणै भूष्यते चैव सुवस्त्रै परिधार्य्य
ते ॥६४॥ अस्थैर्यं जायते प्रश्यं जीवसक्तं सदा वपुः ॥ निष्काशयंति निलयात्क्षणं
न स्थापयंत्यपि ॥६५॥ दह्यते च ततः काष्ठैः तद्भस्म क्रियते क्षणात् ॥ भक्ष्यते वा श्वगा
लैश्च कृमिकुक्कुरवायसैः ॥६६॥ पुनर्न दृश्यते सोथ जन्मकोटिशतैरपि ॥६७॥

८९ अतएव निलयाद्गृहात् निष्काशयंति क्षणमपि न स्थापयंति ॥६४॥६५॥६६॥ पुनर्नेति ॥ सभस्मीभू ८९
तो वा जंबूकादिभिर्भक्षितो वा देहः पुनर्न दृश्यते ॥६७॥

मातेति ॥ मायोपमे ऐंद्रजालिक निर्मितमायावत्स्यादि सदृशे अस्मिन् जगति ममेम पिता सा दिव्या प्रतिष्ठा कस्य भवेत् ॥ न कस्यापी
त्यर्थः ॥ अयं प्रमाता कर्मपुरःसरो यतो व्रजति न तु माता पित्रादिभिः ॥ सार्धं तथा च नानाविधसंसारे सर्वेषां परस्परं मा
तापितृभावो अविहितस्थिति भावः ॥ जीवलोको मनुष्यादि नारी रात्मको विश्रामार्थे न वृक्षेण सदृशः खलु ॥ वृक्षसा
म्यं यथा तरस्लोके विवहिष्यते ॥ अत्र यद्यपि विश्राम इति प्रयोगः पाणिनीय विरुद्धः नोदात्तोपदेशस्येति वृद्धि

माता पिता गुरुजनः स्वजनो ममेति मायोपमे जगति कस्य भवेत्प्रतिष्ठा ॥ एको
यतो व्रजति कर्मपुरःसरोयं विश्रामवृक्षसदृशः खलु जीवलोकः ॥६८॥ ॥छ॥

निषेधात् ॥ तथापि चंद्रव्याकरणे यो अमर्वि गोपति सिद्धं तत्त्वान्न दोषः ॥ न जानिर्दिष्टमनित्यमिति वा संग्रहे एवं का
मिविधिरनित्य इति वा कुनाका शावलंबनेन पाणिनीयमतेपि समर्थयितव्यो विश्रामवृक्ष इति समासस्तु मयूरव्यंसका प
ष्ठी तत्पुरुष एव ॥ परमंजरीकारस्तु सातु च तु धे तत्पुरुषे सातु यः ॥ अत्र च बहुवक्तव्यं ग्रंथगौरव भयान्नोच्यते ॥६८॥

सायमिति॥यथाविहंगाःपक्षिणःसायंकालेवासवृक्षंप्राप्ताःसंतःप्रातःकालेअन्योन्यंपरस्परंत्यक्त्वातंचवृक्षंत्यक्त्वातेनयथाप्रा
तद्वदेवज्ञातयोबान्धवाःभ्रात्रादयःस्वस्वकर्मानुरोधात्किंचित्कालमेकत्रस्थित्वायथायथंप्रयांति॥६९॥ शिवायनमः॥

सायंसायंवासवृक्षंसमेताःप्रातःप्रातस्तेनतेनप्रयांति॥त्यक्त्वान्योन्यंतंचवृक्षंविहंगास्
तद्वत्तद्वज्ज्ञातयोऽज्ञातयश्च॥६९॥मृतिर्बीजंभवेज्जन्मजन्मबीजंभवेन्मृतिः॥घटयंत्रवद
श्रांतोबंभ्रमीत्यनिशंनरः॥७०॥गर्भेपुंसःशुक्रपातादयदुक्तंमरणावधि॥तदेतस्यमहाव्या
७० धेर्मत्तोनान्योस्तिभेषजं॥७१॥ ॥इतिश्रीपद्मपुराणेशिवगीतासूपनिषत्सुवैराग्ययोगोना ७०
माष्टमोध्यायः॥

मृतीति॥जन्मनःमृतेबीजंपूर्वरूपंभवेत्॥तथामृतिःमृतिरपिजन्मनोबीजंभवेत्॥अतएवघटयंत्रवदनिशंनरोबंभ्रमीति॥पु
नःपुनर्भ्राम्यति॥यङ्लुकिरूपं॥भुगतइतिभुगागमः॥शुक्रपातादारभ्यमरणावधियदुक्तंसचासावेषश्चेतिकर्मधारयः॥तस्यै
तस्यमहाव्याधेर्भेषजंमत्तोन्यःपदार्थोनास्ति॥भेषजशब्दोनित्यनपुंसकः॥७१॥इतिश्रीशिवगीताव्याख्यायामष्टमोध्यायः॥८॥

अष्टमाध्यायोपक्रमेपांचभौतिकदेहस्यचोत्पत्तिर्विलयस्थितिःस्वरूपंचकथयमितिरामेणपृष्टंतत्रोत्पत्तिर्निरूपिता॥स्वरूपंतु
इहप्राधान्येननिरूप्यतइतिप्रतिजानीते॥देहस्यस्वरूपमिति॥शृणुष्व॥शृणु॥उत्पत्त्यादीनपिप्राक्पश्चात्सूचीकटाहन्या
येनप्रश्नक्रमेणचसंक्षिप्यकथयति॥मत्तोहीति॥मद्विषयकाज्ञानान्मय्येवाध्यस्तंविश्वंमद्विषयक

भगवानु०॥देहस्वरूपंवक्ष्यामिशृणुष्वावहितोनृप॥मत्तोहिजायतेविश्वंमय्येवैतत्प्रधार्यते॥१॥म
य्येवेदमधिष्ठानेलीयतेशुक्तिरूप्यवत्॥अहंतुनिर्मलःपूर्णःसच्चिदानंदविग्रहः॥२॥असंगो
निरहंकारःशुद्धंब्रह्मसनातनं॥अनाद्यविद्यायुक्तःसन्जगत्कारणतांव्रजे॥३॥

साक्षात्काराद्धीयतेशुक्त्यवच्छिन्नचैतन्यविषयकाज्ञानकार्यरूप्यंतथाशुक्तिसाक्षात्काराद्धीयतेतद्वदित्यर्थः॥नचैतावताममवि
कारित्वमित्याहंतु इति॥ननुब्रह्मस्वरूपस्यमोक्षकालेप्यवस्थानात्पुनःप्रपंचापत्तिरित्याशंक्याह॥अनाद्यविद्येति॥तथाचविद्या
रूपसहकारिविरहान्मुक्तस्यपुनःसंसारापत्तिरित्यर्थः॥व्रजे॥व्रजामि॥३॥

अनाद्यविद्यायुक्तः सन्नित्युक्तरीत्या उभयोरेकरूपमेव कारणत्वमस्ति भ्रमं आवर्त्तयति ॥ अविद्यापरिणामिनीति ॥ स्वज्ञान बाध्यप्रपंचोपादानं हि परिणामीत्युच्यते ॥ ननु परिणामः कात्स्न्र्येन वा एकदेशेन वा ॥ नाद्यः ॥ दधिवद्दशायां क्षीरस्येव प्रपंचदशायां अज्ञानस्यानुपलंभापत्तेः ॥ न द्वितीयः ॥ अनादित्वेन निरवयवत्वात् ॥ इत्याशंक्याह ॥ अनिर्वाच्येति ॥ तथा चानादावप्यज्ञाने अनिर्वचनीये सत्त्वान्न द्वितीयपक्षासंगतिः ॥ कृत्स्नप्रसक्तिर्निरवयवत्वशब्दकोपो वेति न्यायसूत्रे तथैव निर्णीत

अनिर्वाच्या महाविद्या त्रिगुणा परिणामिनी ॥ रजः सत्वं तमश्चेति तद्गुणाः परिकीर्त्तिताः ४

त्वादिति भावः ॥ महाविद्येत्यनेन मूलाज्ञानमेव जगदुपादानं न तु तूलाज्ञानं ॥ शुक्तिज्ञानादिना तन्निवृत्तौ सकलप्रपंचनिवृत्त्यापत्तेरिति दर्शयति ॥ ननु गुणानां कार्यत्वं श्रुतितत्र तत्र स्मर्यते ॥ तथा च ॥ कथमिह तत्परित्यागेनान्यस्यैवोपादानं कथ्यत इत्याशंक्याह ॥ त्रिगुणेति तथा च गुणानामविद्यांशरूपत्वादंशांशिनोश्चानिर्वचनीयतादात्म्यान्न कोपि दोष इति भावः ४

DR. BHAU DAJI ORIENTAL

तत्र गुणानां कार्यविशेषं प्रति कारणतां विविच्य दर्शयति ॥ सत्वमिति ॥ सुखज्ञानयोः सुखशब्दवाच्यज्ञानशब्दवाच्ययोर्द्वयोरास्पदं कारणं ॥ रजस्तु रक्तवर्णं दुःखकारणं च ॥५॥ तम इति ॥ तमः कृष्णवर्णं तथा च जडं यद्यपि चिद्भिन्नत्वरूपं जडत्वं सत्वरजसोस्तत्कार्ये चास्ति ॥ तथापि आवरणप्रयोजकत्वं तमस एवेत्यर्थः ॥ उदासीनमिति ॥ सुखादिजनने असमर्थमित्यर्थः ॥ त्रिगुणात्मि

सत्वं शुक्लं समादिष्टं सुखज्ञानास्पदं नृणां ॥ दुःखास्पदं रक्तवर्णं चंचलं च रजो मतं ॥५॥ तमः कृष्णं जडं प्रोक्तमुदासीनं सुखादिषु ॥ अतो मम समायोगाच्छक्तिः सा त्रिगुणात्मिका ॥६॥ अधिष्ठाने तु मय्येव भजते विश्वरूपतां ॥ शुक्तौ रजतवद्रज्जौ भुजंगवद्दृदयंतु ॥७॥

का अविद्यापरिणामिनीत्युक्तं ॥ अधिष्ठानं त्वहमेवेत्याह ॥ अधिष्ठाने त्विति ॥ अधिष्ठानं ब्रह्मैव ॥ परिणामिनी त्वविद्या उपादानंद्वयमिति फलितोर्थः ॥ तत्र बाधकज्ञानविषयोधिष्ठानं स्वबुद्धिबाध्यकार्याधारो वा स्वबाधकबाध्यकार्याश्रयस्तु परिणामी कार्यतादात्म्यवत्कारणमुपादानं तादात्म्यं तु भिन्नत्वे सत्यभिन्नसत्ताकत्वमिति विवेकः ॥७॥ ॥श्रीवायनमः॥ ॥

८॥एतदुषाट्कौशिकंशारीरंशोणितपित्रेतस्त्रीण्यस्थिस्नायुमज्जानःपितृतस्त्वङ्मांसरुधिराणिमातृतइतिगर्भोपनिषदर्थमतः
पठतिद्वाभ्यांश्लोकाभ्यांपितृभ्यांमातापितृभ्यांअशि

आकाशादीनिजायंतेमनोभूतानिमायया॥तैरारब्धमिदंसर्वंदेहोयंपांचभौतिकः॥८॥
पितृभ्यामशितादन्नात्षट्कोशंजायतेवपुः॥स्नायवोस्थीनिमज्जाचजायंतेपितृतस्तथा॥९
७२ त्वङ्मांसंशोणितमितिमातृतश्चभवंतिहि॥भावाःस्युःषड्विधास्तस्यमातृजाःपितृजास्तथा१०

ताभ्यामशितादन्नादन्नादोदनादेःषट्कोशाइवकोशाःयस्मिंस्तथाभूतंवपुर्जायते९॥भावास्युरिति॥मातृजाःतथापितृजा ७२
अमिलित्वाषट्विधास्तस्यभावाःभवंतिशरीरमितिभावाःकोशाःस्युः॥१०॥ ॥शिवायनमः॥ ॥

भवइति॥भव्वोभावामातृभवाइत्यन्वयः॥केतशोणितं॥रक्तं॥मेदःवपामज्जासारभूतोधातुविशेषः॥प्लीहागुल्मः॥यकृत॥
दक्षिणपार्श्वेकालखंडापरपर्यायः॥कृत्यमांसान्त्र॥गुदमपानं॥हृत्हृदयं॥इत्येवमाद्याःतथाचामरः॥रुधिरेसृग्लोहितास्र
रक्तक्षतजशोणितमिति॥हृन्मेदस्तुवपावसेतिचासारोमज्जासमौविनीतिच॥गुल्मस्तुप्लीहापुंसीतिच॥कालखंडयकृतीतुसमे
इमेइतिच॥अत्रमज्जनशब्दोनान्तःपुल्लिंगः॥नाभीइत्यत्रकृदिकारादक्तिनइतिङीप्॥तथाचमुरारिःप्रायुंक्त॥नाभीपल्वलपुं

भवःशोणितंमेदोमज्जाप्लीहायकृद्गुदं॥हृन्नाभीत्येवमाद्यास्तुभावामातृभवामताः॥११॥ ॥

डरीकमुकुलःकंबोःसपत्नीकृतइतिविमरमतिमहाकाव्येनाभीपथैकनिकेतनइतिच॥हूपचद्राननस्तनाभीतिनाभीपथेने
तिचश्रीहर्षःतथाचलिंगानुशासनसूत्रं॥नाभिरक्षत्रियइति॥स्त्रीलिंगशेषमरोप्याह॥सोतिःकथातथासंदीनाभीराजसभा
पियेति॥अतएवसमुल्लसत्पंकजकोशकोमलैरुपीहिताश्रीणयुपनीयनाभिरितिभारवेःप्रमादाइतिबोध्यं॥११॥ ॥

श्मश्रुःपुरुषस्यमुखेरोमवृद्धिःलोमशिरसोन्यत्रशरीरेरूढं॥कचाःशिरोरुहः॥तथाचामरः॥तनूरुहंरोमलोमतद्वृद्धौश्म
श्रुपुंमुखेइति॥कचःकेशःशिरोरुहइतिच॥स्नायुःवस्नसापर्यायोधातुविशेषः॥अथवस्नसा॥स्नायुःस्त्रियामित्यमरः॥शि
राधमन्यइति॥यद्यपिनाडीतुधमनिःशिरेत्यमरसिंहेनपर्यायतोक्तातथापिसूक्ष्मनाड्यःसिराःस्थूलास्तुधमनीसाद्वया

श्मश्रुलोमकचस्नायुशिराधमनयोनखाः॥दशनाःशुक्रमित्यादिस्त्विहापितृसमुद्भवाः॥१२
शरीरोपचितिर्वर्णोवृद्धिस्तृप्तिर्बलंस्थितिः॥अलोलुपत्वमुत्साहइत्यादीन्रसजान्विदुः॥१३॥

७३ धमनयोबोध्याः॥विज्ञानेश्वरस्त्वाह॥धमन्यःप्राणादिवायुवाहिन्यः॥शिरास्तुवातपित्तश्लेष्मवाहिन्यः॥अंगप्रत्यंग ७३
संधिबंधनार्थास्तुस्नायवइति॥एतेनाड्यस्त्रिधाभिद्यंतइति॥१२॥शरीरेति॥उपचितिः॥उत्पत्तिकालीनस्थौल्यं॥वृ
द्धिःक्रमेणोपचयः॥इत्यादीन्रसाद्धातुविशेषाज्जातान्विदुः॥१३॥

इच्छेति॥इच्छाप्रभृतयोभावनान्ताआत्मजाः॥स्वकृतप्राग्भवीयकर्मप्रभवाः॥नतुमातापितृनिष्ठेच्छाद्वेषादिप्रभवाइत्यर्थः॥भावनास्मृ
तिजनकीभूतःसंस्कारः॥अत्रपूर्वोक्तश्मश्रुलोमेत्यादिश्लोकत्रयेपिभावाइत्येतदनुवर्तमानंपितृसमुद्भवाइत्यादिविशेष्यं॥अ

इच्छाद्वेषःसुखंदुःखंधर्माधर्मौचभावना॥प्रयत्नोज्ञानमायुश्चेंद्रियाणीत्येवमात्मजाः॥१४
ज्ञानेंद्रियाणिश्रवणंस्पर्शनंदर्शनंतथा॥रसनंघ्राणमित्याहुःपंचतेषांतुगोचराः॥१५॥श
ब्दस्पर्शस्तथारूपंरसोगंधइतिक्रमात्॥वाक्करांघ्रिगुदोपस्थान्याहुःकर्मेंद्रियाणिहि॥१६॥

न्यथानपुंसकमनपुंसकेनेत्यस्यप्रवृत्तौपुल्लिंगनिर्देशानुपपत्तेरितिबोध्यं॥१४॥तत्रेंद्रियाणिद्विधाज्ञानेंद्रियाणिकर्मेंद्रियाणिचे
ति॥तत्रज्ञानेंद्रियाणिविभजते॥ज्ञानेति॥श्रवणमित्यादीनिपंचज्ञानेंद्रियाण्याहुः॥तेषांगोचराःविषयास्तुयथाक्रमंशब्दस्पर्शा
दयःपंचवागादीनितुपंचकर्मेंद्रियाण्याहुः॥१५॥१६॥

वचनेति॥तेषांवागादीनांकर्मेंद्रियाणांक्रमात्॥वचनादयःपंचक्रियाःएवंज्ञानेंद्रियपंचकंकर्मेंद्रियपंचकंचनिरूप्यउभयात्मकमिंद्रियमाह॥नमइति॥नमःततःप्रागुक्तेभ्योदशभ्यःपरंउत्कृष्टंउभयात्मकत्वादित्यर्थः॥तदाहयाज्ञवल्क्यः॥हस्तौपायुरुपस्थंचजिह्वापादौचपंचवै।कर्मेंद्रियाणिजानीयान्मनश्चैवोभयात्मकमिति॥बुद्धिरहंकारोंतःकरणंचित्तंचेति॥चतुष्टयमपिमनएवाहुरित्यन्वयः॥एकस्यैवमनसोवस्थाचतुष्टयेनसंज्ञाचतुष्टयमित्यर्थः॥ननुमनसोबुद्धी

वचनादानगमनविसर्गरतयःक्रमात्॥क्रियास्तेषांमनोबुद्धिरहंकारस्ततपरं॥१७॥
अंतःकरणमित्याहुश्चित्तंचेतिचतुष्टयं।सुखंदुःखंचविषयौविज्ञेयौमनसःक्रिया॥१८॥

द्रियत्वमनुपपन्नं॥असाधारणविषयाभावात्॥वैशेषिकनैयायिकादिभिर्मानसत्वेनाभ्युपगतानांसुखादीनामस्मिन्संघातेसाक्षिमात्रभास्यत्वादित्याशंक्याह॥सुखमिति॥अंतःकरणोपहितस्यैवसाक्षितयासुखादिभानोपयोगित्वेवमनसःतावन्मात्रेणैवेंद्रियत्वंपरिभाष्यतइतिभावः॥स्मृतिभ्रांतिप्रभृतयःमनसःक्रियाइत्यन्वयः॥अनेनकर्मेंद्रियत्वंसमर्थितं॥बुद्धिकर्मेंद्रियसहकारित्वादुभयात्मकत्वपरिभाषितंतुविज्ञानेश्वरः॥१८॥ ॥श्रीवायनमः॥

बुध्यादिसंज्ञाचतुष्टयमेकस्यैवेत्युक्तं॥तत्प्रयोजकमाह॥बुद्धिःस्यादिति॥निश्चयात्मिकाबुद्धिःअभिमानात्मकोहंकारःविचारात्मकंचित्तंइतित्रयाणांलक्षणंश्लोकेउक्तं॥चेतयइति॥विचारयतीत्यर्थः॥मनस्तुसंकल्पविकल्पात्मकंबोध्यं॥तदेवचांतःकरणं॥१९॥स्यादेतत्॥अंतःकरणंसाक्ष्युपाधित्वात्सुखादिभानोपयोगीत्युक्तमसंगतं॥सत्वस्यैवसाक्ष्युपा

स्मृतिर्भीतिविकल्पाद्याःबुद्धिःस्यान्निश्चयात्मिका॥अहंममेत्यहंकारश्चित्तंचेतयतेयतः॥१९
सत्वाख्यमंतःकरणंगुणभेदात्त्रिधामतं।सत्वंरजस्तमइतिगुणाःसत्वात्तुसात्विकाः॥२०

धितयाश्रवणात्॥तथाचपैंगिरहस्यब्राह्मणे॥तदेतत्सत्वंयेनस्वप्नंपश्यतीति॥स्वापगजादिभासकसाक्षिणंप्रत्यकपाधितयासत्वमेवनिर्दिष्टमित्याशंक्याह॥सत्वाख्यमिति॥अंतःकरणंयत्तदेवसत्वाख्यमित्यन्वयः॥अयंभावःउक्तःश्रुतावपितयोरन्यःपिप्पलंस्वाद्वत्तीतिसत्वमित्यनेनभोक्तृतयासत्वस्यनिर्देशात्तत्रमातैवसत्वपदार्थः॥अतएवनातिप्रसंगोपि॥एतेनविद्योपहितएवसाक्षीत्यपिपरास्तं॥अतिप्रसंगपरिहारायप्र॥ ॥श्रीवायनमः॥

प्रमातृभेदस्यावश्यकत्वे चिच्छायाऽविं चित्करत्वात्॥ स्फुटं चैतन्नृसिंहाश्रमग्रंथेष्विति दिक्॥ प्रसंगादाह॥ गुणभेदादिति॥ उपादा
नीभूतत्रिविधगुणभेदादंतःकरणमपि त्रिधेत्यर्थः॥ तत्र सत्वात्सात्विकाः आस्तिक्यप्रभृतयो मताः॥ अस्ति परलोक इत्येवंरूपा

आस्तिक्यशुद्धिधर्मैकरुचिप्रभृतयो मताः॥ रजसो राजसा भावाः कामक्रोधमदादयः २१
निद्रालस्यप्रमादादिवंचनाद्यास्तु तामसाः॥ प्रसन्नेंद्रियतारोग्यानालस्याद्यास्तु सत्वजाः
२२॥ देहमात्रात्मकस्तस्मादाधत्ते तद्गुणानिमान्॥

मतिरास्तिक्यं॥ शुद्धिर्मनोनैर्मल्यं॥ धर्मे एकान्त्रसाधारणरुचिः॥ २०। २१॥ देह इति॥ देहस्थूलदेहः मात्रात्मकः प्रमातृतादात्म्येन
ध्वस्तः अत एव तस्य प्रमातुर्गुणानादत्ते॥ अंतःकरणसत्वादिगुणोद्रेकानुसारेण स्थूलदेहोपि तथाकार्यो भवतीत्यर्थः॥ क
स्मात् धर्ममादत्ते तदेव विवेचयति॥

शब्द इति। शब्दः श्रोत्रं वैस्यादीन् सत्तगगनादादत्ते इति संबंधः॥ विचित्रस्य भावो वैचित्र्यं कर्मविशेषकुशलत्वेत्यर्थः॥ सूक्ष्मेन
ति। लंघनक्रियोपयोगी लाघवविशेष इत्यर्थः॥ यद्यपि वायुकार्यमध्ये लाघवं गण्यति तथाप्युभयकार्यत्वान्न विरो
धः। नचैतद्व्यादिह सूक्ष्मवान् शब्दस्यार्थांतरं कल्प्यं॥ आकाशकार्येषु लाघवस्यास्पष्टमेव स्मर्तृभिरुपादानात्॥ तदाह॥

शब्दः श्रोत्रं सुखरता वैचित्र्यं सूक्ष्मता धृतिः॥ बलं च गगनाद्वायोः स्पर्शश्च स्पर्शनेंद्रियं॥ २३॥
उत्क्षेपणमपक्षेपाकुंचने गमनं तथा॥ प्रसारणमितीमानि पंच कर्माणि रूक्षतान्॥ २४॥

त्वक्च॥ आकाशलाघवं सौक्ष्म्यमिति सौक्ष्म्यं सूक्ष्मेष्विहमतिविज्ञानेश्वरोक्तव्याख्यावादुहापि योज्या॥ वायो
स्तु स्पर्शः स्पर्शनेंद्रियं पंचकर्माणि रूक्षता प्राणादयश्चेत्युक्ता॥ लाघवं चेति एकोनविंशतिपदार्था निरूप्य इति मध्ये श्रु
तस्य स्वैक्तैः सर्वैः सहसंबंधः॥ रूक्षतां कं गृह्यं स्पष्टमन्यत्॥ २३। ॥ २४॥ ॥८५॥ शिवाय नमः॥ ॥

२५।२६। प्राणादीनां वायुविशेषाणां स्थानानि कर्माणि चाह। तेषामित्यादिभिः सप्तभिः श्लोकैः। तेषां दशानां वायुकार्याणां मध्ये प्राणा मुख्यतरः स च नाभिकन्दे कण्ठे च। नाभिकण्ठं व्याप्य अवस्थितः प्रक्षेपकर्मणि पञ्चमी। असौ नासिकयोर्नाभौ हृदयपंकजे

प्राणापानौ तथा व्यानसमानोदानसंज्ञिकान्॥ नागं च कूर्मं कृकरं देवदत्तं धनंजयं॥ दशैते वायुविख्याताः ख्याता योगरहस्यविलाघवे॥२६॥ तेषां मुख्यतरः प्राणो नाभेः कण्ठाद्‌व्यवस्थितः॥ चरत्यसौ नासिकयोर्नाभौ हृदयपंकजे॥२७॥ शब्दोच्चारणनिश्वासोछ्वासादेरपि कारणं॥ अपानस्तु गुदे मेढ्रे कटिजंघोदरेष्वपि॥२८॥ नाभिकन्दे वृषणयोरूरुजानुषु तिष्ठति॥ प्राणायामतो वृत्तिस्त्यागग्रहणायस्य कर्म च॥२९॥ ॥श्रीवायवे नमः॥ ७६

चरति। शब्दोच्चारणादीनां कारणं च॥ प्राण इत्यनुवर्तते अपानस्त्विति। गुदप्रभृतिषु अस्य अपानस्तिष्ठतीत्यन्वयः॥२८ प्राणायामप्रभृतिष्वस्य अपानस्य कर्म २९

समान इति॥ निखिलं शरीरं व्याप्य संचरन् सन् भुक्तस्य अन्नादेः पीतस्य सारांशभूतान् परिणामविशेषान् सम्यक्कृतान् द्रव्यवान्रूपेण आनयन् सन् देहस्य पुष्टिं करोतीति तथाभूतः सन् समान इत्युच्यते॥ अत्र शरीरं व्याप्य संचरन्निति वदतावस्थानं तु स्थलविशेषइति सूचितं॥ सर्वशरीरं व्याप्यावस्थानेन सह अभेदापत्तेः। यदाप्तेः स्यादुः॥ हृदि प्राणो गुदेऽपानः समानो नाभिसंस्थितः उदानः कण्ठदेशस्थात्

समानो व्याप्य मनिखिलं शरीरं वह्निना सह॥ द्विसप्ततिसहस्रेषु नाडीरंध्रेषु संचरन्॥३०॥

व्यानः सर्वशरीरग इति॥ नियतस्थानत्वेऽप्येते क्रियावशाच्छरीरं व्याप्नुवंतीत्यधुरा शिवादित्ति शारत्वामी। सम्यक् आम्लिस्येनन्वानयतः व्यस्य यानस्येत निरूपाणि भियोगशास्त्रसंमतार्थः स्फुटीकृतः॥ अनिसानितः करुणेध तानि रूपाणीति तु धातुवृत्तिकाराः॥ यद्यपि नाडीरंध्राणां द्विसप्ततिसहस्राधिक्यमपि स्मर्यते। एकोनविंशतिर्लक्षाणि तथानवशता

निच। शदूपंचाशच्च जानीतशिराधमनिसंज्ञिता: इतियाज्ञवल्क्योक्तेस्तथापिहितारव्यनाडीविशेषपरतयेदंबो
ध्यं। तथाच याज्ञवल्क्यः द्वासप्ततिसहस्राणिहृदयादभिनिःसृताः। हिताहितानामनाड्यस्तासांमध्येशशि

नुरूपीतरसान्नम्यगानयन्देहपुष्टिकृत्॥ उदानःपादयोरास्तेहस्तयोरंगसंधिषु॥३१ कर्म
स्यदेहोन्नयनोत्क्रमणादिप्रकीर्तितं॥ त्वगादिधातूनाश्रित्यपंचनागादयःस्थिताः॥३२॥
उद्गारादिनिमेषादिक्षुत्पिपासादिकक्रमात्॥ तंद्राप्रभृतिशोकादितेषांकर्मप्रकीर्तितं॥३३॥

प्रभं। मंडलं तस्यमध्यस्थः आत्मादीपइवाचलइति। इहापिदशामवश्यंहितंबलंप्रयच्छंतियस्मात्तेन
हिता॥ द्वासप्ततिसहस्रैस्तासंख्यातायाः॥ नतैमेरिति। ३०। ॥ ॥३१॥ ॥ ॥३२॥ ॥३३॥ ॥

तैजसःकार्यमाह। अग्नेरिति। अग्नेःरोचकप्रभृतानाधेत्तेइत्यस्यचयः। रोचयतिप्रकाशयतिघटादीनितिरोचकं। चक्षुरिंद्रियमि
त्यर्थः। तथाचगर्भोपनिषदिश्रूयते। शौर्यामर्षतैक्ष्ण्यपक्तौष्ण्यभ्राजिष्णुतासांपार्वलरूपंद्रियाणि तैजसानीति। रूप
मिति। श्यामिकादित्यर्थइतिविज्ञानेश्वरादयः। दीप्तंदीप्तिः शुक्लरूपविशेषइतियावत्। गोबलीवर्दन्यायेनरूपा
त्पृथगुपादानदीपादीप्तं। नपुंसकेभावेक्तः। पाकंभुक्तस्यान्नस्यपचनं प्रकाशयति। इतिप्रकाशः तस्यभावःप्रका

अग्नेस्तुरोचकंरूपंदीप्तंपाकंप्रकाशकं॥ अमर्षतीक्ष्णतासूक्ष्माणामोजस्तेजश्चशूरतां॥३४

शतास्मृतिविशेषः। प्रतिभेतियावत्। अमर्षःकोपः तीक्ष्णत्वंपरिभवासहिष्णुत्वमितियावत्॥ सूक्ष्मेप्यपिभा
वप्रधानोनिर्देशः। सूक्ष्माणामिति। कारकेशेषषष्ठी। नमाषाणामश्नीयादितिवत्। इंद्रियविषयस्वरूपश्र
व्याहारइतिविज्ञानेश्वरमिश्राः। ओजः शरीरस्थितिप्रयोजकतयाहृदयस्थं। तथान्यत्रापिस्मर्यते॥ हृदि
तिष्ठति। यच्छुद्धमीषद्रक्तसपीतकं। ओजः शरीरसंख्यातंतन्नाशान्नाशमृच्छति। तेजःसंतापः। शूरतापराक्रमः ३४

डाक्टर भाऊदाजी इत्याख्यस्य स्मारकम्
MEMORIAL
BHAU DAJI

मेधावीनां धारणावत्त्वं। धीर्धारणावती मेधेत्यमरः। अस्मायस्मादिनाविनिम्रा सर्थः। रसनं रसग्राहकमिंद्रियं स्नेहस्नि
ग्धता। गात्रस्य शरीरस्य आर्द्रत्वं द्रवत्वं अवयवानां मृदुता॥३५॥ गौरवं गरिमाणं प्रसंगाच्छरीरधारकांस्त
सधातूंश्चिवचयति। त्वगिति। त्वगादयः सप्त धातवः धातिशरीरमिति व्युत्पत्त्या। एतच्चकदलीस्तंभवत्त्वड्वा

मेधाविनां तथा धत्ते जलरूपस्तु रसनं रसं। शैत्यं स्नेहं द्रवं स्वेदं गात्रादिम्रदुतामपि॥३५॥ भूमेर्घ्रा
णेंद्रियं गंधं स्थैर्यं धैर्यं च गौरवं॥ त्वगसृङ्मांसमेदोस्थिमज्जाशुक्राणि धातवः॥३६॥

स्थांभ्यंतररूपेण व्यवस्थिताः। आयुर्वेदे तु लक्रस्छानेरः सद्राव्यः पठितः। तथाचान्नरसो जठराग्निना पच्यमानो
रक्तं भवति। तदपि स्वकीयास्थिनाग्निना पच्यमानं मांसं भवति तदपि स्वकीयास्थिनाग्निना मेदो भवति इत्यादि। शुक्रं तु
चरमो धातुः रसादिनाणी तस्य त्रिविधत्वेपि रौषु तु अस्टगादयः षडेव धातवः तेन परिभाषिता इति दिक्। सिताग्नि
गमीसादिनाकैतीकृत प्रसंगे कृतधातुशरीरमुत्पादितं॥३६॥ ॥छ॥

उक्तानां धातूनां तत्प्रसंगाच्छरीरांतर्गतानामन्येषामपि परिणामिकारणं प्रपंचयति। अन्नमित्यादिना। अत्रैवं
श्रुतिसिद्धप्रक्रिया। पुरुषेणाशितं भक्षितं अन्नं भोजनादि जठराग्निना पच्यमानं त्रेधा जायते। स्थूलमध्यसूक्ष्म
भेदात्। तत्र स्थूलो भागः पुरीषं जायते मध्यमो मांसं। कनिष्ठस्तु मनो जायते। अत एवाह श्रुतिः अन्नमयं हि सोम्य

अन्नं पुंसाशितं त्रेधा जायते जठराग्निना॥ मलं स्थविष्ठो भागः स्यान्मध्यमो मांसतां व्रजेत्॥३७॥
कनिष्ठो भागः प्राणः स्यात्तस्मात्प्राणो जलात्मकः॥ तेजसोस्थि स्थविष्ठं स्यान्मज्जा मध्यः समुद्भ
वः॥ अणुर्मनः कनिष्ठो भागः स्यात्तस्मादन्नमयं मनः॥ अपां स्थविष्ठो मूत्रं स्यान्मध्यमो रुधिरं भवेत्॥३८

मन इति। एषां पृथिव्याः स्थितिः। एवं अपामपि स्थूलो भागो मूत्रं भवति। मध्यमस्तु रुधिरं। कनिष्ठस्तु प्राणो
भवति। एवं तेजसः स्थूलो भागो अस्थिमज्जाख्यधातुश्च मध्यात्तेजसो मध्यभागात् समुद्भवो यस्य तथा स्तत्कनि
ष्ठानु चक्षुरिंद्रियादीति सम्यगवबोध्यं॥३७॥ ॥ ॥३८॥ ॥ ॥ ॥३९॥ ॥शिवायनमः॥ ॥छ

नाड्योपीति। मांससंघातान्नाड्यो भवंति। अपिशब्दात्सिरा धातुः शुक्रं च रसधातुरूपं मज्जसमुद्भवो यस्य तथाभूतं शुक्रं च। अत्र शरीरे वातादयोपि धातव इति कीर्तिताः। तेषामपि शरीरधारणहेतुत्वात्॥४०॥ इदानीं सार्धश्लोकद्वयेन शरीराणां रसादीनां परिमाणमुच्यते मूत्रपुरीषादिग्रहणं च यत्नान्रक्षापि वैरोग्ये हेतुत्वात्। तत्र रसादिपरिमाणम्

नाड्योपि मांससंघाताच्छुक्रं मज्जसमुद्भवं॥ वातपित्तकफाश्चात्र धातवः परिकीर्तिताः॥४०॥
दशांजलिजलं ज्ञेयं रसे स्यांजलयो नव॥ रसस्याष्टौ पुरीषस्य सप्त स्युः श्लेष्मणश्च षट्॥४१॥

यद्यप्यनवस्थितं वैलक्षण्याच्छरीराणामस्थ्नां पित्तादीनां तथैव च। दोषधातुमलानां च परिमाणं न भिन्नविषयत्वात्तदायुर्वेदस्मरणात् तथापि ॐ सर्गकीर्तितमनुरुध्य परिमाणाभिधानं नयोपाय दशेति। शरीरपार्थिवभागानां परस्य रसं श्लेष्मनिमित्तभूतस्य उपष्टंभकजलस्य दशांजलयः प्रमाणमित्यर्थः। सम्यक्परिणतस्याहारस्य विकारो रसः। तस्य परिमाणं नवांजलयः श्लेष्मणः कफस्य षडंजलयः॥४१॥

पित्तस्य पंच अंजलयः मूत्रस्य चत्वारः वसायाः मांसस्नेहस्य त्रयोंजलयः मेदसो मांसरसस्य द्वावंजली मज्जा तु अंजली परिमिता वाच्यः। सारा मज्जा नरी समरः। नपुंसी सर्पिरिति स्वामी॥४२॥ अर्धेति। शुक्रं तु अर्धांजलिः तेजो बलमरत्वाद्बलमुच्यते। अस्थ्नां तु षष्टीसहितं शतत्रयं वाच्यं। नखास्थ्नोलेः सह तु षष्टि इति वा विनिर्गतेन रवादत्वात् दिश्लोकेद्वनयाद्व वक्ष्यत्वात्प्रपं

पित्तस्य पंच चत्वारो मूत्रस्यांजलयस्त्रयः॥ वसाया मेदसो द्वौ तु मज्जा त्वंजलिसंमितः॥४२
अर्धांजलिस्तथा शुक्रं तदेव बलमुच्यते॥ अस्थ्नां शरीरसंख्या स्यात्षष्टियुक्तं शतत्रयं॥४३
जलजानि कपालानि रुचकास्तरुणानि च॥ नलकानीति तान्याहुः पंचधास्थीनि सूरयः॥४४
द्वे शते त्वस्थिसंधीनां स्यातां तत्र दशोत्तरे॥ रौरवाः प्रतराः स्कंदसेचनाः संपुटोलूखलाः॥ ४५॥

चितं ज्ञानप्रयोजनं नास्तीति न प्रपंच्यते॥४३॥ जलजानीति। अस्थीनि पंचधा। पंचप्रकाराणि। तथापि जलजानि शंखः कर्णयोः नासिकायाम् अस्थिद्वयं। जलजः शंखः तदाकारत्वात् शंखौ कपालानि शिरःसंबंधानि चत्वारि। यथाह याज्ञवल्क्यः द्वे शंखकौ कपालानि चत्वारि शिरसस्तथेति॥४४॥ ॥४५॥ शिवाय नमः॥ ॥

४६ रोम्णां सार्धकोटित्रयं तिस्रः कोट्योऽर्धकोटिश्चेत्यर्थः। श्मश्रूणि केशाश्च मिलित्वा त्रिलक्षकाः ॥४७॥ यस्मादिति॥ यस्माद्देहे ऽस्येव असारः पदार्थो भुवनत्रयेऽपि नास्ति तादृशं देहस्य रूपमेवं एवंविधकारणवाणि तन्निर्मितिसंबंधः ॥४८॥
देहेऽस्मिन्निति। अस्मिन्नुक्तरूपे देहे अहंकारेणाकत्रपि पापेन हन्तुना महापायमहताउपायेमोक्षोपायबुद्ध्या निचराः

समुद्गमं डलाश्चावर्तायनकुंडलाः॥ इत्यष्टधा समुद्दिष्टाः शरीरेष्वस्थिसंधयः ॥४६॥ सा
सार्धकोटित्रयं रोम्णां श्मश्रुकेशास्त्रिलक्षकाः॥ देहस्य रूपमेवं ते प्रोक्तं दशरथात्मज ॥४७॥
यस्मादसारो नास्त्येव पदार्थो भुवनत्रये॥ देहेऽस्मिन्नभिमानेन न महापापबुद्धयः ॥४८
हं॥ ५ अहंकारेण पापेन क्रियते तस्य सांप्रतं॥ तस्मादेतत्स्वरूपं तु विबोद्धव्यं मनीषिभिः ॥४९॥ १००
१०० ॥ ॥ इति श्रीशिवगीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे नवमोऽध्यायः॥ ९॥

नाऽक्रियंते। हंतेति। खेदे। अनुचितमेतदित्यर्थः। यद्वा। महदुद्भवउत्सवइसमरखवनान्महामोक्षोत्सवः तदनु महसः जीवनरूपस्य अपायो अपगमः मरणमिति यावत्। न विद्यते महोपायो मरणं यस्येति वा। अजरामर इति यावत्। दुर्लीत्यातिक्रमलेक्षणभंगुरे च देहे अजरामरत्वबुद्ध्या क्रियंत इति महदाश्चर्यमित्यर्थः। तस्मादेतस्याहंकारास्पदीभूतस्य देहस्य स्वरूपमवश्यं बाढं विरक्तिदायित्वेनेति भावः॥ इति शिवगीताव्याख्यायां नवमोऽध्यायः॥ ९॥ ॥ ७

अत्र अस्मिन्सर्वोक्तौ वा देहे जीवः किमवतिष्ठते। जायते वा। वद। किंच। जीवः कुतः। जीवत्वं कस्वाभाविकमाविद्यकं वेति वद। अस्य जीवस्य स्वरूपं वा किं सच्चिदानंदात्मकं तद्विलक्षणं वेत्यर्थः॥ देहांत इति। देहांते च जीवः कुत्र गच्छति क्व च तिष्ठति हत्वा दिसर्वं वद। पुनर्देहं कथमायाति। यदि वा पुनर्देहं नायाति तदपि वद। अत्र सर्वेषु पक्षेषु दूषणानि

श्रीराम उ० भगवन्नत्र जीवोऽसौ जंतोर्देहेऽवतिष्ठति॥ जायते वा कुतो जीवः स्वरूपं चास्य किं
वद ॥१॥ देहांते वा कुत्र याति गत्वा वा कुत्र तिष्ठति॥ कथमायाति वा देहं पुनर्नयदि वा वद ॥२॥

प्रतीयंत इति भावः॥ तथाहि। यदि जीवो व्यापकः सन्नवतिष्ठेत तर्हि मरणादौ जीवस्य गमनादिकं श्रूयमाणं बाध्येत। यदि जायेत तर्हि कृतहानमकृताभ्यागमश्च स्यात्। एवं जीवत्वस्य स्वाभाविकत्वे ब्रह्मणा सह जीवस्य भेदोऽपि स्वाभाविकः स्यात्। आविद्यकत्वे तु अन्यतापमोचा गुरूपदेशोपानतिरक्ति। एवं जीवस्य सच्चिदानंदरूपत्वमुक्तिस्त्वाता अविनाशापत्तिः। तद्विपरीतत्वे तु परमप्रेमास्पदत्वाद्यनुपपत्तिः। गमनादिसत्त्वे परिच्छिन्नत्वापत्तिः॥ तदिह लुत्र गंतरकादिप्रतिपादकबहुतरवचनविप्लवापत्तिरिति ॥२॥

साधुपृष्टमिति।प्रागुक्तसर्वप्रश्नेषुबाधकस्फूर्तिसंभवात्तद्द्वारस्यचगुरूपदेशंविनासत्तउत्सोऽपिसुलभमशक्यत्वादिति
भावः।इंद्राद्यैर्देवैरपिसुदुर्ज्ञेयंमहर्षिभिश्चसुदुर्ज्ञेयमित्यर्थः।वाशब्दःसमुच्चये।३। ॥४॥

साधुपृष्टंमहाभागगुह्याद्गुह्यतमंप्रियं॥देवैरपिसुदुर्ज्ञेयमिंद्राद्यैर्वामहर्षिभिः॥३॥अन्य
स्मैनैववक्तव्यंमयापिरघुनंदन॥त्वद्भक्त्याहंपरंप्रीतोवक्ष्याम्यवहितःशृणु॥४॥शिवाय०

१०१ अव्यक्त इति।अविद्ययाजीवात्मसाक्षित्वतद्रूपस्त्वर्थः।व्यक्तिकारणंघटादिभासकः।५।विशुद्धःबंधरहितःउपचयशून्यः १०१

ऽलिपउपदेहे।उपदेहोवृद्धिरिति।धातुवृत्तिकाराः।निरंजनःगमनरहितः।अंजूव्यक्तिम्रक्षणकांतिगतिषुइति
धातोःस्मृतेः।अतःसर्वधर्मविहीनश्चेत्यनेनविशुद्धनिर्लेपनिरंजनशब्दानांनपौनरुक्त्यं।६। ॥७॥

सत्यज्ञानात्मकोऽनंतःसपरानंदविग्रहः॥परमात्मापरंज्योतिरव्यक्तोव्यक्तिकारणं॥५॥नि
त्योविशुद्धःसर्वात्मानिर्लेपोहंनिरंजनः॥सर्वधर्मविहीनश्चनग्राह्योमनसापिच॥६॥
नाहंसर्वेंद्रियग्राह्यःसर्वेषांग्राहकोह्यहं॥ज्ञाताहंसर्वलोकस्यममज्ञातानविद्यते॥७॥ ॥

नाहंसर्वेति।तथाचश्रुतिः।नचक्षुषागृह्यतेनापिवाचान्यैर्देवैरिति।देवैःइंद्रियैरित्यर्थः।नन्वेवंसर्वप्रत्य
क्षवेद्यचब्रह्मरूपंकथंस्थितमितिवाच्यंनविरोधः।प्रपंचनाशात्स्वापन्नस्यसंकल्पमाणगोचरत्वापित्व
दुस्थापानवेदकगम्यत्वात्।तस्यनिराधिकरणद्वितीयवर्णंकृत्वैवसिद्धमितितात।७।। ॥८॥

परिणामादिकस्येत्यादिपदार्थनिरासः। विवर्त्तस्तु पूर्वाध्याये स्फुटमभ्युपगतोऽधिष्ठानत्वमेवास्यादिना ॥ ८ ॥ यतो वाच इ
त्यष्टाध्याये व्याख्यातमेतत् ॥ ९ ॥ न विजुगुप्सत इति। ब्रह्मात्मनैव सर्वग्रहणान्न किंचिदपि निंदती त्यर्थः ॥ १० ॥
११ ॥ एकोऽस्मीति। एकः आत्मेति पदच्छेदः। पृष्टादयो दिशः साधुः यदा तु। एको मायावर्णविकृतवर्णनाशात्स्वर

दूरः सर्वविकाराणां परिणामादिकस्य च ॥ ८ ॥ यतो वाचो निवर्तंते अप्राप्य मनसा सह ॥ आनंदं ब्र
ह्मणो ज्ञात्वा न बिभेति कुतश्चन ॥ ९ ॥ यस्तु सर्वाणि भूतानि मय्येवेति प्रपश्यति ॥ मां च सर्वेषु भूते
षु ततो न विजुगुप्सते ॥ १० ॥ यस्य सर्वाणि भूतानि त्यात्मैवाभूद्विजानतः ॥ को मोहस्तत्र कः शोक
एकत्वमनुपश्यतः ॥ ११ ॥ एषु सर्वेषु भूतेषु गूढोत्मा न प्रकाशते ॥ दृश्यते त्वग्र्यया बुद्ध्या सूक्ष्मया सू
क्ष्मदर्शिभिः ॥ १२ ॥ अनाद्यविद्यया युक्तस्तथाप्येकोहमव्ययः ॥ अव्याकृतब्रह्मरूपो जगत्कर्ता तथेश्वरः ॥ १३

दर्शिभि ॥ १२ ॥ ननु अयं द्वितीयश्चेत्तर्हि जगत्परिणतः स्यात् परिणामिनो विरहादित्याशंक्याह। अनादीति
अव्याकृतं नामरूपात्मनानभिव्यक्तरूपं अविद्याशबलं ब्रह्म तत्स्वरूपोहं जगत्कर्तेति संबंधः ॥ १३ ॥ ॥ ७

ज्ञानमात्र इति। ज्ञानमात्रे [illegible] अविषयतया अधिष्ठानबाते नैव परिदृश्यमानं जगदध्यस्तं। तथा च अयं प्रप
चो मिथ्या दृश्यत्वात्। स्वप्नप्रपंचवदित्यनुमानमपि अस्तु। अर्थे उपष्टंभकतया अर्के ॥ १४ ॥ ननु एतावता प्रबंधेन पर
मात्मस्वरूपेऽपि अध्यायोपक्रमो अक्षु जीवविषयकं मदीयप्रश्नस्योत्तरं न लब्धं तमेवमाशंक्याह। ना
नेति। अहमेव जीवत्वेन वसामीति संबंधः। अनेन जीवरूपं कीदृशमिति प्रश्नस्य चिरानंदमेकमस्तु तदेतर

ज्ञानमात्रे यथा दृश्यमिदं स्वप्ने जगत्त्रयं ॥ तद्वन्मयि जगत्सर्वं दृश्यतेऽस्ति विलीयते ॥ १४
नानाविद्यासमायुक्तो जीवत्वेन वसाम्यहं ॥ १५ ॥

चितं। उत्तरयेनेन वसतीति प्रश्नेनात्र घेत इति चान्तरितं। नानाविद्यासमायुक्तस्तु इत्यादिनोक्तमपि जीवत्वस्य
अविद्याकृतत्वान्निरूपितं च स्वरूपं अविद्याकृतेनान्विरुध्यत इति सूचितं। नानात्वं तु कृत्स्नकोऽहं तु कृतया दृश्यानीत्यं
सोऽनेनापलभ्येतेति दूषणमुक्तं अविद्याशबलेनावरणशक्तिरचयता पूर्णानंदः समस्थानत्यादिमाधुर्यं
न भासते पश्चादनुभासत इति मुक्तसंसारिणो विशेषोऽप्युपपादितः। लोकान्तरगमनादिकं कथमि
ति परं अवशिष्यते तदपि लिंगशरीरोपहितस्य नानुपपन्नमिति प्रपंचयिष्यति ॥ १५ ॥

पंचेति। पंच। इदमेव आचार्याः संजगुः पंचप्राणमनोबुद्धिदशेंद्रियसमन्वितं। अपंचीकृतभूतोत्थं सूक्ष्मांगं भोगसाधनमिति। १६। तत्र लिंगशरीरे अविद्यासमायुक्ते। अधिष्ठानतादात्म्यापन्नमित्यर्थः। एवंभूतं प्रतिबिंबचैतन्यं व्यावहारिको व्यवहारक्षमो जीव इत्यप्यन्वयः १७ अनाद्ययोः अनाद्य

पंचखेंद्रियाण्येवं पंचज्ञानेंद्रियाणि च॥ मनोबुद्धिरहंकारश्चित्तं चेति चतुष्टयं॥ वायवः पंच मिलितायांति लिंगशरीरतां॥१६॥ तत्राविद्यासमायुक्तं चैतन्यं प्रतिबिंबितं॥ व्यवहारिकजीवस्तु क्षेत्रज्ञः पुरुषोपि वा॥१७॥ स एव जगतां भोक्ता नाद्ययोः पुण्यपापयोः॥ इहामुत्र गती तस्य जाग्रत्स्वप्नादिभोक्तृता॥१८॥ यथा दर्पणकालिम्ना मलिनं दृश्यते मुखं॥ तद्वदंतःकरणगैर्दोषैरात्मापि दृश्यते१९ परस्पराध्यासवशात्स्यादंतःकरणात्मनोः॥ एकीभावाभिमानेन परात्मा दुःखभागिव२०

न्तयोः प्रवाहरूपेणानादिभूतयोरित्यर्थः १८। आत्मापीति। प्रतिबिंबितचैतन्यमपीति भावः। तथा च औपाधिकरूपाभावादात्मत्वव संसारसंबंधित्वं अपि च अवस्थितमिति भावः॥१९॥ दुःखभागिवेति। स्वरूपेण तु दुःखस्य विषमेसन्नाकनारूक्षयति। अरुण इव स्फटिको दृश्यत इत्यर्थः यथा २०

मूढचित्तस्यापि न हि जलत्वेन गृह्यमाणा मरुमरीचय आर्द्राः किंतु संतापकारका एव। तद्वत् स्वाविद्यात्मना स्वविषयकाविद्यारूपेण आत्मदोषेण कर्तृत्वादिधर्मवान् दृश्यते न त्वेतावता अकर्तृत्वादिस्वभावभंग इति भावः॥ इदमेवाभिप्रेत्याहुर्भाष्यकाराः॥ यत्र यदध्यासः तत्कृतेनाणुनापि गुणेन दोषेण वा न लिप्यत इति॥ अन्येप्याहुः। आरोपितेनारुणिम्नास्याभा

मरुभूमौ जलत्वेन मध्याह्नार्कमरीचिकाः॥ दृश्यते मूढचित्तस्य न त्वार्द्रास्तापकारकाः॥२१ तद्वदात्मापि निर्लेपो दृश्यते मूढचेतसां॥ स्वाविद्यात्मस्वदोषेण कर्तृत्वादिकधर्मवान्२२ तत्रान्नमये पिंडे हृदि जीवो वावतिष्ठति॥ आनखाग्रं व्याप्य देहं तद्भुवंवाहितस्पणु॥२३॥ ॥ ॥

विकस्फटिकस्वच्छत्वानपायादिति॥ मिथ्यात्वघटकीभूताभावं ग्रहीतुं अकर्तृत्वादिव्यवहारात् अपि तु उपपद्यत इति फलितोऽर्थः॥२२॥ छंदोग्याष्टमाध्याये अथ यदिदमस्मिन्ब्रह्मपुरे दहरं पुंडरीकं वेश्म दहरोऽस्मिन्नंतर आकाशस्तस्मिन्यदंतस्तदन्वेष्टव्यं तद्वाव विजिज्ञासितव्यमित्यादिना दहरविद्या श्रूयते तत्र हृदि वर्णानुरूपेण व्यापकस्याप्यौपाधिकपरिछेदं दर्शयासितं दह॰

डाक्टर भाऊ दाजी स्मारक
Dr. BHAU DAJI MEMORIAL

यति॥ तत्रैवेत्यादिना॥ अत्र अविच्छिन्ने अन्नमयोयः पिंडः तस्मिन्देहे आनखाग्रं व्याप्यापि जीवो हृद्यवतिष्ठते॥ उपाध्यंत
रेणायं तं अल्पपरिमाणं तां भजते इत्यर्थः॥ तदेतद्ध्रुवे विवरणे निअवहितः सन्शृणु॥२३॥ सोयमिति॥ सोयंमांसपिंडः तदभि

सोयंतदभिमानेनमांसपिंडोविराजिते॥ नाभेरूर्ध्वमधःकंठाद्व्याप्यतिष्ठतियःसदा॥२४
तस्यमध्येस्तिहृदयंसनालंपद्मकोशवत्॥ अधोमुखंचतत्रास्तिसूक्ष्मंसुषिरमुत्तमं॥२५

नेनतत्तादात्म्याध्यासबलेनविराजितोमनुष्योहंगौरोहमितिस्फूर्त्तिंलभते॥ तथाच आनखाग्रंस्थूलदेहव्यासोनसंदे ध
यं॥ अन्यथासामिताद्दात्म्याभावाद्देहास्यभानानुपपत्तेरित्यर्थः॥ इदानींहृदयावच्छेदमपयुक्तमल्पत्वंप्रपंचयितुंहृदय
स्वरूपंतावदाह॥ नाभेरूर्ध्वमिति॥ यत्प्राणवायुस्वरूपंनाभेरूर्ध्वंकंठादधस्तिष्ठतितस्यमध्येपद्मकोशनिभंअधोमु
खंहृदयंअस्ति॥ तत्रहृत्पद्मेसुषिरमस्ति॥२५॥ दहरश्रुतेःस्पष्टपर्यायः॥ तदेवंतत्रचात्रमयेइत्यादिनाश्लोकत्रयेणश्रुति

स्थंब्रह्मपुरपदंब्रह्मणःपुरमितिव्युत्पत्त्याब्रह्मोपलब्धिस्थानत्वाद्विद्याधिकारिशरीरंपुरमितिस्फुरीकृतं॥ उक्तंच॥
उपलब्धेरधिष्ठानंब्रह्मणोदेहउच्यते॥ तेनासाधारणत्वेनदेहोब्रह्मपुरंभवेदिति॥ तत्रास्तिसुषिरंइत्युक्तपक्षस्यदह
राकाशमस्मिन्नंतरित्याद्यर्थोपिश्रोतव्यआकाशशब्दःछिद्रपरइतिप्रतीयतेतत्रजीवइत्युक्तत्वाच्चतस्मिन्यदंतरितिश्रुतौ

दहराकाशमित्युक्तंतत्रजीवोवतिष्ठते॥२५

न। छिद्रपरोपयुक्तंब्रह्मजीवपरइतिप्रतीयतेतच्चायुक्तं॥ दहरउत्तरेभ्यइत्यधिकरणेब्रह्मैवात्राकाशशब्दार्थ
इतिनिर्णीतत्वात्॥ आकाशोवैनामरूपयोर्निर्वहिता॥ आकाशादेवसमुत्पद्यंतइत्यादिश्रुतिष्वाकाशशब्दस्यब्रह्मतयापर
सुप्रसिद्धत्वाच्च॥ आकाशस्तल्लिंगादितिसूत्रेतथैवाभिधानाच्चनचैवंतस्मिन्यदंतरित्यादेरनन्वयः॥ तच्छब्दस्यव्यवहि
तपुंडरीकपरामर्शकत्वात्॥ तथाचस्कंदपुराणेब्रह्मगीतायामुक्तं॥ अस्मिन्ब्रह्मपुरेवेश्मदहरंयदिदंसुराः॥ पुंडरी

कंतुतन्मध्ये आकाशोदहरो लिंग। सद्भावः सच्चिदानंदः सोन्वेष्टव्यो मुमुक्षुभिरिति। तथापि सुषिरंछिद्रं रंध्रं
अवकाशोवपासुषिरंस्समरः। तारातिआदेह अधिष्ठानत्वात्हितसुषिरं। अधिष्ठानं। अतएवात्तमंतद्व
चरूढाकाशमितिमुसाउक्तमितिगीता श्लोकाव्याख्येयः तत्रपूर्वोक्ते हृदयेयावतिष्ठते सजीवइ
वेति। जीवस्यलक्षणमाहपर अणुर्थत्यरल। अतएवास्मिन्नकरणे। उभेअस्मिन्द्यावापृथिवीअंतर

वालाग्रशतभागस्यशतधाकल्पितस्यच॥ भागोजीवःसविज्ञेयःसचानंत्यायकल्पते॥२६

वसमाहितइत्सादिना अन्नोषजगदाधारत्वं सेसत्तुरितिवजगन्मर्यादाधारकत्वमित्यत्र ब्रह्मलिंगानि
तथा। एषसंप्रसादोस्माच्छरीरात्समुत्थायेतिमुमुक्षोः जीवलिंगानिचश्रूयमाणानिनविरु
ध्यंतइतिदिक्। वालाग्रेकेशाग्रंतस्यशतभागःशतांशः सोपिशतधाकल्प्यः। तस्यापियोभागःस
जीवोविज्ञेयः उपाधिवशादतिसूक्ष्मइत्यर्थः। वास्तवंतुजीवस्वरूपमाह। सचेति। आनंत्यायपरिच्छे
दविरहायकल्प्यते। उपाध्यपगमेसतीतिभावः॥२६॥

अथयत्रैतस्माच्छरीरादुत्क्रामति अथैतैरेवरश्मिभिरूर्ध्वमाक्रमतेइतिश्रुतयो ध्मायन्तीतिचदहरविद्याशेषे श्रवणात्तत्प्रसंगादुपास
कानांमूर्धन्यनाड्योत्क्रमणपूर्विकांकनमुक्तिंकथयितुंनाडीस्तावत्प्रपंचयतिकदंबेति२७। हितामिति॥ हितावृक्षस्यविवरणंब
लमिति। प्रयच्छंतियस्मादिति। तथाचहितंकुर्वंतिहितयंतीतिहिताःतत्करोतीतिण्यंतात्पचाद्यचइतिभावः। हृद्गानाम्हृदयस्थनाड्यइतिश्रु
तिसिद्धैषासंज्ञा॥ याज्ञवल्क्यस्त्वाह॥ द्वासप्ततिसहस्राणिहृदयादभिनिःसृताः॥ हिताहितानाड्यइति॥ तत्रापि॥ हिताहिताकार्य॥ अतएव
हितानामेतिपूर्वोक्तेनैवबृहद्वाक्यतयेवव्याख्येयं॥ हितमाहितमहितंवायाभिस्ताभिर्हिताहिताइतिसंज्ञांतरमेवतत्रोक्तमितिकेचित्॥२८॥

कदंबकुसुमोद्बुद्धकेसराइवसर्वतः॥ प्रसृताहृदयान्नाड्योयाभिर्व्याप्तंशरीरकं॥२७॥
हितंबलंप्रयच्छंतितस्मात्तेनहितास्मृताः॥ द्वासप्ततिसहस्रैस्तासंख्यातायोगवित्तमैः॥२८
हृदयात्तास्तुनिष्क्रांतायथार्काद्रश्मयस्तथा॥ एकोत्तरशतंतासुमुख्याविष्वग्विनिर्गताः॥२९

विष्वगिति॥ सर्वतइत्यर्थः॥२९॥ एकानाडीसुषुम्णाख्यामान्मंजसाआंजस्येनमूर्धपर्यंतंऊर्ध्वंगच्छतीमूर्धगा अनंतफलत्वात्आनंतामेयो
च्यते॥३०॥ अनंतफलमेवविवरीतुमितरासांफलंतावदाह॥ प्रतींद्रियमिति॥ ज्ञानकर्मेंद्रियाणिमिलित्वादशेति हिमुसादितमाकृतस्वेके
कमिंद्रियंप्रतिदशनाड्यःनिर्गताः तामध्यशतनाड्यः शर्मादिहेतुत्वात्सुखदुःखादिज्ञानादौचहेतुत्वात्स्वप्नवहत्वाच्च यथायथंजाग्रदादि
भोगायउपयुज्यंते॥३१॥ सम्यगादिष्टासमादिष्टा अनंतफलकेतया प्रागुदाहृतायानाडीसातुसुषुम्णा। तयागच्छन्विमुच्यतेहि॥ तस्मादनंत
तोक्तियुक्तैवेत्यर्थः हिशब्दःप्रसिद्धौ॥ तथाचश्रुतिः॥ शतंचैकाचहृदयस्यनाड्यस्तासांमूर्धानमभिनिःसृतैका॥ तयोर्ध्वमायन्नमृतत्वमेतिविष्व

त्यादुत्क्रमणे भवतीति ॥ ननु सुषुम्णया निर्गमनं मोक्षोपाय इत्यत्र किं संगता ॥ ज्ञानादेव तु कैवल्यमिति शास्त्रसिद्धांतभंगादित्याशं
कयाह ॥ तयेति ॥ उपचितं आविर्भूतं चैतन्यं ज्ञानं तु उपास्यगोचरं भोगगोचरं च यस्य तथाभूतं जीवमाहुः अयं भावः ॥ नेह परममुक्तिरु
त्क्रमणजन्येति विवक्षितं ॥ तत्रोत्क्रमणस्यैवाभावात् ॥ तथा च श्रुतिः ॥ न तस्य प्राणा उत्क्रामंति इहैव समवलीयंत इति ॥ किंतु ब्रह्मलो
कावाप्तिरूपा गौणी मुक्तिः ॥ तथा चोपासकस्य पुरुषस्य तदेकोग्रज्यत्वेनं तत्र कालेन हूरे विद्यासामर्थ्यादित्यत्रयरीतिरीत्यासं

वहंत्यंभो यथा नद्यो नाड्यः कर्मफलं तथा ॥ अनंते धर्मगा नाडी मूर्द्धपर्यंतमंजसा ॥ ३० ॥ प्रती
द्रियद्वाराद्दश्चान्निर्गता विषयोन्मुखाः ॥ नाड्यः आमादिदेहं तु व्याप्य सादि फलं भुक्तये ३१
१०६ सुषुम्णेति समादिष्टा तया गच्छन्विमुच्यते ॥ तयोपचितचैतन्यं जीवात्मानं विदुर्बुधाः ३२ १०६

गुणोपास्यविषयिण्या मार्गविषयिण्याश्च वृत्तेरुदयो मरणकाले भवतीति शास्त्रसिद्धं ॥ तादृग्वृत्तिविशिष्टस्योत्क्रमणं पूर्वोक्तया
नाड्या ॥ अर्चिरादिमार्गेण गमनं च शास्त्रसिद्धं ॥ तथा च तदुपर्यपि बादरायणः संभवादिति न्यायेन ब्रह्मलोके एव निर्गुणसाक्षा
त्कारोपपत्तौ क्रमेण परममुक्तिः ॥ तदुक्तं ॥ ब्रह्मणा सह ते सर्वे संप्राप्ते प्रतिसंचरे ॥ परस्यांते कृतात्मानः प्रविशंति परं पदमिति ॥ ३२ ॥

ननु जीवस्य शरीरावच्छेदेनैव भानान्मध्यपरिमाणत्वमेवोचितं अन्यथा शरीरानवच्छेदेनापि भासेनेत्याशंकायां आह ॥ यथेति सर्व
गतस्यापि लिंगशरीरं अभिव्यंजकोऽप्रयोजकमित्यर्थः ३३ ३४ यथाज्ञेयमिति ॥ ज्ञेयं घटादिकं अनतिक्रम्येति यथाज्ञेयं ॥ अभिव्यक्ता घटा

यथा राहुरदृश्योऽपि दृश्यते चंद्रमंडले ॥ तद्वत्सर्वगतोऽप्यात्मा लिंगदेहे हि दृश्यते ३३ दृश्यमाने य
थाकुंभे घटाकाशोऽपि दृश्यते ॥ तद्वत्सर्वगतोऽप्यात्मा लिंगदेहेऽपि दृश्यते ॥ ३४ निश्चलः परिहूर्णो
पि गच्छतीत्युपचर्यते ॥ जाग्रत्काले यथाज्ञेयमभिव्यक्तविशेषधीः ॥ ३५ आप्नोति निष्क्रियः सर्वो
भानुर्दशदिशो यथा ॥ ३६ नाडीभिर्वृत्तयो यांति लिंगदेहसमुद्भवाः ॥ तत्तत्कर्मानुसारेण जाग्रद्भोगोपल
ब्धये ३७

धाकारांतःकरणस्य निवृत्तावरणा विशेषधीर्घटाद्युपहितचैतन्यं यस्य तथाभूतः सन्सर्वान्पदार्थान्व्याप्नोति ॥ प्रतिकर्मव्यवस्थानु
सादने स्फुटमेतत् ३६ ॥ वृत्तयः इंद्रियजन्यवृत्तयः यांति प्राप्नुवंति ॥ विषयं व्याप्यैवोत्पद्यंत इत्यर्थः ॥ ३७ ॥ ॥ शिवाय नमः ॥

दृश्यमिति। तदापीतिः संसारव्यपदेशाहितस्त्रेऽस्थितमतत् ३८। अवतिष्ठतइति। समवस्थास्यदतितदः अज्ञनइतितिरो
धः। स्वेनन्यान्वयः ३९। इदंलिंगशरीराख्यमामोक्षान्नविनश्यतीत्युक्तं। तदेवद्रढयितुं अवस्थात्रयेतत्सद्भावप्रति
पादयन् जाग्रदवस्थामभिधायस्वप्नावस्थामाह। जाग्रदिति। जाग्रद्भोगप्रदंयत्कर्म तस्यक्षयः प्रतिबंधस्तद्वशात्स्व

इदंलिंगशरीराख्यमामोक्षान्नविनश्यति॥ आत्मज्ञानेनदग्धेऽस्मिन्सावधेस्यशरीरके॥ आत्मस्व
रूपावस्थानंमुक्तिरित्यभिधीयते॥३८ उत्पादितेघटेयद्वद्घटाकाशत्वमृच्छति। घटेनष्टेयथाकाशः
स्वरूपेणावतिष्ठते॥३९ जाग्रत्कर्मक्षयवशात्स्वप्नभोगउपस्थिते॥ बोधावस्थांतिरोधायदेहाद्याश्रय
१०७
लक्षणम् ४०

प्नभोगप्रदकर्मणउद्भवेसति अन्यामवस्थांप्रयातीतिसंबंधः। किंकृत्वा देहादयः जाग्रत्कालीनदेहगेहग्रामा १०७
दयस्तेषामाश्रयणं आश्रयः साक्षात्कारइतियावत् तल्लक्षणांतत्स्वरूपांबोधावस्थांपरित्यज्येत्यर्थः। देहोपित
त्रादृशएवेति। ४०।

कर्मेति। कर्मणस्स्वप्नभोगप्रदस्य उद्भावितउद्बोधितः। संस्कारः। स्वाप्नगजादिजनकीभूतायस्यतितथाभूतः स्वप्नरि
रंसयास्वभिन्नायरमणाभिलाषमात्रेणैकवारेवेच्छयेत्यर्थः। रंभेरभाविच्छार्थस्सतान्। ततो भावश्चप्रत्ययानिस्स
प्रत्ययः। अयंभावः स्वप्नेतावज्जाग्रतीवघटपटादयः पदार्था अनुभूयंतेस्वानुभवानप्रमाणः। जागरणान
तरेबाधात् अमत्वअनिर्वचनीयख्यातिरूपएवेति। तत्रपदार्थोत्पत्तिः स्वीयाकौ। तत्रदोषसंस्कारसंप्रयोगजन्य

कर्मोद्भावितसंस्कारस्तत्रस्वप्नरिरंसया॥ अवस्थांचप्रयात्यन्यांमायावीमात्ममायया४१

तायाः शुक्तिरजतादिस्वीकारादिहत्पितक्तत्त्वयमुपपादनीयं। तत्र अन्यामवस्थामित्युक्त्या निद्राख्यासमाव
स्थे। तत्रागंतुकोदोषइत्युक्तं। कर्मोद्भावितेत्यादिनाच्यादुष्टः संस्कारोप्यस्तीत्युक्तं। आत्ममाययेत्यनेनसप्र
लाज्ञानकार्यस्यप्रपंचस्यत्युक्तं। नचैकैवयदेवंव्यावहारिकतापत्तिः। निद्राख्यस्यदोषस्याधिकत्वेनप्रो
षस्यापिसत्वेनप्रातिभासिकतोपपत्तेः। अतएवदेशकालाद्यनानुगुण्यमपिनदोषायत्वेनत्सूत्रकारोप्याह।
संध्येसृष्टिराह हि। मायामात्रंतुकार्त्स्न्येनानभिव्यक्तस्वरूपत्वादिति।४१॥ ॥ ॥७॥ ॥७॥ ॥ ॥

Dr BHAU DAJI MEMORIAL

ननुतथापिसंप्रयोगाभावेकथंस्वप्नाध्यासइत्याशंक्यसंप्रयोगोहिअधिष्ठानसामान्यज्ञानसंपादकतयाशुक्तिरजतादावुप
युज्यते।स्वाप्नपदार्थानांतुमूलाज्ञानकार्यत्वाच्चैतन्याधिष्ठानं।तत्सामान्यज्ञानंतुआनंदात्मनाआवृतंस्वरू
पमेवस्फुरत्स्वयंयितुंआमामोयेयसुक्तिः।नचैवंज्ञानाद्बाधनबाधानस्यादितिवाच्यंसंविलासस्वविषयानिवर्त्ति
रूपबाधविरहइष्टापत्तेःमिथ्यात्वनिश्चयमात्रेणतत्रकाचिदनुपपत्तिः।मूलाज्ञानानभ्युपगंतॄणांशुक्तिरु

घटादिविषयान्सर्वान्बुद्ध्यादिकरणानिच॥भूतानिकर्मचाज्ञातोवासनामात्रसंस्थितान्॥४२॥
एतान्पश्यन्स्वयंज्योतिःसाक्ष्यात्माव्यवतिष्ठते॥अत्रांतःकरणादीनांवासनाद्वासनात्मनो४३

प्येषबहिर्गतिरितिरिक्॥४२॥स्वाप्नपदार्थानांशुक्तिरजतादिवत्केवलसाक्षिभास्यतामेवाह।घटादीतिसार्द्धश्लोकेन।
वासनामात्रेणप्रमातरिअवस्थितान्अंतःकरणोपहितचैतन्येअध्यस्तानित्यर्थः।तथाभूतान्सर्वान्
घटादिविषयान्तथाकर्मचैवभूतानिउत्पन्नानिबुद्ध्यादीनिकरणानिचस्वप्नपदार्थान्पश्यन्भासयन्
साक्षिभूतआत्माव्यवतिष्ठतइतिसंबंधः।ननुस्वप्नेऽपिस्थूलाभ्युपगमेकथंतत्रवासनामात्रमितिव्यवहा

र इत्याशंक्याह॥अत्रेति॥अत्रचअंतःकरणादीनांवासनात्अध्यस्तत्वेनात्मन्यवस्थापनात्आत्मनेति॥बोद्धव्यं॥ननुसंस्कार
मात्ररूपत्वंअपरोक्षतयाभावादित्यर्थः॥४३॥वासनाख्यसंस्कारप्रभवत्वाद्वातथाव्यपदेशइत्याह॥वासनाइति॥यथाजा
ग्रद्भूमौतद्वदत्रापिकर्तृकर्मक्रियात्मकःप्रपंचोदृश्यते॥यद्यपिवासनाघटादिव्यापाराकारेणतथापितत्रदंडादयोऽपिअ

वासनामात्रसाक्षित्वंतेनतत्रपरात्मनः॥वासनाभिःप्रपंचोत्रदृश्यतेकर्मचोदितः॥जाग्रद्भूमौयथातद्व
त्कर्तृकर्मक्रियात्मकः॥४४॥निःशेषबुद्धिसाक्ष्यात्मास्वयमेवप्रकाशते॥वासनामात्रसाक्षित्वंसाक्षिणः
स्वापउच्यते॥४५

अन्वयव्यतिरेकाभ्यांकारणंनत्विहेतिभावः॥४४॥निःशेषाणांबुद्धीनांबोधविषयाणां॥कर्मणोक्तिःसाक्षिभू
तआत्मास्वयमेवप्रमाणजन्यवृत्तिनिरपेक्षःसन्नेवप्रकाशते॥तदेतत्पूर्वोक्तंवासनामात्रसाक्षित्वंस्वापःस्वप्नइत्युच्यते
४५

भुक्तेति॥भुक्तानांव्यावहारिकाणांजन्मनिजाग्रत्कालेइतियावत्॥यद्यत्॥भुक्तंस्तन्यपानकंदुकक्रीडादिकर्मतद्विषयकवास
नाप्राबल्यादाद्यवयसिस्वप्नमपिप्रायस्तद्रूपंपश्यति॥अत्रहेतुः॥नेदीयस्त्वादितिसन्निहितकालीनानुभवगोचरसजा
तीयत्वादित्यर्थः॥अन्तिकायनंतिकंनेदीयः॥अंतिकबाढयोर्नेदसाधाविति नेदादेशः॥४६॥मध्यइतितारुण्येइंद्रियाणांपा
टवीहृतव्यापारभरक्षमःसन्वासनासहितंयत्कर्मतद्वशात्प्रायेणजाग्रत्कालानुभूतान्अध्यापनयुद्धाभिषयाणोआ

भुक्तंजन्मनियद्भूतंकर्मतद्वासनावशात्॥नेदीयस्त्वाद्वयस्याद्येस्वप्नंप्रायःप्रपद्यते ४६
मध्येवयसिकार्कश्यात्करणानामिहार्हितः॥प्रायेणवीक्षतेस्वप्नंवासनाकर्मणोवशात् ४७
पिपासुःपरलोकंतुकर्मविद्यादिसंभृतं॥भाविनोजन्मनोरूपंस्वप्नआत्माप्रपद्यते ४८।

दीनेयवीक्षते४७॥पिपासुरिति॥परलोकंस्वर्गनरकादिकंपिपासुःसंभावितपरलोकगमनइतियावत्॥आकाङ्क्षांयावर्त्ति
कोत्कःसन्नलाघ्नोजनःकर्मणाविद्यादिभिश्चसंभृतंतत्अथप्रायंभाविनोजन्मनोयद्रूपंतत्प्रकर्षेणपश्यति॥भाविजन्म
स्वरूपस्यमान्यवश्यतीत्यर्थः॥मिथ्याभूतस्याःसूचकतोपपत्तेः॥यथाहुःसूत्रकाराः॥सूचकश्चहिश्रुतेराचक्षतेचतद्विदइति
४८

यद्वदिति॥गगनमंडलेप्रक्षेपात्पतनात्बहुतराद्भ्रमणात्श्रांतःश्येनःनयतीतिनीडःश्रमपरिहारेणपायंचारयन्
पक्षौआकुंच्यनीडेनिलयनायैवश्रेपणाययद्यततेएवंजाग्रत्स्वप्नावस्थयोःश्रांतोऽहंकारविच्छिन्नःआभासात्मा
पीतोलीनःकरणानांइंद्रियाणांग्रामोयस्मिन्सतथोक्तःसन्कारणेनईश्वरात्मनासहएकतामेति।यथा
पिग्रामोस्यंजीवब्रह्मणोर्बिंबप्रतिबिंबभावेनऔपाधिकोभेदःस्वस्वसत्त्वोपाधीतत्त्वबिंबेचसत्यौप

यद्वत्प्रपतनात्श्येनःश्रांतोगगनमंडले॥आकुंच्यपक्षौयततेनीडेनिलयनायतः॥४९॥ ॥

धिकस्यानलस्ययोगात्।तथापिस्वप्नदुःखादिभोगोपाधेरहंकारस्यस्वस्योपविलयात्स्वरूपसुखानंदेनआ
ग्रहणापेक्षयाकिंचिदधिकोभासतेदुःखवनात्वीत्येतावन्मात्राप्रायेणएकतामेतीत्युक्तं।एतेनमत्सं
पत्तिश्रुतमपिव्याख्याता।सुषुप्तिकालेसकलेविलीनेतमोभिभूतःसुखरूपमेतीतिकैवल्योपनि
षत्प्रभृतयश्चान्यानुसंधेयाः॥४९॥

५०॥ ननुएकतांचेत्प्राप्नोतितर्हिपुनरुत्थानानुपपत्तिरितियथाश्रुतापर्याशंकायांप्राप्तायामाह। नाडीमार्गैरिति। विज्ञा-
नात्माअभिमानीसर्वंचक्षुरादिकंगृहीत्वाईश्वराख्येअव्याकृतमायोपहितचैतन्येइतियावत्प्रलीयतेसूक्ष्मरूपेणास्तेन
तुनिरन्वयंनिवर्ततेज्ञानविरहात्। अतोनास्तिदोषइतिभावः। तदेतदुक्तंप्राक् इदंलिंगशरीराख्यमाख्यास्त्रौन

एवंजाग्रत्स्वप्नभूमौश्रांतआत्मापिसंचरन्॥ आपीतकरणग्रामःकारणेनैतिचैकतां॥५०॥ ॥
नाडीमार्गैरिंद्रियाणामाहृत्यादायवासनाः॥ सर्वंग्रसित्वाकार्यंचविज्ञानात्माप्रलीयते॥५१॥
११० ईश्वराख्येऽव्याकृतेयतथासुखमयोभवेत्॥ कृत्स्नप्रपंचविलयस्तथाभवतिचात्मनः॥५२॥ ११०॥

विनश्यतीति। कृत्स्नप्रपंचविलयइति। इदंचहिरण्यगर्भस्यसमष्ट्यभिमानिनःप्रमातुःसुषुप्तिमभिप्रेत्योक्तं।
व्यष्टिमात्रस्यसुषुप्तौतुतदीयाहंकारादिमात्रविलयइत्यत्रैवविस्तरः ५० शिवायनमः॥

ननुसुखमयोभवेदित्युक्तमसंगतं। सुखशब्दस्यशुभकर्मोपार्जितान्तःकरणवृत्तिविशेषविशिष्टस्वरूपसुखेशक्तेनां-
तःकरणविलयकालेतदयोगात्। अथात्रलक्षणयास्वरूपसुखमात्रंविवक्षितंतर्हितस्यसार्वदिकत्वाज्जाग्रदादिभ्यःको
विशेषः। अथस्वरूपसुखंअन्यदाआवृतंसुषुप्तौतुनावृतमितिचेत्तर्हिमोक्षस्यापिनोविशेषःस्यात्। अधिष्ठानसा-
क्षात्कारंविनाआवरणनिवृत्तेरयोगात्। इत्याशंक्याह। योषितइति। आनंदमयःअबाह्यःवृत्तिरूपोनेत्यर्थः। अनांतरः।

योषितःकाम्यमानायाःसंभोगांतेयथासुखं॥ सआनंदमयोबाह्योनांतरःकेवलस्तथा॥५३॥

मोक्षावस्थायामिवनिवृत्तमूलावरणोऽपिनेत्यर्थः। ननुकुत्रदृष्टमित्याकांक्षायामाह। काम्यमानायायोषितःसंभोगांते
संभोगमध्येयत्सुखंतथाकेवलःसन्निति। अयंभावः विषयसंबंधजनितवृत्तौयथास्वरूपमानंदएवईषदभिव्यज्यते। स-
र्वात्मनाभिव्यक्तोमोक्षविशेषात्। ईषदप्यनभिव्यक्तोअनुभवविरोधाद्विषयानुपादानप्रसंगाच्च। तथैवान्वयव्यतिरेका-
भ्यांसुषुप्तावपिस्वरूपसुखमभिव्यज्यते। तदेवंचैकपलंआनंदमयशब्देनविवक्षितमिति॥५३॥ ॥-॥

प्राज्ञेति। प्राज्ञात्मानं ईश्वरात्मानं समासाद्य सुषुप्तौ प्राप्यापि सः। सुषुप्तः विज्ञानात्मा जीवः तथा जाग्रदादौ यथा तत्
द्विज्ञानात्मैव। न तु भेदापन्नम् इत्यर्थः। तथा तिष्ठन् सन् कारणात्मा सन्नुच्यते। दुःखराहित्यसाधर्म्यादित्यर्थः। यथा च
तन्नथात्मम धरात्। ननु सुषुप्तौ अंतःकरणस्य विलीनतया जन्यज्ञानाभावात्संस्कारासंभवे सुषोत्थितस्य सु

प्राज्ञात्मानं समासाद्य विज्ञानात्मा तथैव च॥ विज्ञानात्मा कारणात्मा तथा तिष्ठंस्तथापि सः ५४
अविद्यावृतत्वान्नानुभवत्येव सुखवत्तया॥ अज्ञानमपि साक्ष्यादिवृत्तिभिश्चानुभूयते॥५५॥ १११

खमहमस्वाप्सं न किंचिदवेदिषमित्याद्यनुसंधानं न स्यादित्याशंक्याविद्यावृत्त्या तत्समर्थयते। अथापि स इ
त्यादिना तस्योपपद्यतइत्यंतेन। अथापि अंतःकरणस्य विलीनत्वेपि सः सुषुप्तः सन् यथावत्सुखमनुभवत्येव
५४। अज्ञानमपीति। न केवलं सुखमेव। किंतु अज्ञानमपि साक्ष्यादिवृत्तिभिः स्वापकालीनाविद्यावृत्तिभिः
अनुभूयते विषयीक्रियते॥५५॥

अविद्यावृत्तेः फलमाह। तथेति। तथा सतीत्यर्थः। यथापि यद्यपि सुखवृत्तिर्न चैतन्यं यावतामर्थसत्ता निश्चयस्तस्य तन्नाशस्य नावकाशः स्वं
स्फारजनकहारविद्यावृत्तेरविद्यादिसकलविषयकत्वेनावस्थितत्वापि भाव्यनुसंधानगोचरः सर्वोपि विनिगमकाभावादित्य
पादवेगाचरतया स्वीकर्तव्य इति भावः॥५६॥ तदेवमवस्थात्रयं निरूपितं। इदं चेहलोकपरलोकयोः साधारणमित्याह। जा

तथाहं सुखमस्वाप्सं नैव किंचिदवेदिषं॥ इत्येवं प्रत्यभिज्ञापि पश्चात्तस्योपपद्यते ५६ जाग्रत्स्वप्नसु
षुप्त्याख्यमेवं ह्यामुत्रलोकयोः॥ पश्चात्कर्मवशादेव विस्फुलिंगा इवानलात्॥५७ जायंते कारणा
द्देहमनोबुद्ध्यादिकान्नितु॥ पयःपूर्णघटो यद्वन्निमग्नः सलिलाशये॥ तैरेवाढ्य आयाति विज्ञानात्मा त
थैव तान् ५८

जाग्रदिति। पश्चादिति। सुषुप्त्यनंतरमित्यर्थः ५७ ननु सुषुप्तावहंकारादेर्विलये पुनर्जाग्रत्सु अहंकारोत्पत्तौ तत्कृतज्ञानात्कर्मानुगमो
स्यादित्याशंक्याह। पय इत्यादि। अयं भावः। निरन्वयनाशाभ्युपगमे भवेदयं दोषः॥ सुषुप्तौ तु सूक्ष्मरूपेणाहंकारादि
सत्त्वस्यैव पुनः स्थूलावस्थाभ्युपगमान्न कोपि दोष इति। उक्तं चैवं पंचपादिकायां। सुषुप्त्यादौ चाहंकारादिविशेषसंस्कारमा

न्नेराषं स्थित्वा पुनरुद्भवतीति। स्पष्टतरंचेदं उत्तरमीमांसायां सएवतुकर्मानुस्मृतिशब्दविधिभ्यइत्यधिकरणे ।५८। अथा
यापक्रमकृतस्य जीवस्वरूपप्रश्नस्योत्तरं एतावत्पर्यंतंप्रोक्तंतदेव विशदयति। विज्ञानेति। सः परमात्मैव विज्ञानात्म

विज्ञानात्माकारणात्मातथातिष्ठंस्तथापिसः॥दृश्यतेसर्वभूतेष्वेवनष्टोमायात्परदृश्यतां॥५९॥
एकाकारोर्यमातत्तत्कार्येष्वेवंपरःपुमान्॥कूटस्थोदृश्यतेतद्वद्गच्छन्नागच्छतीवसः॥६०॥ ११२

११२

कारणात्माचेति। तथान्यतिष्ठत। रूपद्वयेनस्थितइत्यर्थः। यतएव अज्ञानादिषुसत्स्वेवसर्वप्रपंचजातंदृश्यते नेष्टेषु
तु अज्ञानादिषु अदृश्यतामायाति। ५९। एकेति। यथाएकाकारोपिसूर्यः तत्तत्कार्येषुजलादिषुदृश्यतेएवंपरः
पुमान्कूटस्थोपितदुपाधिवशादेवगच्छन्नागच्छन्नीवदृश्यते।६०।

ननुविरुद्धधर्माःसर्वेएकस्यकथंस्वीकर्तव्याइत्यतआह। मोहमात्रमेव अंतरायःस्वरूपावभासप्रतिबंधकः यो अ
स्य तन्निमयाकरणीयावल। तथाभूतोयस्मिन्तस्यभावः। मोहमात्रान्तरायत्वंतस्मात् अस्यसर्वमुपपद्यते। विरुद्धध

मोहमात्रांतरायत्वात्सर्वंतस्योपपद्यते॥देहाद्यतीतआत्मापिस्वयंज्योतिःस्वभावतः॥एवंजी
वस्वरूपंतेप्रोक्तंदशरथात्मज॥६१॥ ॥इतिपद्मपुराणेशिवगीतायांजीवस्वरूपंनामदशमोध्याय
१०

र्माणांमोहमा।

र्माणांस्वसमानसत्ताकभेदस्य। एकत्वेपिधर्मिसमानसत्ताकभेदप्रयोजकत्वंनास्तीतिभावः।६१। शिवायनमः।
इतिश्रीशिवगीताव्याख्यायांदशमोध्यायः।१०।

DR BHAU DAJI

गमनागमनेकथमितिप्रश्नेलिंगशरीररूपोपाधिवर्त्यौ।तर्हिदृष्टुन्नरंदत्तंतदेवविस्तारयत्येकमेकादशे।ध्यायआर
भ्येतदेहांतरेति॥१॥यतइति।प्रथमांतानामि।यद्भुक्तंपीतंचतस्यरसात्परिणामविशेषात्तस्थूलदेहलिंगदेहयोःप

श्रीभगवानुवाच॥देहांतरगतिंतस्यपरलोकगतिंतथा॥वक्ष्यामिनृपशार्दूलमत्तःशृणुसमाहितः॥१॥
भुक्तंपीतंयतस्तान्नतद्रसादात्मबंधनं॥स्थूलदेहस्यलिंगस्यतेनजीवनधारणं॥२॥
व्याधिनाजरयावापिपीड्यतेजाठरोनलः॥श्लेष्मणातेनभुक्तान्नंपीतंवानपचत्यलं॥३॥

रसश्चात्मबंधनंस्थूलबंधनंभवति।तेनदृढबंधनेनजीवस्यप्राणरूपायोधारणंभवति२व्याधिनेति।व्या
धिनाजरयावापीडितेनश्लेष्मणाजाठरोनलःपीडितःस्यात्नलःभुक्तमन्नंपीतंवाअलंपर्याप्तंनपचति।श्लेष्मणः
तपीड्याकुंठितशक्तिः॥३॥

गमनागमनेनकथमितिप्रश्नेलिंगशरीररूपोपाधिवशाद्यौस्वर्गादिषुनरदेहंत्यक्त्वादेवशरीरादिव्यक्तमेवादृष्टो। ध्यायआर
भ्यतेदेहांतरेगति॥१॥ यतइति। प्रथमंतावत्भ्रम॥यद्भुक्तंपीतंचतस्यरसात्परिणामविशेषात्तस्यस्थूलदेहस्यलिंगदेहस्यच

श्रीभगवानुवाच॥ देहांतरगतिंतस्यपरलोकगतिंतथा॥ वक्ष्यामिनृपशार्दूलमत्तःशृणुसमाहितः॥१॥
भुक्तंपीतंयतस्तत्रतद्रसादामबंधनं॥ स्थूलदेहस्यलिंगस्यतेनजीवनधारणं॥२॥ ॥
व्याधिनाजरयाचापिपीड्यतेजाठरानलः॥ श्लेष्मणातेनभुक्तान्नंपीतंवानपचत्यलं३

रसस्यरसात्आमबंधनंसूत्रतनंबंधनंभवति। तेनदृढबंधेनजीवस्यप्राणस्यवायोर्धारणंभवति२ व्याधिनेति। व्या
धिनाजरयावापीडितेनश्लेष्मणाजाठरानलःपीडितस्यानलःभुक्तमन्नंपीतंवाअलंपर्याप्तंनपचति। श्लेष्मर
सपीड्याकुंठितत्वाल्लिकत्वात्॥३॥

भुक्तेति। यद्यपिनसंधातवःशुष्यंतेपतथापिदीप्तेनजाठरानलेनापक्व ध्याःप्राणवायवःपुनर्धातून्
भुक्तपीतयोःरसेनसारभूतपरिणामविशेषेणलिंपंतिउपचयंप्रापयंतीतियावत्वायुविशेषस्तुतल्लिंगाः

भुक्तपीतरसाभावाद्दास्तुशुष्यंतिधातवः॥ भुक्तपीतरसेनैवदेहंलिंपतिनित्यशः॥४॥ स
मीकरोतियस्तस्मात्समानोवायुरुच्यते॥ इदानींतद्रसाभावादामबंधनहानितः५

भ्यात्समाकुर्वन्सन्समंआनयतीतितुल्यसाससमानइत्युच्यते। एषाचसरसत्वावस्थायांज्ञायमानास्त्येति
हक्तेति। इदानींजठरानलपीडाकालेतुषांभुक्तपीतानांरसस्याभावात्आमस्यसूत्रतनबंधनस्यहतेर्लिंगहानितःवि
रहतःइतिएतत्त्र्यलिंगतनोर्जीवस्यनेनवक्ष्यमाणेनसंबध्यते॥५॥

परिपक्वेति। यथा कूष्माण्डादिफलं गौरवत गुरुत्वात् स्वयमेव पुरुषप्रयत्नं विनैव पतति तथा लिंगशरीरं परिप
क्वभावो यस्य तेथा तेन तनो स्थूलदेहाद्व्रजेत्॥६॥ तन्नाडीति। रूपी कालाग्निरिन्द्रियाणां वासनाः। तथा। आ
ध्यात्मिकानि जीवात्मन्यध्यस्तानि बुद्धिप्रभृतीनि तथा आधिभौतिकानि भाविदेहारंभकीभूतानि साम्य

परिपक्वरसत्वेन यथा गौरवतः फलं। स्वयमेव पतत्यस्मात् तथा लिंगं तनोर्व्रजेत्॥६॥ त
न्नाड्यानादपाहृष्य रूपीकारणं तु वासनाः। कुण्डुच्छ्वासान वयेषु तथा तेनैकतां गतः॥७॥
११४ आध्यात्मिकाधिभूतानि कृत्य सर्वे एकतां गतः। ततो लिंगः प्राणवायुः संयुक्तो नववायुभिः॥ ११४

पय प्रभृतीनां सूक्ष्मरूपाणि। हृत्स्थितम् आकृष्य एकतां गतः। पांचभौतिकवत् संपिंडितस्य। एष प्राणवायुः
इतरैर्नवभिर्वायुभिः संयुक्तः सन् कुण्डलिनीभक्षितत्वात् तत्प्राणवायुना एकतां गतस्तदात्मापन्नो
जीवो विउपसर्पतीति वक्ष्यमाणेन संबध्यते। अत्र भाविदेहारंभकीभूते सह लक्ष्मणं च ध्यां यथा पंच
म्यामाहुतावापः पुरुषवचसो भवन्तीत्यस्य व्याख्याने एवं कं फणः श्रम रथि वी पुरुष योषित् पंचस्वग्निषु अ

हुतासन्न व्यत्र रेतोरूपाः पंचहुताः शरीरारंभकत्वात् तु पंचम्यामाहुतावापः पुरुषवचसो भवन्तीति श्रुत्यर्थः। इति। त
दंतरप्रतिपत्तौ रंहति संपरिष्वक्तः प्रश्ननिरूपणाभ्याम् इत्यधिकरणे चानेन रीत्यैतद्बोध्यं॥८॥ विद्याकर्म
भ्यां समायुक्तः वासनाभिश्च पूर्वप्रज्ञानुसारिणीभिः संयुतः। तथा च श्रुतिः। तं विद्याकर्मणी समन्वारभेते

प्रज्ञात्मानं समाश्रित्य नाडीमार्गं समाश्रितः। विद्याकर्मसमायुक्तो वासनाभिश्च संयुतः॥९॥
प्रज्ञात्मानं समाश्रित्य विज्ञानात्मोपसर्पति। यथा कुंभो नीयमानो देशाद्देशान्तरं प्रति॥१०॥
स्वपूर्णोऽरघसर्वत्र सन्नाकाशोऽपि तत्र तु। घटाकाशाख्यतां याति तद्वल्लिंगं परात्मनः॥११॥

तत्पूर्वप्रज्ञा चेति॥९॥ प्रज्ञात्मानं ईश्वरं समाश्रित्य। तत्संनिधिरिति सान्निध्यार्थः। उपसर्पतीति समीपाधिकगमनं भ
वति। तथा च श्रुतिः। प्राज्ञेनात्मना अन्वारूढ उत्सर्जन्यातीति। उत्सर्जन् हिक्कादिशब्दं कुर्वन्निति भाष्यका
रः। अन्यथा यातीत्यनेन नन्वानन्तर्यस्यादिति तदाशयः॥१०॥ यथेति। देशाद्देशान्तरं नीयमानः कुंभो यथा सर्व
त्र स्वपूर्ण एव। सः पूर्वघटविनिर्भिन्नः आकाशः तत्र तस्मिन् घनयनेन सति घटाकाशाख्यतां याति त

हृस्वरात्मनो लिंगं पुनर्देहांतरं याति तत्रापि वित्तसंबद्धमेव चास्तेइति भाव:। यथा मत्स्य: कूलद्वयं संचरत्येवं यथाकर्मं कर्मा
त्पनतिक्रम्य। अनुसारत: उपाध्यनुसारेण आमोक्षात्संचरति ॥१२॥ पापेति। केवलं पापभोगाय गच्छेच्चेत्तर्हि नरका
नेवसन्वय:। उभयभोगाय तु मनुष्यलोकं गच्छतीति भाव:। उभाभ्यां मनुष्यलोक इति ॥१३॥

पुनर्देहांतरंयातियथाकर्मानुसारत:॥आमोक्षात्संचरत्येवंमत्स्य:कूलंद्वयंयथा॥१२॥
पापभोगायचेद्गच्छेद्यमदूतैरधिष्ठित:॥यातनादेहमाश्रित्यनरकानेवकेवलं॥१३॥ ॥
११५ इष्टापूर्तानिकर्माणियेनुतिष्ठंतिसर्वदा॥पितृलोकंव्रजंत्येषयाममाश्रित्यबर्हिष:॥१४॥ ११५

इष्टेति। यामं यमसंबंधिनं इतं आश्रित्य तेन नीयमाना:। सान्निध्यार्थं बर्हिष: श्रौतस्मार्ताग्ने:। यागस्याग्निसाध्य
त्वात्सा पितृपरंपरया प्रयोजक इति भाव:। बर्हि: शुष्मा कृष्णवर्त्मा इत्यमर: अत्र बर्हिरिति पृथक्पदं बर्हिर्मुखा इति
देवानामिति स्वामी। कर्मणा पितृलोक इति श्रुतिश्चेहानुसंधेया ॥१४॥

अथ य इमे ग्राम इष्टापूर्ते दत्तमित्युपासते ते धूममभिसंभवंतीत्युपक्रम्य आकाशाच्चंद्रमसं तेन धूमादि: पितृयान: पं
था श्रुतावुक्त इष्टादिकारिणां। तदेव दर्शयति धूममिति। धूमो रात्रि: कृष्णपक्षो दक्षिणायनं चैता आतिवाहिका अभिमानिन्य
व्या आतिवाहिकास्तल्लिंगादिति न्यायात्। यद्यपि। यत्र काले त्वनावृत्तिमावृत्तिं चैव योगिन: प्रयाता यांति तं कालं वक्ष्या

धूमंरात्रिंगत:कृष्णपक्षंततस्माच्चदक्षिणं॥अयनंचततोलोकंपितृणांचतत:परं॥१५ चंद्रलोकं
दिव्यदेहंप्राप्यभुंक्तेपरांश्रियं॥तत्रचंद्रसमासोसौयावत्कर्मफलंचरेत्१६तथैवकर्मशेषेण
यथेतंपुनराव्रजेत्॥

मि भरतर्षभेति कालप्राधान्येनोपक्रम्याहरादयोऽर्च्यादयश्च स्मृतौ निर्दिष्टास्तथापि तत्राप्यभिमानिन्यो देवता नामतो वि
वक्षितास्तात्पर्यतो भवंतीति भाष्यकार:॥१५॥१६॥ तथैवेति। कर्मण: शेषा नाम भोगानुवर्तमाना तत्र शेषसंज्ञा इति केचित्। भाष्यका
रास्तु भिन्नमेवादृष्टफलं कर्म शेषशब्दार्थ इत्याहु:॥ यथेतमिति। यथागतमित्यर्थ:॥

उपलक्षणंचैतद्विपर्ययेणेतिबोध्यं।आकाशयोरखरोदपिसंकीर्णेनायथागतत्वं।शब्दाद्यसंकीर्णेनाद्याधुपसं
ख्यानाअतद्विपर्ययेपिबोध्यः।तथाचसूत्रं।कृतात्ययेनुशयवान्दृष्टस्मृतिभ्यांयथेतमनेवंचेति।३।वक्ष्यमासाद्येति
।एवंलोकक्रमकालव्यवसंघीभावंप्राप्येत्यर्थः।आकाशंआकाशाद्वायुंवायुंतं।एवमग्रेपिभावप्रधानताबोध्या।

वपुर्विहायजीवत्वमासाद्याकाशमेतिसः॥१७॥आकाशाद्वायुमागत्यवायोरश्मीन्व्रजेत्पथ॥
अभ्रोमेघंसमासाद्यततोवृष्टिर्भवेदसौ॥१८॥ततोधान्यानिशस्यानिजायतेकर्मचोदितः॥१९

तथान्ववाक्यन्नाप।ततोवृष्टिर्भवेदसाविति।अत्रचाकाशादिसाम्यंभवतीत्यभिप्रेतं।ननुतद्भेदः।इदंचोत्तरमीमांसा
यांसाभाव्यापत्तिरुपपत्तेरित्यधिकरणेनिर्णीतं।अन्नवायोरन्तरा।धूमाद्युपसंहर्तव्यः।विमदाद्यधिकरणन्या
यात्।तथाचश्रुतिः।अथैतमेवाध्वानंपुनर्निवर्तन्तेयथेतमाकाशमाकाशाद्वायुंवायुर्भूत्वाधूमोभवतीत्यादि१८।जायत
इत्यकृतिप्राधान्येननिर्देशः।संघीभवन्तिब्राह्मणाइतिवत्।१९।

दुर्लभंचश्रमादिभोगरूपतानांपुनरावृत्तिर्नियताकिंतुकश्चिदेवेत्याह।योनिमिति।मुक्तिमिति।तदुपपर्ययपा
तिन्यायेनचंद्रलोकादेश्चरवणादिसंभवादितिभावः२०।ततःपरंअन्नत्वंसमासाद्येति।सन्नपितत्स्थान्यांउज

योनिमन्येप्रपद्यंतेशरीरत्वायदेहिनः॥मुक्तिमन्येतुसंयांतियथाकर्मयथासुखं॥२०॥त
तोन्नत्वंसमासाद्यपितृभ्योप्रभुज्यतेपरं॥ततःशुक्रंरजश्चैवभूत्वागर्भेभिजायते॥२१॥ततः
कर्मानुसारेणभवेत्स्त्रीपुंनपुंसकं॥एषंजीवगतिःप्रोक्तामुक्तिंतस्यवदामिते॥२२॥यस्तुज्ञा
त्यादिपुरुषःसन्सदाविचारतोभवेत्॥सयातिदेवयानेनब्रह्मलोकायधीनरः॥२३॥अ
र्चिर्भूत्वादिनंप्राप्यशुक्लपक्षमथोव्रजेत्॥उत्तरायणमासाद्यसंवत्सरमथोव्रजेत्॥२४

२१।मुक्तिमिति।क्रममुक्तिमित्यर्थः।२२।२३।देवयानंपंथानमेवाह।अर्चिरिति।तथाचश्रुतिः।तेर्चिषमभिसंभ
वंत्यर्चिषोहरह्नआपूर्यमाणपक्षमापूर्यमाणपक्षाद्यान्षडुदङ्ङेतिमासांस्तान्मासेभ्यःसंवत्सरंसंवत्सरादि

संआदित्यात्चंद्रमसंचंद्रमसोविद्युतंतत्पुरुषोऽमानवःसएतान्ब्रह्मगमयत्येषदेवपथोब्रह्मपथएतेनप्रतिपा
द्यमानाइमंमानवमावर्तंनावर्तंतइति।अथेति।दिव्यःपुमान्श्रुत्युक्तोऽमानवःपुरुषःइहविद्युल्लोकइतिसंबंधः
अत्रचसंवत्सरादित्ययोर्मध्येदेवलोकवायुलोकौश्रुत्यंतरोक्तावुपसंहर्तव्यौ।विद्युदनंतरं।चकौषितकिश्रु
पठितावरुणेंद्रप्रजापतयउपसंहर्तव्याः।उत्तरमीमांसायांवायुमब्दादविशेषविशेषाभ्यां।तडितोधिवरुणः

आदित्यचंद्रलोकौतुविद्युल्लोकमतःपरं॥अथदिव्यःपुमान्कश्चिद्ब्रह्मलोकादिहेतिसः२५

११७

संबंधादित्यधिकरणाभ्यांआगंतूनामेतेनैवद्वाराइतिपूर्वमीमांसान्यायेनचसिद्धांतयितव्यं।आतिवाहिका ११७
स्तल्लिंगादितिन्यायेनवाहिकपुरुषपरतानिर्णेया।एवंचार्चिरादिमार्गेणब्रह्मलोकंप्राप्तस्योपासकस्य
तदुपर्यपिबादरायणइतिन्यायेनतत्रैवज्ञानोदयेब्रह्मणासहमुक्तिःनतुपुनरावृत्तिः।एतेनप्रतिपद्यमा
नाइमंमानवमावर्तंनावर्ततइतिश्रुतेःप्रतिफलितोर्थः।२६॥ ॥२५॥ ॥शिवायनमः॥

पापभोगायचेद्गच्छेद्यमस्तैरधिष्ठितस्तस्माद्दिव्योक्तरीत्यानरकेगस्यप्रश्नाङ्गविनीमवस्थामाह।भुक्त्वेति२६।२७।२८।भग
वन्निति।ज्ञानकर्मणोरुपासनायाःद्वयोरिति

दिव्यवपुषिसंधायजीवमेनंनयत्यसौ॥ब्रह्मलोकेदिव्यदेहंभुक्त्वाभोगान्यथेप्सितान्२६
तत्रैपिवाचिरंकालंब्रह्मणासहमुच्यते॥विद्याकर्मविहीनोयस्तृतीयंस्थानमेतिसः२७
भुक्त्वात्रनरकान्घोरान्महारौरवरौरवान्॥पश्चात्पापकर्मशेषेणक्षुद्रजंतुर्भवेदसौ॥२८॥
यूकामत्कुणदंशादिजन्मासौलभतेभुवि॥एवंजीवगतिःप्रोक्ताकिमन्यच्छ्रोतुमिच्छसि२९
रामउ०भगवन्यत्त्वयाप्रोक्तंफलंतुज्ञानकर्मणोः॥ब्रह्मलोकेचंद्रलोकेभुंक्तेभोगानितिप्र
भो।गंधर्वादिषुलोकेषुकथंभोगःसमीरितः॥देवत्वंप्राप्नुयात्कश्चित्कश्चिदिंद्रत्वमेतिच३१
एतत्कर्मफलंवास्तुविद्याफलमथापिवा॥तद्ब्रूहिगिरिजाकांततत्रमेसंशयोमहान्३२
कर्मणश्चफलंयथाक्रमंब्रह्मलोकेचंद्रलोकेचभोगान्भुंक्तइत्येवंरूपंद्वयोरुक्तं।गंधर्वस्त्वैंद्रादिलोकप्राप्तिरूपमित्यंफलंवदेतिप्रश्नार्थः
३०।३१।३२॥

नहूयेति। अत्रापि विद्यातारतम्य उपासनापरः। तथा चानुकूलवर्गलोकादिकं विद्याकर्मणोरेव फलं भवेदिति संबंधः। ननु विद्यानामुपासनापरपर्यायाणां कालादितारतम्येनोत्कर्षापकर्षसंभवात्कर्मणामपि तथात्वात् एवं विद्याकर्मणोः फलांतराण्यनंतानि स्युरेव तत्साकांक्षायामाह। अनुसारत इति। फलस्य कर्मानुष्ठानेनैव जैमिनिसूत्रोक्तन्यायस्त्विहानुसंधेयः। महाभ्रादिः कर्मणामल्पमहत्ताफलानां च स्वर्गे गोचरे भिन्नगः स्था

श्रीभगवानुवाच। तद्विद्याकर्मणोरेवानुसारेण फलं भवेत्॥३०॥ युवा च सुंदरः शूरो नीरोगो बलवान्भवेत्॥ ससमुद्रां वसुमतीं भुंक्ते निष्कंटकं यदि॥ स प्रोक्तो मानुषानंदस्तस्माच्छतगुणो मतः॥३१॥ मनुष्यस्तपसा यस्तु गंधर्वो जायते स तु॥ तस्माच्छतगुणो देवगंधर्वाणां न संशयः॥३२॥ एवं शतगुणानंद उत्तरोत्तरतो भवेत्॥

नसामान्यादिविभागादिपर्वोक्तरिति। तत्र विद्याकर्मणोरल्पमहत्त्वेन तत्स्वरूपपर्यालोचनया निर्णेतुं शक्या फलानामुत्कर्षापकर्षौ निरूपयितुं प्रतिसिद्धं मानुषानंदतारतम्यमाह। युवा चेत्यादिना। यौवनादिसंपन्नस्य सतः सार्वभौमस्य य आनंदः स मानुषानंदो बोध्यः। यस्तु मनुष्यस्तपसा गंधर्वो जायते तस्य स आनंदः प्रागुक्तान्मानुषानंदाच्छतगुणो मत इत्यन्वयः। देवगंधर्वाणां तु हाहाहूहूप्रभृतीनां तेनानंदः तस्मा

दपि शतगुणः।३२। एवमिति। वक्ष्यमाणानां पित्रादीनामथानंदः क्रमेणोत्तरोत्तरं शतगुणो बाहुल्यमित्यर्थः। षष्ठ्यर्थे तसिप्रत्ययः। चिरलोकानां पितॄणां अर्यमाप्रभृतीनां साधारणपितॄणामित्यर्थः।३३। पुरस्तात् पूर्वस्मादित्यर्थः। दिक्शब्देभ्यः सप्तमीसाधुधिकोरस्तातिरिति सूत्रेण पंचम्यां तदस्तातिप्रत्यये पुरादेशः।३४। ज्ञानाधिक्यादिति। सुरालये स्वर्गे यत्सुखाधिक्यं तत्

पितॄणां चिरलोकानामाजानसुरसंपदां॥ देवतानामथेंद्रस्य गुरोस्तद्वत्प्रजापतेः॥३३॥ ब्रह्मणश्चैवमानंदः पुरस्तादुत्तरोत्तरं॥ ज्ञानाधिक्यात्सुखाधिक्यं नान्यदस्ति सुरालये॥३४॥ श्रोत्रियोऽवृजिनोऽकामहतो यस्तु द्विजो भवेत्॥ तस्याप्येवं समाख्याता आनंदाश्चोत्तरोत्तरं॥३५॥

ज्ञानाधिक्यात् उपासनातारतम्यप्रयुक्तमित्यर्थः। कर्मतारतम्यप्रयुक्तमित्यपि बोद्धव्यं। अतो सार्वभौमादीनामानंदविशेषमुपन्यस्य तत्र श्रोत्रियस्याकामहतस्य साम्यात् तस्यापि यत्संगत इति श्रोत्रिय इति। छंदोधीत इति श्रोत्रियः वेदपारग इत्यर्थः। श्रोत्रियंश्छंदोधीते इति निपातनात् साधु। अवृजिनो निष्पापः। कामहतः उपतप्तः न स अकामहतः। एवं भूताय द्विजस्य हि वा का। सर्वभौमादिहिरण्यगर्भांता कौमे सर्वेषानंदाः हर्षानंदरूपे ब्रह्मणि प्राप्त्या भवंति तेषां तदंतर्भावादिति भावः।३५

ब्राह्मणःअल्लेवतीति।मुत्पा(या)ज्ञातत्वज्ञानी।कर्मभिर्ज्योतिष्टोमादिभिर्नवर्द्धते।तथाब्रह्महत्यादिभिःपापैर्न१हीयते।ऽपिप्रायश्चु
शादनुष्ठितैर्नहीयते।आवरणंवंतमस्यवविधिनिषेधप्रवृत्तेरितिभावः।३६।नलभ्यइति।यदिज्ञानवान्तर्हिपातकेन

आत्मज्ञानात्परंनास्तितस्माद्दशरथात्मज।।ब्राह्मणःकर्मभिर्नैववर्द्धतेनैवहीयते।।३६।।
नलभ्यःपातकेनेचकर्मणाज्ञानवान्यदि।।तस्मात्सर्वाधिकोविप्रोज्ञानवानेवजायते३७
ज्ञात्वायःकुरुतेकर्मतस्याक्षयफलंलभेत्।।३८यत्फलंलभतेमर्त्यःकोटिब्राह्मणभोजनैः।।
११८ तत्फलंसमवाप्नोतिज्ञानिनंयस्तुभोजयेत्।।३९ज्ञानवंतंद्विजंयस्तुद्विष्यतेचनराधमः।।
सशुष्यमाणोम्रियतेयस्मादीश्वरएवसः।।४०।।

लभ्यः।पुण्यपुंजशालिभिरेवासौलभ्यतइत्यर्थः।३७।ज्ञात्वेति।यःपुनःतमेवंवेदानुवचनेनब्राह्मणाविविदिषंता
इतिवाक्योक्तैःकर्मभिस्तत्तज्ज्ञानोपायतांनिश्चित्यसज्ज्ञानकामनयाकर्मकुरुतेतस्यकर्मअक्षयफलंभवेत्परंपरयामो
क्षपर्यवसायित्वादित्यर्थः।३८।३९।द्विष्यतेइति।यस्मात्ज्ञानीईश्वरएवस्मात्।४०।शिवायनमः।। ।।

तदेवमुत्पन्नतत्वज्ञानःकृतकृत्यएवेतिस्थितं।कर्मानुष्ठाताऽपिद्विविधः।भोगकामःविरक्तश्च।तत्राद्यस्यपुनरावृत्तिरुक्ता।द्वितीयस्यापिज्ञानकामनयाकर्मानुष्ठानेपरंपरयामोक्षसंभवात्तेनरूपेणतुष्टत्रिकामतयाकर्माण्यनुतिष्ठतस्त
च्चितं।उपासकस्तुततोप्यर्हततरइत्याह।उपासकइति।उपासकः।अर्चिरादिमार्गेणोर्ध्वंगतिमेवगच्छतिअधोगति

उपासकोनयात्येवयस्मात्पुनरधोगतिं।।उपासनरतोभक्त्यातस्मादास्वसुखीनृप४१।।इति
श्रीपद्मपुराणेशिवगीतासूपनिषत्सुब्रह्मविद्यायांयोगशास्त्रेएकादशोऽध्यायः।।११।। ।।

नतुपुनर्नगच्छतियस्मात्तस्मादुपासनायांरतोभक्त्यावाआस्ववाक्बंधनश्रवणादीनितानिपुनःप्रत्यक्षानस्पृशति।।४१
इतिश्रीमद्दिरुद्धदत्तसंभूतप्रतिष्ठापनेककुंधुरंधरकेवलादिवेंकटाद्रिनायकविरचितायांशिवगीताव्याख्या
यामेकादशोऽध्यायः।११।।

तस्य उपासनस्य देशश्च कालश्च अनयोः समाहारः देशकालं तदपि ब्रूहि ।१। मदंशेनेति मदंशेन अहंकारेण परिछिन्नाः पृथक्कृताः वस्तुतस्तु मत्स्वरूपका एव । ममैव सर्वाधिष्ठानत्वात् । यद्वा सर्वे दिवौकसां परिछिन्ना देहा मदंशेन ममैवांशभूतेन अंतर्बिंबचैतन्येनोपलक्षिताः ।२। ततः [illegible] तत्राह । ये त्विति ये भक्ता अन्यदेवता यजंते तेपि मामेव यजंतीति किं

श्रीराम उवाच ॥ भगवन्देवदेवेश नमस्तेस्तु महेश्वर । उपासनविधिं ब्रूहि देशकालं च तस्य तु ॥१॥ ईश्वर उवाच ॥ शृणु राम प्रवक्ष्यामि देशकालमुपासनं । मदंशेन परिछिन्ना देहाः सर्वदिवौकसां ॥२॥ येप्यन्यदेवताभक्ता यजंते श्रद्धयान्विताः । तेपि मामेव राजेंद्र यजंते विधिपूर्वकं ॥३॥ तस्मात्सर्वमिदं विश्वं मत्तो न व्यतिरिच्यते । सर्वक्रियाणां भोक्ताहं सर्वस्याहं फलप्रदः ॥४॥ येनाकारेण ये मर्त्या मामेवैकमुपासते । तेनाकारेण तेभ्योहं प्रसन्नो वांछितं ददे ॥५॥

उ अविधिपूर्वकं । अत एव फलाल्पतेति भावः । यद्वेमवाभिप्रेत्योक्तं प्रथमे ध्याये यस्त्वनादृत्य देवं यः सेवतान्यदेवतां । स हि भागीरथीं त्यक्त्वा कांक्षते मृगतृष्णिकामिति ।३।४। एकं मामेव येनाकारेण चतुर्भुजत्वकंबुचक्रादिविशिष्टेन वा त्रिलोचनत्वत्रिशूलादिविशिष्टेन वा ये उपासते तेभ्यस्तेनैवाकारेण प्रसन्नः सन् तेषां वांछितमहं ददे प्रयच्छामीत्यर्थः ५

६।७। तदेवं यथाकथंचिदप्युपासनं कर्तव्यमित्युक्तं । अभेदेन निदिध्यासनं तु गुणवत्तरमित्याह स्वजीवत्वेनेति । त्वंपदार्थतत्पदार्थभेदेन तत्पदार्थयोध्यायंति सः । अभेदेन साक्षात्करोत्यपि । तान् तत्त्वविदो [illegible] स्पृशंति । स

विधिना चाविधिना वापि भक्त्या ये मामुपासते । तेभ्यः फलं प्रयच्छामि प्रसन्नोहं न संशयः ॥६॥ अपि चेत्सुदुराचारो भजते मामनन्यभाक् । साधुरेव स मंतव्यः सम्यग्व्यवसितो हि सः ॥७॥ स्वजीवत्वेन यो वेत्ति मामेवैकमनन्यधीः । तं न स्पृशंति पापानि ब्रह्महत्यादिकान्यपि ॥८॥ उपासाविधयस्तत्र चत्वारः परिकीर्तिताः ॥ संपदारोपसंवर्गाध्यासा इति मनीषिभिः ॥९॥

साकारोपास्तेः प्रागप्युपासनामाह । ब्रह्महत्यादिपापानि न स्पृशंतीत्यर्थः ।८। तत्र तस्मिन्निर्गुणे साकारे तदर्थं निमित्तयावत् कर्मणि [illegible] सादीनि निमित्तानि मयोगपीति । उपासाविधयः । सगुणोपासनाविधयः कीर्तिताः । चत्वारः संपदाद्युपासनाश्चत्वार इति फलितार्थः ॥९॥

अल्पस्यपरिछिन्नस्यमनसः अनंतत्वेनिरूपगुणयोगादनंतत्वेनसादृश्येनअनंताविश्वेदेवाइतिचिंतनंयस्यांसासासंपत् ध्यानादेवि
धिर्विषयइत्यर्थः तथाचप्रतीकोपासनाद्विविधासंपदध्यासश्चेतितत्र आरोप्यप्रधानासंपत्। यत्राधिष्ठानंविशेषरूपेणोद्दिश्य
अविद्यमानमानसमंकल्प्या आरोपिध्यानमितियावत् अधिष्ठानप्रधानोध्यासः। अधिष्ठानंविशेषरूपेणोद्दिश्य आरोपित

अन्यस्यचाधिकत्वेनगुणयोगाद्विचिंतनं॥ अनंतंवैमनइतिसंपद्विधिरुदीरितः॥१०॥ वि
धावारोप्ययोपासासारोपः परिकीर्तितः॥ यद्वोंकारमुद्गीथमुपासीतेत्युदाहृतः॥११॥
१२१ आरोपोबुद्धिपूर्वेणयउपासविधिश्चसः॥ योषित्यग्निमतियत्तदध्यासः सउदाहृतः॥१२

स्यापिध्यानमितियावत्। विधाविति। विधीयतेप्रधानविधिनेतिविधिः। अंगमितियावत्॰ तस्मिन्नन्यदारोप्ययाउपासनासा १२१
आरोपः। अंगावबद्धध्यासइतियावत्॰ उद्गीथःसाम्नःप्रथमभक्तिः॥११॥ आरोपइति। बुद्धिपूर्वेणबुद्धिपूर्वत्वेनयआरोपः। सोसा
उपासाविधिस्तुअध्यासइतिसमुदाहृतः। तमुदाहरति। यत्यद्वत्यथायोषित्यग्निमतिः। योषावावगौतमाग्निरित्या
श्रुत्यर्थः। यद्यपिप्रागुक्तांगावबद्धोपासनाध्यासएवांतर्भवितुमर्हतियत्रवहारोप्यत्वमेवतथापीहपृथक्कथनंनविरु
ध्यतेपरिभाषायांअपर्यनुयोज्यतादित्यादिक॥१२॥

क्रियायोगेनेति। संवर्गेभूतानिस्वायत्तीकरोतीतिस्वायत्तावशीकरणरूपक्रियायोगेनोपासनंवर्गोपासनेत्यर्थः। अवसीद
ति। अवसादयति। स्वस्मिन्लीनानिकरोतीत्यर्थः। उपसंगम्येति। बुध्याश्रवणमननाभ्यांविचारसंभवनयाचित्तेवस्तरस्वतात्म
नोपसंगम्यब्रह्मैवाहमितिविषयीकृत्ययत्आसनंदैवंध्यानमितियावत्। तत्अंतः अंतरंगंभूतमुपासनंबोद्धव्यं। संप

क्रियायोगेनचोपासाविधिः संवर्गउच्यते॥ संवर्गोवायुः प्रलयेभूतान्येकोवसीदति१३
उपसंगम्यबुध्यायदासनंदेवतात्मना॥ तदुपासनमंतः स्यात्तद्बहिः संपदादयः॥१४॥
ज्ञानांतरानंतरितसंजातज्ञानसंततेः॥ संपन्नदेवतात्मत्वमुपासनमुदीरितं॥१५॥

दादयस्तुप्रागुक्ताःकर्तोर्बहिः। बहिरंगभूताः॥१४॥ ज्ञानेति। ज्ञानांतरेणविजातीयप्रत्ययेनानंतरितानिअव्यवहितानिया
निसजातीयज्ञानानितेषांसंततेर्निदिध्यासनस्येतियावत्। उपसननतं संपन्नः स्वाभेदेनसाक्षात्कृतोदेवतायेनतथा
त्वंउपाति साक्षात्कारावधिकंनिदिध्यासनंदृष्टार्थवानं कुलपर्यवसाय्यवहितफलमित्यर्थः। आरोग्निरसप्रकृदुपदर्शादि
सधिकरणेस्पष्टमेतत्॥१५॥

संपदादिष्विति। तत्र बुद्धिदार्ढ्यमेवावधिरित्यर्थः। तदेवं सगुणनिर्गुणोभयविषयिणी रूपासना प्रागुक्ता। उपासनमिति।
इति प्रागुक्तरीत्या।१६। स्वचित्तस्य यत्रैवैकाग्रता तत्रासीतेति। यत्रैकाग्रता तत्राविशेषात् आसीनः संभवादित्यधि
करणद्वयार्थोऽनेनोपनिबद्धः।१७।१८। अत्याश्रमस्थ इति। विध्युक्तभस्मधारणमत्याश्रमः तेन सहितः सन् तिष्ठतीत्यत्या

संपदादिषु बाह्येषु दृढबुद्धिरुपासने॥ उपासनमिति प्रोक्तं तदंगानि बुधे मे शृणु॥१६॥ ती
र्थक्षेत्रादिगमनश्राद्धं तत्र परित्यजेत्॥ स्वचित्तैकाग्रता यत्र तत्रासीत सुखं द्विजः॥१७ १२२
कंबले मृदुतल्पे वा व्याघ्रचर्मणि वा स्थितः॥ विविक्तदेशे नियतः समग्रीवशिरस्तनुः॥१८
१२२ अत्याश्रमस्थः सकलानींद्रियाणि निरुध्य च॥ भक्त्या च स्वगुरुं नत्वा योगं विद्वान्प्रयोजयेत्॥१९

श्रमस्थः। तथा च स्कांदे ब्रह्मगीतायां। अत्याश्रमिभ्यः परमं पवित्रमिति श्रुतिव्याख्यावसरे उक्तं। अग्निरित्यादिभि
र्मंत्रैर्भस्मनोद्धूलनं तथा त्रिपुंड्रधारणं चाप्यवदं सत्याश्रमं बुधा इति। विद्वान्। पातंजलशास्त्रोक्तयोगाभ्यासप्रका
राभिज्ञः सन् योगं। चित्तवृत्तिनिरोधं। तथा च पातंजलसूत्रं। योगश्चित्तवृत्तिनिरोध इति।१९।

अविज्ञानवान्। योगाभ्यासानभिज्ञः विवेकशून्यो वा। अत एवायुक्तेन तत्त्वग्रहासमर्थेन मनसोपलक्षितः।२०। विज्ञानी तत्त्वपुरु
षस्य युक्तेन वक्ष्यमाणं भवति। यद्भवति तदेवाह। मनसा सहेंद्रियाणि वश्यानीति।२१। यस्त्विति। सदाशुचिर्बाह्याभ्यंतरशौच

यस्त्वविज्ञानवान् भवत्ययुक्तेन मनसा सदा॥ तस्येंद्रियाण्यवश्यानि दुष्टाश्वा इव सारथेः॥२०
विज्ञानी यस्तु भवति युक्तेन मनसा सह॥ तस्येंद्रियाणि वश्यानि सदश्वा इव सारथेः॥२१
यस्त्वविज्ञानवान् भवत्यमनस्कः सदाशुचिः॥ न च तत्पदमाप्नोति संसारमपि गच्छति॥२२
विज्ञानी यस्तु भवति समनस्कः सदा शुचिः॥ स तत्पदमवाप्नोति यस्माद्भूयो न जायते॥२३
विज्ञानसारथिर्यस्तु मनःप्रग्रह एव च॥ सोऽध्वनः परमाप्नोति ममैव परमं पदं॥२४॥ हृत्पुं
डरीकं विरजं विशुद्धं विशदं तथा॥ विशोकं च विचिंत्यात्र ध्यायेन्मां परमेश्वरं॥२५॥

वान् सन्नपि विज्ञानरहितो न तत्पदं प्राप्नोति।२२।२३। अध्वनः संसारस्य पारभूतं ममैव पदं स्वरूपं प्राप्नोति। हृत्पुंडरी
कमिति। विरजं रजोगुणरहितं। अत एव विशुद्धं सत्त्वात्मकं विचिंत्य अत्रास्मिन्हृत्पुंडरीके विशदं विशोकं च परमेश्वरं मा ध्यायेत्।२५

२५। एवंभूतस्यात्मनः साक्षात्कारेऽनुकूलमुपायमाह। एवमिति। आत्मैवारणिः। तं कृत्वा। अयं भावः। यथाऽधरोत्तराभ्यामरणिभ्यां निर्मथनेन दारुमध्ये निलीनमग्निं पश्यति। एवं प्रणवेनात्मज्ञानमेव निर्मथनं तदभ्यासान्मां साक्षात्पश्यतीति। २६।

अचिंत्यरूपमव्यक्तमनंतममृतं शिवं॥ आदिमध्यांतरहितं प्रशांतं ब्रह्मकारणं॥ २६
एकं विभुं चिदानंदमरूपमजमद्भुतं॥ शुद्धस्फटिकसंकाशमुमादेहार्धधारिणं २७
व्याघ्रचर्मांबरधरं नीलकंठं त्रिलोचनं॥ जटाधरं चंद्रमौलिं नागयज्ञोपवीतिनं २८
व्याघ्रचर्मोत्तरीयं च वरमभयप्रदं॥ पराभ्यामूर्ध्वहस्ताभ्यां बिभ्राणं परशुं मृगं॥ २९॥
कोटिमध्याह्नसूर्याभं चंद्रकोटिसुशीतलं॥ चंद्रसूर्याग्निनयनं स्मेरवक्त्रसरोरुहं॥ ३०
भूतिभूषितसर्वांगं सर्वाभरणभूषितं॥ एवमात्मारणिं कृत्वा प्रणवं चोत्तरारणिं॥ ज्ञान
निर्मथनाभ्यासात्साक्षात्पश्यति मां जनः ३१ वेदवाक्यैरलभ्योहं न शास्त्रैर्नापि चेतसा॥ ध्या
नेन वृणुते यो मां सर्वदाहं वरेणि तं ३२

नाविरत इति। दुश्चरितात्पापाचरणादविरतो नु नरः मां न लभेत। नाप्यशांतः इंद्रियलौल्यादनुपरतः तथा। असमाहितः चित्तैकाग्र्यरहितोपि मां न लभेत। तथाऽशांतो विषयेभ्योऽव्यावृत्तमानसं यस्य सोपि न लभेत। २३। जाग्रत्स्वप्नसुषुप्त्यादिः

नाविरतो दुश्चरितान्नाशांतो नासमाहितः॥ नाशांतमानसो वापि प्रज्ञानेन लभेत मां ३३ जाग्रत्स्व
प्नसुषुप्त्यादिप्रपंचो यः प्रकाशते॥ तद्ब्रह्माहमिति ज्ञात्वा सर्वबंधैः प्रमुच्यते॥ ३४ त्रिषु धामसु य
द्भोग्यं भोक्ता भोगश्च यद्भवेत्॥ तेभ्यो विलक्षणः साक्षी चिन्मात्रोहं सदाशिवः ३५ एको देवः सर्व
भूतेषु गूढः सर्वव्यापी सर्वभूतांतरात्मा॥ सर्वाध्यक्षः सर्वभूताधिवासः साक्षी चेता केवलो नि
र्गुणश्च ३६ एको ह्यात्मा सर्वभूतांतरात्मा एकं बीजं नित्यदा यः करोति॥ तं मां नित्यं येनुपश्यंति
धीरास्तेषां शांतिः शाश्वती नेतरेषां॥ ३७॥

प्रपंचो यस्मिन्निति बहुव्रीहिः। अवस्थात्रयेपि साक्षितया प्रकाशमान इति यावत्। ३४। ३५। सर्वेष्वेकत्वं एक एवाग्निर्बहुधा समिद्ध एकः सूर्यो विश्वमनुप्रभूतः। एकैवैषा सर्वमिदं विभात्येकं वा इदं बीजं बहुधा सर्वमिति श्रुतिं अस्यार्थस्य साक्षिकठवल्लीश्रुतिं चार्थत उदाहरति। ३७।

अग्निर्यथेति भुवनंप्रविष्टः लोहादिद्रव्यंप्रविष्टस्तदुपाधिवशात् कुलवलतुःकोणत्वादिभेदवानिति भावः। यथाचायमेकः
जीवनंभुवनंवनमितिजलपर्यायेषुपाठादेनकस्य प्रतिबिंबितइति सर्पव्याख्यातुमुच्यते। रूपरूपेतं अस्मिन्निगिरूपे उपाधि

अग्निर्यथैकोभुवनंप्रविष्टोरूपंरूपंप्रतिरूपोबभूव॥ एकस्तथासर्वभूतांतरात्मानलिप्य
तेलोकदुःखेनबाह्यः॥३८॥ वेदाहमेतंपुरुषंमहांतमादित्यवर्णंतमसःपरस्तात्॥ सएववि शि
द्वानमृतोत्रभूयोनान्यःपंथाअयनायविद्यते॥३९॥ हिरण्यगर्भंविदधातिपूर्वंयोवेदांश्च
तस्मैप्रहिणोमियोहं॥ तंदेवमीड्यंपुरुषंपुराणंनिश्चित्यमांस्केनुखात्मनुच्यते४० एवंशां १२४
१२४ त्यादियुक्तःसन्वेत्तिमांयस्तुतत्वतः॥ निर्मुक्तदुःखसंतानःसोंतेमय्येवलीयते४१॥ ॥ ॥
इतिश्रीपद्मपुराणेशिवगीतासूपनिषत्सुब्रह्मविद्यायांउपासनाप्रपंचोनामद्वादशोध्यायः१२

तथाचश्रुतिः पंथाग्निप्रतिरूपोबभूव। प्रतिबिंबितइत्यर्थोपसाधुरेव।३८। शेषंव्याख्यातप्राय॥ ॥३९॥ ॥४०॥ ॥४१॥
इतिश्रीशिवगीताव्याख्यायांद्वादशोध्यायः॥१२॥

डाक्टर भाऊ दाजी स्मारक संग्रह
DR. BHAU DAJI
MEMORIAL

सालोक्यमिति। सलोकस्यभावः सालोक्यं। एकलोकवासइतियावत्। सारूप्यंसरूपता। सार्ष्ट्यंसमानैश्वर्यं। ऋष्टिःखड्गः तेन
ऐश्वर्यंलक्ष्यते। तत्समंप्स्वंसमानंयस्यतस्यभावःसार्ष्ट्यं। खड्गंतुनिस्त्रिंशचंद्रहासासिरिष्टयइत्यमरः। कृत्यकरतिप्रकृ
तिभावइतिक्षीरस्वामी। शेषंगंस्यर्थोक्तिरूपमिदं ग्रंथस्तुहिंसार्थोस्यचरितिरूपांतरंबोध्यमितिसएवाह। सहयुक्तेत्व

सूतउ० एवंसकौशलेयस्तातोमतिमतांवरः॥ पप्रच्छगिरिजाकांतंसुभगंमुक्तिलक्षणं॥१॥ श्री
रामउ० भगवन्करुणाविष्टहृदयत्वंप्रसीदमे॥ स्वरूपलक्षणंमुक्तेःप्रब्रूहिपरमेश्वर॥२॥ श्रीभ
गवानु० सालोक्यमपिसारूप्यंसार्ष्ट्यंसायुज्यमेवच॥ कैवल्यंचेतितांविद्धिमुक्तिंराघवपंचधा॥३

वहरतीतिसयुक्समयुजोभावःसायुज्यं। भक्तोवशान्यायेनहिरण्यगर्भादिदेहेभोगइत्यर्थः। हिरण्यगर्भलयद्वाप्राप्तिरेवसा
युज्यशब्दार्थइत्यपेकेचित्। अत्रचतुष्टयपिमुक्तिसादृश्यान्मुक्तिशब्दोगौणः। इदानींमुख्यमर्थमाह। कैवल्यमिति। के
वलस्यभावःकैवल्यं। इतिपंचधागौणमुख्यसंकलनयापंचविधत्वंतत्रैवनिर्वचनबलेनजानीहि। तथोक्तष्टधागलस्त
लंनवक्तव्यमितिभावः।३।

सालोक्यमुक्तिमाह। मामिति। ज्ञानवर्जितः मत्स्वरूपानभिज्ञः। तथापि मामपि या शिवलिंगादौ पूजयतीति यः स सालोक्यं यातीत्यर्थः।४। सार्ष्टिप्रापकमाह श्लोकद्वयेन। इष्टेति सायुज्यप्रापकं तु अहंग्रहोपासनादिकमन्यतो बोध्यं।५। सार्ष्टिप्रापकमाह परममुक्तिप्रापकमाह। यस्त्विति। शांत्यादियुक्त इति साधनचतुष्टययुक्तः श्रवणमनननिदिध्यासनवांश्चेत्यर्थः।८। अत इति।

मां पूजयति निष्कामः सर्वदा ज्ञानवर्जितः॥ मम लोकं समासाद्य भुंक्ते भोगान्यथेप्सितान्॥४॥ ज्ञात्वा मां पूजयेद्यस्तु सर्वकामविवर्जितः॥ मया समानरूपः सन्मम लोके महीयते॥५॥ इष्टापूर्तादि कर्माणि मत्प्रीत्यै कुरुते तु यः॥ यत्करोति यदश्नाति यज्जुहोति ददाति यत्॥६॥ यत्तपस्यति तत्सर्वं यः करोति मदर्पणं॥ मल्लोके स श्रियं भुंक्ते मत्तुल्यप्राभवं नरः॥७॥ यस्तु शांत्यादियुक्तः सन्मामात्मत्वेन पश्यति॥ स जायते परंज्योतिरद्वैतं ब्रह्म केवलं॥८॥ अतः स्वरूपावस्थानमुक्तिरित्यभिधीयते॥

स्वरूपेणावस्थानं मुक्तिरिति तत्र तत्र यदभिधीयते तत्। अतः पूर्वोक्तो द्वैतापगमात्। तथा च स्वरूपस्य संसारदशायामप्यनपायात् तत्र मोक्षलक्षणमतिप्रसक्तमिति न शंक्यं। स्वरूपमात्रेणावस्थानस्यानस्य विवक्षितत्वात्। संसारदशायां तु अविद्योदरप्यवस्थानादिति भावः। ननु मोक्षकालेपि सत्यज्ञानानंदाभ्युपगमात् सत्यत्वादिधर्माने

कथं ही तो केवलत्वमित्याह। सत्यमिति। केवलं यद्ब्रह्म तदेव सत्यज्ञानादिरूपमित्यन्वयः। तथा चानंदादिस्वरूपमेव मोक्षः आनंदत्वानंदादयो धर्मा अपि। अतो नोक्तदोष इति भावः।९। नन्वेवं तत्र कस्यापि धर्मस्याभावात् किं तु ग्रहस्यादित्याशंक्याह। सर्वेति। तथा च ग्राह्यविरहदृष्टापत्तिरिति भावः। नन्वेवं वेदादेपि कथं। तस्यावगमः इत्याशंक्य लक्षणयेत्याह। सजातीयेत्यादिना सार्धश्लोकेन।१०। तद्व्यतिरिक्तानामिति संहितं तत्र अतरस्त्यन्वयः। अतरस्तस्याविवरणं तद्व्यतिरिक्तानां संभवादिति असंभव अभावः।

ससंज्ञानमनंतं सदानंदं ब्रह्म केवलं॥९॥ सर्वधर्मविहीनं च तस्माद्ध्यानगोचरं॥ सजातीयविजातीयपदार्थानामसंभवात्॥१०॥ अतस्तद्व्यतिरिक्तानामद्वैतमिति संज्ञितं॥ मत्वा रूपमिदं राम शुद्धं यदभिधीयते॥११॥

अयमाशयः। अद्वैतमिति। तावद्द्वैतविरहरूपं द्विविशिष्टं वा बोध्यं। विरहश्च अलीकप्रतियोगिकोऽसंभवात्। तथा च तत्प्रतियोगिभूतं तत्र विशिष्टब्रह्मलक्षणपदमात्रो निरस्य इति। ननु किं मतावतात्यत आह। मत्वेति। हे राम यदिदं रूपं विज्ञानात्मकं विशिष्टं तन्मत्वा विचार्य शुद्धं तत्केवलं विविच्य पृथक्कृतं चिद्भागमात्रं अभिधीयते लक्षणया प्रतिपाद्यत इत्यर्थः। द्वैतं यदवच्छेदेन मिथ्या तथा मिथ्याभूते चेदस्य महतात्सर्वयोगाद्विशिष्टघटकीभूतं शुद्धं तत्केवलं निष्कलं लक्षणया शब्दप्रमीयत इति तात्पर्यं।११।

अदृष्टेन। अदृष्टविशेषेणेत्यर्थः।१२। निवर्तते अपक्षीयत इत्यर्थः। विलीयते नश्यतीत्यर्थः।१३।१४। सदेति। यद्यप्यहं
सदा परमानंदादिरूप एव तथापि यदा कालभूतदिगादिभिन्नं सर्वमधिष्ठानसाक्षात्कारेण बाध्येत तदा

मय्येव दृश्यते सर्वं जगत्स्थावरजंगमं॥ व्योम्नि गंधर्वनगरं यथा दृष्टेन दृश्यते १२ अनाद्यवि
द्यया विश्वं सर्वं मय्येव कल्प्यते॥ निवर्तते च मय्येव मय्येवेदं विलीयते १३ न मे स्वरूपज्ञा
नेन यदविद्या प्रणश्यति॥ तदेक एव वर्तेऽहं मनोवाचामगोचरः १४ सदैव परमानंदस्वप्रकाश
१२६ श्चिदात्मना॥ न कालः पंचभूतानि न दिशो विदिशश्च न॥ मदन्यन्नास्ति यत्किंचित्तदा वर्तेऽहमे १२६
कलः १५

एक एव वर्तेऽन्यदा तु जेऽन विशिष्ट इति मोक्षसंसारदशयोर्वैलक्षण्योपपत्तिः।१५। ॥शिवायनमः॥ ॥

नन्वत्र शरीसालक्षण्या उपनिषद्भिर्ब्रह्मैवाध्येतद्दृस्य स्तुनाम। तथापि तस्य परोक्षज्ञानजन्ताभ्युपगमे आपातज्ञानव
तामपि मोक्षः स्यादेव। अपरोक्षज्ञानस्याविद्यानिवर्तकत्वेऽभ्योपगमे तु कस्यापि मोक्षो न स्यात्।
अपरोक्षज्ञाने उपायांतराभावादित्याशंक्य न संदृशे तिष्ठति रूपमस्येत्यादि काठकवल्ली श्रुतिमर्थतः संगृह्णा
ति। न संदृशेति। मम स्वरूपं शुद्धरूपं संदृशादर्शनविषये न तिष्ठति दृश्यार्थ इत्यर्थः। वस्तुतस्तु संदृशो दर्शनि

न संदृशेति मे रूपं न चक्षुषा पश्यति मां तु कश्चित्॥ हृदा मनीषा मनसाभिक्लृप्तं ये मां विदुस्ते
ऽमृता भवंति॥१६

इत्यर्थः। कस्तार्थस्तवैकेऽन्यत्वमस्तीति केशप्रत्ययः। अतएव कत्तुत्तरपदप्रकृतिस्वरेण मध्योदात्तपाठोऽपि संगच्छते। कप्र
त्ययेन अंतोदात्तत्वानस्यादित्यादि। अतएव मां शुद्धरूपं चिदपि चक्षुषा। उपलक्षणमेतत् चक्षुरादिसर्वेन्द्रियैः न पश्य
तीति मनीषा तथाविधया बुद्ध्या बुद्ध्या मननरूपेण सम्यग्दर्शनेन च अभिक्लृप्तम् अभिप्रकाशितमिति मोघवा

चार्यः।।वस्तुतस्तुमनीषया।।श्रवणेनेतियावत्।सुपांसुलुगितिप्रदत्ता।।मनसामननेन।भावेनअसुत्वस्येत्यर्थः।।अभि
मुख्येनकृत्स्नअभेदेननिदिध्यासनमितियावत्।ईदृशंमांयेविदुःसाक्षात्कुर्वंतितेअमृताभवंति।तथाच
श्यवत्प्या।क्षस्यप्रागवत्तत्वेपिअसंभावनाविपरीतभावनाभ्यांप्रतिबंधात्कार्याक्षमता।श्रवणेनप्रमा

श्रीरामउ०कथंभगवतोज्ञानंशुद्धंमर्त्यस्यजायते।।तत्रोपायंहरब्रूहिमयितेनुग्रहोयदि १७
श्रीभगवानु०विरज्यसर्वभूतेभ्यआविरिंचिपदादपि।।घृणांवितत्यसर्वत्रपुत्रमित्रादि
केष्वपि।।१८श्रद्धालुर्मुक्तिमार्गेषुवेदांतज्ञानलिप्सया।।उपायनकरोभूत्वागुरुंब्रह्मविदं
व्रजेत् १९सेवाभिःपरितोष्यैतंचिरकालंसमाहितः।।सर्ववेदांतवाक्यार्थंशृणुयात्सुसमाहितः२०

णसंभावनायाःमननेनचप्रमेयगतायास्तस्याःनिदिध्यासनेनचविपरीतभावनायानिवृत्तौप्रति
बद्धरा[illegible]दपरोक्षादज्ञाननिवृत्तौनकश्चिद्दोषइतिभावः।१६।१७।आविरिंचिपदादिति।ब्रह्मलोकम
भिव्याप्येत्यर्थः।घृणांजुगुप्सांवितत्यप्राप्य।।१८।।१९।२०।

तात्पर्यनिश्चीयतेनेनेतिकरणव्युत्पत्त्याउपक्रमोपसंहाराद्यनुसंधानरूपतर्कः।श्रवणशब्दार्थः।अतएवज्ञानेविधिंनिराकु
र्वतामपिश्रवणविध्यभ्युपगमोनविरुध्यते।२१।लोहमण्यादिदृष्टांताःश्रुतिषुप्रसिद्धाः।२२।२३।यत्सदेति।यन्ध्या
नयोगेनध्यानरूपेणोपायेन।योगःसंनहनोपायध्यानसंगतियुक्तिष्वित्यमरः।आत्मानमीक्षतेततध्यानंनिदि

सर्ववेदांतवाक्यानांमयितात्पर्यनिश्चयं।।श्रवणंनामतत्प्राहुःसर्वेतेब्रह्मवादिनः।।२१।।
लोहमण्यादिदृष्टांतयुक्तिभिर्यद्विचिंतनं।।तदेवमननंप्राहुर्वाक्यार्थस्योपबृंहणं।।२२।।निर्ममो
निरहंकारःसमःसंगविवर्जितः।।सदाशांत्यादियुक्तःसन्नात्मन्यात्मानमीक्षते।।२३।।यत्स
दाध्यानयोगेनतन्निदिध्यासनंस्मृतं।।सर्वकर्मक्षयवशात्साक्षात्कारोपिचात्मनः२४
कस्यचिज्जायतेशीघ्रंचिरकालेनकस्यचित्।।२५।।

ध्यासनंस्मृतमित्यन्वयः।ननुनिदिध्यासनस्यात्मसाक्षात्कारहेतुत्वेसतिनिदिध्यासनामपिकेषांचित्साक्षा
त्कारानुत्पत्तिःकथंसमर्थयितव्येत्याशंक्याह।सर्वकर्मेति।आत्मनःसाक्षात्कारस्तुकस्यचिच्छीघ्रंजायते।
सर्वेषांकर्मणांतत्सहजानांप्रतिबंधकदुरितानांक्षीणत्वात्।कस्यचित्तुचिरकालेनजायप्रतिबंधकबाहुल्यादितिभावः२५

कूटस्थानीति। अनारब्धकार्याणि कर्माणि अदत्तफलान्येव ज्ञानान्नश्यंतीत्यर्थः ॥२६॥ ज्ञानादूर्ध्वमिति। पुण्यं पुण्यजनकं विहितं क
र्मेत्यर्थः ॥ पापं पापजनकं निषिद्धं कर्मेत्यर्थः। तदेवं तत्त्वज्ञानिनः संचितयोः पुण्यपापयोर्नाशः। आगामिनोश्चानुत्पत्तिर्वदताऽश्लो
कद्वयेन। तदधिगम उत्तरपूर्वाघयोरश्लेषविनाशौ तद्व्यपदेशात्। इतरस्याप्येवमसंश्लेषः पाते त्वित्यधिकरणद्वय

कूटस्थानीतिकर्माणिकोटिजन्मार्जितान्यपि॥ ज्ञानेनैवविनश्यंतिनतुकर्मायुतैरपि॥२६॥ ज्ञाना
दूर्ध्वंतुयत्किंचित्पुण्यंवापापमेवच॥ क्रियतेबहुधाप्यस्मिन्नतेनायंविलिप्यते॥२७॥ शरीरारंभकंय
त्तुप्रारब्धंकर्मतन्मतं॥ तद्भोगेनैवनष्टंस्यान्नतुज्ञानेननश्यति॥२८॥ ॥शिवायनमः॥ ॥१२८

१२८

स्यार्थउपनिबद्धः ॥२७॥ अनारब्धकार्यएवतु पूर्वेतदवधेरित्यधिकरणेनोक्तं प्रारब्धकर्मणां भोगादेवक्षयवत्प्रार
ब्धंनक्षयति। शरीरेति। तद्भोगेनैवेति। तथाच श्रुतिः तस्य तावदेव चिरमिति। यत्तुश्रुत्यंतरं। यथा पुष्करपलाश आपो
नश्लिष्यंते एवमेवंविदि पापं कर्म नश्लिष्यत इति तद्देहेषएतनरली संचितप्रारब्धेतरविषयमिति भावः ॥२८॥ ॥

निर्मोहइति। निवृत्तावरणइत्यर्थः। संचरतीति। यावत्प्रारब्धं विक्षेपस्यानुवृत्तेरिति भावः ॥३०॥ अहिनिर्ल्वयनीति। सर्पत्वक्। निर्मो
काऽपरपर्याया अहिनिर्ल्वयनी। सा यथा द्रष्टुर्जनस्य पूर्वं सर्पशरीरेऽवस्थानदशायां भयप्रदा। ततः सर्पत्यागानंतरं तुत
स्य द्रष्टुः किमपि भयं न तद्वदयं जीवन्मुक्तः पूर्वं येषां भयप्रद आसीत्तेषामपि सांप्रतं भयप्रदो नेत्यर्थः। एतेन तद्यथाहिनिर्ल्व

निर्मोहोनिरहंकारोनिर्लेपःसंगवर्जितः॥ सर्वभूतेषुचात्मानंसर्वभूतानिचात्मनि॥ यःपश्यन्संचरत्ये
षजीवन्मुक्तोऽभिधीयते॥३०॥ अहिनिर्ल्वयनीयद्वद्द्रष्टुःपूर्वंभयप्रदा॥ ततोऽस्यनभयंकिंचित्तद्वद्द्रष्टुरयं
जनः॥३१॥

यनीवल्मीकेमृतेत्यादिबृहदारण्यकश्रुतिरपिव्याख्याता। लैंगपुराणेतु। यथास्वकायत्वंसर्पःपुनःस्वात्मभावेन
नपश्यतितथातद्वानपिदेहानात्मतेनाध्यवस्यतीत्येवमर्थतया श्रुतिरियंव्याख्याता। तदुक्तं लिंगगीतायां। अहिनि
र्ल्वयनीमुक्तांयथाहिःस्वात्मनापुनः। नपश्यतितथाविद्वान्देहमंतिंजहातिहि। अयंजनः जीवन्मुक्तोऽहः द्रष्टु
जीवन्मुक्तेरहस्यस्यादर्शनेमेणप्रकृतग्रंथोपितदेकवाक्यतयैववानेयः ॥३१॥

विरज्यसर्वभूतेभ्यइत्यारभ्यएतावत्पर्यंतंक्रमिकानिसाधनान्युपन्यस्तानि।तत्रवैराग्याख्यंसाधनमेवदुर्लभतरं।तस्मि
न्सिद्धेइतरसाधनानिसाधनान्युपपन्नानि।[illegible]प्राधान्यात्तदेवनाह।यदेति।३२।ज्ञानोत्पत्तौसत्यांमोक्षेनविलंब

यदासर्वेप्रमुच्यंतेकामायेस्यहृदिगताः॥अथमर्त्योमृतोभवत्येतावदनुशासनं॥३२॥मोक्षस्य
नहिवासोस्तिनग्रामांतरमेववा॥अज्ञानहृदयग्रंथिनाशोमोक्षइतिस्मृतः३३वृक्षाग्रच्युतपादोयः
१२९ सतदैवपतत्यधः॥तद्वज्ज्ञानवतोमुक्तिर्जायतेनिश्चितापितु॥३४॥ ॥शिवायनमः॥ ॥१२९

इत्याह।मोक्षस्येति।ग्रामांतरवासिपश्चात्लोकांतरभोग्यंचस्वर्गोविलंबेनलभ्यते।मोक्षस्तुनतथातस्यैताज्ञानस्य
नाशमुक्तिस्वरूपत्वात्ग्रंथिरज्ञानात्रिवृत्तिरेवमोक्षः।३३।वृक्षेति।यथावृक्षात्प्रच्युतस्यभूमिपातेनविलंबस्तथाज्ञा
निनोमुक्तावपिनविलंबइतिभावः॥३४॥

तीर्थेवाभवतुचंडालगेहेवा।उभयथाप्यविशेषइतिभावः।तथायदिवानष्टचेतनब्रह्मविषयकवृत्तिशून्यःमरणकालेज्ञानोदयेदेहंपरि
त्यजन्सर्वथापिजीवन्मुक्तःमुच्यतेपारब्धक्षयांतेपरममुक्तिंलभतइत्यर्थः।अयंभावः।तीर्थेमरणस्यज्ञानसा
ध्युपायता।चंडालगेहेमरणस्यचज्ञानप्रतिबंधसाधनमपितावद्भयकतोविशेषानुत्पन्नतत्फलनाशस्तेव

तीर्थेचंडालगेहेवायदिवानष्टचेतनः॥परित्यजन्देहमेवंज्ञानादेवविमुच्यते॥३५॥संवीतोये
नकेनाश्नन्भक्ष्यंवाभक्ष्यमेववा॥शयानोयत्रकुत्रापिसर्वात्मामुच्यतेत्रसः॥३६॥ शिवायनमः॥

संभवति।तथाब्रह्मानुसंधानमपिप्राक्एवतंप्रसवतन्निवर्तितयाप्युज्येत।जीवन्मुक्तस्यतुसर्वेषांब्रह्मसाक्षा
त्कारेणैवनिवर्तनावरणतयाप्रारब्धसमाप्तेप्रागभिव्यक्तचैतन्यमानेनकिंचापिनदृष्टंसंभवात्तत्त्वाकारवृत्तिसत्
सत्त्वेपिनकश्चिद्दोषःस्फुटमेतदन्यत्रनेति।३५।संवीतइति।येनकेनउत्कृष्टेनापकृष्टेनवावस्त्रेणसंवीतःसं
वृतः।व्याप्तसंवरणं।ल्यपसंप्रसारणं।तथाभक्ष्यमभक्ष्यंवा।शयानःयत्रकुत्रापिशय्यायां।नःसजीवन्मुक्तः।

डाक्टर भाऊदाजीइत्याख्यस्य स्मारकम् MEMORIAL

वस्थायां शरीरादिकं विक्षेपं पश्यन्नपि योगी पूर्ववन्न लिप्यते अस्मिन्नर्थे लौकिकं दृष्टांतमाह। क्षीरादिति। य
दाज्यं क्षीरादुद्धृतं तदेव पुनः पयसि क्षिप्तं सत् तेन पयसा सह एकतां पूर्ववदेकरसतां न याति एव। तथा ज्ञानवान् संसा
रेऽहंकारादौ एकतां न याति। तस्य नैव परकीयशरीरादिकमिव पश्यंति न तु स्वात्मतया इत्यर्थः॥३७॥३८॥ ततः श्री

क्षीरादुद्धृतमाज्यं यत्क्षिप्तं पयसि तत्पुनः॥ न तेनैवैकतां याति संसारे ज्ञानवांस्तथा॥३७॥ नित्यं पठ
ति यो ध्यायमिमं राम शृणोति च॥ स मुच्यते देहबंधादनायासेन राघव॥३८॥ ततः संशयचि
त्तस्त्वं नित्यं पठ महीपते॥ अनायासेन तेनैव सर्वथा मोक्षमाप्स्यति॥३९॥ ॥इति श्रीपद्म
१३० पुराणे शिवगीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे शिवराघवसंवादे त्रयोदशोऽध्यायः॥१३॥

हे महीपते संशयेति इति संशयं संदेहानं चित्तं यस्य तथा भूतस्त्वं नित्यं मम ध्यायं पठ तेनैव मोक्षमाप्स्यसि। इह
माधनोपन्यासं सर्वं कं मुक्तेः प्रपंचितत्वादेतं सशिष्यैलेन न साधनसंपादनमपि सुलभमिति लोकाननुग्रहीतुं
मकरोत् पितुं दयस्तु मे रामस्य स्वतह वक्लेतकस्य साधनादिति दिक्॥ इति श्रीशिवगीताव्याख्यायां त्रयोदशोऽध्यायः॥१३

भगवन्निति। यदीशस्य यद्यपि स्वर्थः। तथा च हे भगवन् ते रूपं सच्चिदानंदात्मकं सर्वतः स्थितमात्मानं सर्वव्यापि
तया यद्यपि ईक्षते अनावृतस्वरूपाविर्भूतं तथापि तद्याथात्म्यं प्राप्यते इति यावत्। तथापि अहं भिन्नोऽस्मि अविद्याप्र
युक्तो भेदवान् एव सन् निष्ठा भितीवक्ष्यमाणेनान्वयः॥१॥२॥ ननु तर्हि परब्रह्मैव समर्थं तद्ब्रह्मज्ञानं केन संपाद

श्रीराम उ०॥ भगवन्यादितेरूपं सच्चिदानंदविग्रहं॥ निष्कलं निष्क्रियं शांतं निरवद्यं निरंजनं॥१॥ स
र्वधर्मविहीनं च मनोवाचामगोचरं॥ सर्वव्यापितयात्मानमीक्षते सर्वतः स्थितं॥२॥ आत्मविद्यात
पोमूलं तद्ब्रह्मोपनिषत्परं॥

यस्मादिति तत्राह। यत्तद्ब्रह्म अद्रेश्यं दृग्विषयः। तथा अग्राह्यं दुर्विज्ञेयं। इति श्रुतेरस्माकं तद्ब्रह्मलब्धं वा कथं भवेत्।
अतो पायं न जानीते हृदयज्ञानं तेन कारणेन॥ न चानितिस्वश्चेतु दुर्विज्ञेय कथं चेत नम वक्तव्यं तत्रोपायं ब्रूहि भवः
अत्र विशिष्टानं॥ आत्मविद्येति। आत्मविद्या च तपश्च तद्द्वयं मूलं ज्ञानोपायभूतं उपनिषदां परं महातात्पर्यविषयी
भूतं। तथा च तपसा ब्रह्म जिज्ञासस्व विदैम्यसर्वरह मेवेवघट्ट साधिष्ठेति निरूपम इति ज्ञानोपायावगमेऽपि दुर्लभ

बोधनेकुपायांतरमाकांक्षतीति भावः ॥३॥४॥५॥ स्थूलेति । तत्त्वदृष्ट्यैवहेयवस्तु निःस्थूलसौरांभिकन्यायेनाचित्तंप्रवर्त्तयेदित्यन्वयः । अयं भावः । यथा सुदूरस्थंजलमपि दृष्ट्या गवेषयंतं प्रति केचिद्दूरोपलभ्यमानमहमरीचिकाजलमेवपरमार्थजलत्वेनोपदिश्य तावद्दूरं नीयानात्ततः परमार्थजलमपरत्वंनिहतमेभिर्देशेनपरइति तथा अन्न

अमूर्त्तंसर्वभूतात्माकारंकारणकारणं ॥३॥ यत्तदद्वयमग्राह्यंतद्ग्राह्यंवाकथंभवेत् ॥ अत्रोयम
जानानस्तेनभिन्नोस्मिन्नुंकरं ॥४॥ श्रीभगवानुवाच । शृणुरामप्रवक्ष्यामितत्रोपायंमहानुज ॥ सगुणो
पासनाभिरूढचित्तैकाग्र्यंविधायच ॥५॥ स्थूलसौरांभिकान्यायात्तत्रचित्तंप्रवर्त्तयेत् ॥ ॥

मयप्राणमयमनोमयमनोमयविज्ञानमयानंदाख्यान् पंचकोशान्क्रमेणोपदिश्यततः सूक्ष्मतरमप्युपदिश्यत्यमिति । एतेनब्रह्मरव्याचंद्रन्यायस्थूलारुंधतीन्यायादयोपिव्याख्याताः । स्थूलासौरांभिकेत्यत्र शब्दसाधुताचिंत्यं । स्वरस्यमेसौराः ।

मरीचयः । तेषु प्रथमंभः सौरांभः । तस्याख्यानंसौरांभिका । तल्लक्षितासदन्वेषदूराख्यानार्थकथितंतापुत्वर्थनिर्देशएवच । ह्रस्वमध्यिकसादित्वतत्रस्थूलदेहरूपेअन्नपरिणामत्वादन्नमयपिंडेआत्मबुद्धिअस्तिमात्मकदाचिनहीयते । तदुक्तंस्मिन्नन्नमयेपिंडे

तस्मिन्नन्नमयेपिंडेस्थूलदेहेतनूस्थितां ॥६॥ जन्मव्याधिजरामृत्युनिलयेवर्त्ततोवर्त्तते ॥ आत्मबुद्धिरहंमानात्कदाचिन्नैवहीयते ॥७॥ आत्मानजायतेनित्योम्रियतेवाकथंचन ॥ संजायतेस्तिविपरिणमतेवर्द्धतेपिवा ॥८॥ क्षीयतेनश्यतीत्येतेषड्भावावपुषस्मृताः ॥ आत्मनोनविकारित्वंघटस्थनभसोयथा ॥९॥

तदपगमाय आत्मा अवपुः शरीराद्भिन्नइतिसम्यग्वैधर्म्यानुसंधानरूपंचिंतयेदितिव्यवहितेनसंबंधः । वैधर्म्यमेवोपपादयति । संजायतइत्यादिना । एतेनाषड्भावविकारः शरीरस्यात्मनः स्वरूपात्संबंधस्तु आत्मनिनाहरहउक्तः ।६।७।८।९।

एवंप्रागुक्तैर्वेधर्म्मबलेनान्नमयस्यानात्मत्वेनिरासे ततोप्यांतरः। प्राणमय आत्मत्वेनोपदेष्टव्य इत्या
न्रायेनतमाह। मूषेत्यादिना। मूषानिक्षिप्तहेमयथा तदाकारं तत्संश्लिष्टं ततोप्यहिते वर्त्तत इति भावः। तथा
प्यात्मत्वं निराकरोति। नायमात्मेति।

एयमात्मावपुस्तस्मादितिसंचिंतयेद्बुधः॥ मूषानिक्षिप्तहेमाभः कोशःप्राणमयेत्रतु॥१०॥
वर्त्ततेतरतोदेहवद्धः प्राणादिवायुभिः॥ कर्मेंद्रियैः समायुक्तश्चलनादिक्रियात्मकः॥११॥

क्षुत्पिपासापराक्रांतोनायमात्माजडोयतः॥ चिद्रूपआत्मायेनैवस्वंदेहमभिपश्यति॥१२॥

अत्रहेतुमाह। जडोयत इति। यतोयंप्राणमयोजडः येनतुप्राणमयास्यं स्वस्तसूक्ष्मदेहं अभिपश्यति स आतु चिद्रूपः॥
अत्र स्वंदेहमित्युक्त्वा प्राणमयस्य लिंगशरीरांतर्भावमभिप्रेति। तथाहि जीवस्य त्रीणि शरीराणि स्थूलं सूक्ष्मं कारणात्मकं।

चेति। तत्र स्थूलशरीरा विशेषित्रि अन्नमयः। तस्य चात्मत्वोपदेशेन स्वशरीरास्यान्यस्य पुत्रमित्रादेरात्मत्वभ्रमोनिराकृतः। लिंगश
रीरं तु सप्तदशात्मकं पंचतन्मात्राकृप्रपंचितं तत् सूक्ष्मशरीरं। तत्र प्राणमनोमयविज्ञानमयानां त्रयाणामंतर्भावः। तत्र संकल्पविकल्पा

आत्मैवाहंपरंब्रह्मनिर्लेपःसुखनीरधीः॥ नतदस्मातिकिंचेनेतरादस्मातिकिंचन॥१३ ततःप्राणमये
कोशेकोशस्त्वेवमनोमयः॥ ससंकल्पविकल्पात्माबुद्धींद्रियसमायुतः॥१४ कामक्रोधस्तथालोभमो
हाद्यस्यमेवच॥ तदश्चेत्परिषड्डुर्गोमतोछादयोपिवा॥१५॥ ॥

त्मकवृत्त्युपहितं मनः। निश्चयात्मकवृत्त्युपहितं विज्ञानं। सुषुप्तौ भासमानं अविद्यावच्छिन्नं तु कारणशरीरं। स एव चानंद
मयः एते चात्रमयादयः। पंच आपि कोशवदात्माच्छादकत्वसाम्यात्पंच कोशा इत्युच्यंते इति दिक्॥१४॥ ॥ ॥ ॥

विज्ञानमयकोशमाह ॥ तत्रेति । तत्र तस्मिन्प्रागुक्ते मनोमयकोशघटके अहंकारे वेदाश्च शास्त्राणि च तेषामर्थे नि
श्चिता निश्चयरूपा बुद्धिः विज्ञानमयकोश इति संबंधः । तथा च मनोमयविज्ञानमययोः संकल्पाद्यनुकूलशक्ति निश्च

मनोमयस्य कोशस्य धर्मा एते स्वतन्त्र तु ॥ या कर्मविषया बुद्धिर्वेदशास्त्रार्थनिश्चिता १६ सा तु ज्ञाने
न्द्रियैः सार्धं विज्ञानमयकोशतः ॥ इह कर्तृत्वाभिमानी स एव तु न संशयः ॥ १७ इहामुत्र गतिस्तस्य स
जीवो व्यवहारिकः ॥ व्योमादिसात्विकांशेभ्यो जायंते धीन्द्रियाणि तु १८ व्योम्नः श्रोत्रं भुवो घ्राणं ज
लाज्जिह्वाथ तेजसः ॥ चक्षुर्वायोस्त्वगुत्पन्ना तेषां भौतिकता ततः ॥ १९ ॥ व्योमादीनां समस्तानां सा
१३३ त्विकांशेभ्य एव तु ॥ जायते बुद्धिमनसा बुद्धिश्चेन्निश्चयात्मिका ॥ २० ॥ वाक्पाणिपादपायूपस्थानि १३३
कर्मेन्द्रियाणि तु ॥ व्योमादीनां रजोंशेभ्यो व्यस्तेभ्यस्तान्यनुक्रमात् ॥ २१ ॥ ॥ शिवायनमः ॥ ॥

याद्यनुकूलशक्तिरूपेणाधे प्रयुक्तो भेद इति भावः ॥ १६ ॥ १७ ॥ १९ ॥ २० ॥ २१ ॥ ॥ शिवायनमः ॥ ४ ॥

सप्तदशकमिति । सप्तदशानां संघः सप्तदशकं संघार्थे कन् ॥ पिंडशाकटाः पुरुषायणः पुरुषं प्राप्य तिष्ठतीति स्मृतिस्तु मनोबुध्योर्धर्मै
क्यादेकत्वेन गणनं मत्वा सप्तदशत्वमिति बोध्यं ॥ २२ ॥ एतदिति । यत इति । सार्वविभक्तिकस्तसिः । यतो यस्मात्कस्माच्चिन्मायांशाग्रस्त
पादात् एतत्पूर्वोक्तं लिंगशरीरं तप्तायःपिंडवत्परस्पराध्यासात्साक्षिचैतन्येन सह संयुक्तं तदा आनंदमयः कोशो भोक्तृत्वप्रा

समस्तेभ्यो रजोंशेभ्यः पंचप्राणादिवायवः ॥ जायंते सप्तदशकमेवं लिंगशरीरकं ॥ २२ ॥ एतल्लिं
गशरीरं तु तप्तायःपिंडवद्यतः ॥ परस्पराध्यासयोगात्साक्षिचैतन्यसंयुतं ॥ २३ ॥ तदानंदमयः को
शो भोक्तृत्वं प्रतिपद्यते ॥ विद्याकर्मफलादीनां भोक्तेहामुत्र स स्मृतः ॥ २४ ॥ यदाध्यासं विहायैवे
स्वस्वरूपेण तिष्ठति ॥ अविद्यामात्रसंयुक्तः साक्ष्यात्मा जायते तदा ॥ २५ ॥ ॥ शिवायनमः ॥ ॥

भोक्तेति ॥ २३ ॥ २४ ॥ आनंदमयकोशमाह । यदेति । यदा सुषुप्तौ एष आत्मा अध्यासं लिंगशरीराध्यासं विहाय तिष्ठति । स्वापे अ
हंकारादेर्विलयश्रवणादिति भावः । तदा साक्ष्येव जायते न तु भोक्तेत्यर्थः । स एवानंदमयः कोश इति भावः ॥ इदं च पूर्वश्लोके
नैव स्फुटीकृतं । तत्किं जाग्रदादौ साक्षी नास्त्येव । तथा सत्यवस्थात्रयसाक्षित्वं प्रागुक्तं न कुप्येतेत्यत आह ॥ २५ ॥

दृष्टेति।अंतःकरणादीनांतया अनुभवस्मृत्यादिसकलतद्वृत्तीनांसएवद्रष्टा।तथाचसुषुप्तौसाक्ष्येवास्तीतिपूर्वश्लोकार्थेनन्नु
साक्षीसुषुप्तावेवेतिनोक्तदोषःस्यादितिभावः॥२५॥यद्यप्यविद्योपहितस्यासाक्षित्वेतस्यैवसुखदुःखादिनासकलपरकी
यंसुखादिकमप्यपरोक्षतयाभासेतेत्यपिप्रसंगः॥तथाप्यंतःकरणोपहितत्वमपि अपेक्षितं अतोनोक्तदोषः॥अतएवा
वश्यकत्वादंतःकरणमेवस्थूलसूक्ष्मानस्यासाधारणस्यास्तूपाधिः॥अभात्ततायांतुविशेषणं।तदितिनृसिंहाश्रमश्री

दृष्टांतःकरणादीनामनुभूतेस्मृतेरपि॥२५॥अतोंतःकरणाध्यासादध्यासित्वेनचात्मनः॥भो
क्तृत्वंसाक्षिताचेतिद्वैधंतस्योपपद्यते॥२६॥

पादाहुः॥तदेवंबिंबप्रतिबिंबसाधारणचैतन्यस्यैव अविद्योपहितस्यांतःकरणोपहितस्यवासाक्षित्वं अंतःकरणता
दात्म्यापन्नस्यप्रतिबिंबचैतन्यस्यप्रमातृत्वमितिस्थितं।इदानींबिंबस्यनकेवलंकिंतुसाक्षितेरप्रतिबिंबस्यत्वहं
कारतादात्म्येतस्याह॥अतइति॥२६॥

आतपश्चेति।तत्प्रकाशेतस्मिन्नेवब्रह्मात्मकेप्रकाशे आतपइव आतपः॥आभासरहितबिंबस्वरूपंछाया।आभासस्वरूपोजीवइत्ययंकल्पित
भेदंप्रकाशते।ब्रह्मणस्तत्स्वरूपेकथमेवेतिभावः॥एतेनऋतंपिबंतौसुकृतस्यलोकेगुहांप्रविष्टौपरमेपरार्द्धेछा
यातपौब्रह्मविदोवदंतिपंचाग्नयोयेचत्रिणाचिकेताःइतिकठवल्लीश्रुतिरर्थतउपनिबद्धाछायातपशब्द

आतपश्चापितच्छायांतत्प्रकाशेविराजते॥एकोभोजयितातत्रभुंक्तेन्यःकर्मणःफलं॥२८॥

योश्चजीवेश्वरौपरस्परंगुहांप्रविष्टावासानोहितदैर्ध्यनादिसृष्टिकरणेनिरूपितं।एकइति।एकःईश्वरःभो
जयिता।अन्योजीवस्तुकर्मणःफलंस्वर्गादिभुंक्तेइत्यर्थः॥एतेनऋतंपिबंतावित्यपिबतोःपिबद्वौ
गौणःछत्रिन्यायवदित्यवगंतव्यंतस्यकर्मणःफलमितिसर्वंजीवस्यभाविद्यास्थूलमितिचवाक्यस्य
व्याख्यातः॥२८॥

आत्मानं रथिनं विद्धीत्यादि तदुक्तं श्रुतौ पर्यंत उपनिबध्नाति क्षेत्रज्ञमित्यादिना। अत्र क्षेत्रज्ञशब्देन श्रुतौ आत्मशब्दो जीवपर उक्तः। तं जीवं रथस्वामिनं विद्धि। शरीरं रथं विद्धि बुद्धिं तु सारथिं विद्धि। बुद्धिरूपेण सारथिना इंद्रियाश्वाः प्रेर्यंते संकल्पविकल्पात्मकं मनस्तु रश्नास्थानापन्नं। रूपादिविषयास्तु गोचराः अश्वसंचरा

BHAU DAJI MEMORIAL

क्षेत्रज्ञं रथिनं विद्धि शरीरं रथमेव तु॥ बुद्धिं तु सारथिं विद्धि प्रग्रहं तु मनः सदा॥२९॥ इंद्रियाणि हयान्विद्धि विषयास्तेषु गोचराः॥ इंद्रियैर्मनसा युक्तं भोक्तारं विद्धि पूरुषं॥३०॥ एयंत्रोक्त्यादि युक्तः सन्नुपास्ते यः सदा द्विजः॥ उद्घाट्योद्घाट्य एकं यथैव कदलीतरोः॥ वल्कलानि ततः पश्चाल्लभते सारमुत्तमं॥३१॥

१३५

प्रदेशाः तदेव रथादिरूपकल्पनया शरीरेंद्रियादिविशिष्टस्यैव भोक्तृत्वं न तु शुद्धस्याधारब्रह्मणः तथावदुपास्ते सः सारभूतमात्मानं विंदति। यथा कदलीतरोर्वल्कलानां मध्ये एकैकं उद्घाटयन्पुरुषः क्रमेणांतर्निष्ठ सारं लभते न तु प्रथमत एव तद्वत्॥३१॥

तथैवेति। पंचकोशेषु सर्वोत्केषु क्रमान्मनः संक्रामयन् तेषां मध्ये सारं तदधिष्ठानभूतमित्यर्थः॥३२॥ तदेवं पंचकोशवतार्य आनंदमयादपि आंतरं ब्रह्मपुच्छं प्रतिष्ठा प्राधान्येन निर्दिष्टं वास्तवं स्वरूपमाह। एवं मनः समाधायेति। अस्थूलमनणु अह्रस्वमदीर्घमिति श्रुतिरस्थूलोक्तिः॥ तद्गोचरे। तत्तात्पर्यविषयीभूतमित्यर्थः। तदेवमानंदमयो न स्वप्रधानतया श्रुतौ निर्दिष्टः। किंतु पुच्छं प्रतिष्ठेति वाक्यार्थभूतसर्वाधारब्रह्मप्रतिपादु

तथैव पंचकोशेषु मनः संक्रामयन्क्रमात्॥ तेषां मध्ये ततः सारमात्मानमपि विंदति॥३२॥ एवं मनः समाधाय संयतो मनसि द्विजः॥ अथ प्रवर्तयेद्बुद्धिं निराकारे परात्मनि॥३३॥ ॥

पाव तथैवेति श्रुतितात्पर्यं स्फुटीकृतं। अत एव स्कांदेपि पंचकोशावतारणप्रसंगेनोक्तं आनंदेन सदा एवः कोशोत्मानमयः स्मृतः। तथानंदमयश्चापि ब्रह्मणोन्येन साक्षिणा। सर्वांतरेण संदृष्टो नान्येन केनचिदिति। न्यायं चैतत्। ब्रह्मविदाप्नोति परमिति।

फलवद्ब्रह्मज्ञानमनंतंब्रह्म।ब्रह्मणाविपश्चितेति।अस्तिब्रह्मेतिचेद्वेदेतिब्रह्मणएवअस्यमानत्वात्।
अतएवोत्तरमीमांसायांआनंदमयोभ्यासादित्यधिकरणेभाष्यकारैरयमेवार्थःसिद्धांतितः।एक
देशिनांव्याख्यानांतरंचदूषितंएतेनभाष्यकाराणांसूत्रकारस्यसविरोधंदूषणंतयोर्द्रावयेतःपरा

ततोमनःप्रगृह्णातिपरमात्मानमेकलं॥यत्तद्द्रूयमग्राह्यमस्थूलाद्युक्तिगोचरं॥३४ रामउ०भ
गवन्श्रवणेनैवप्रवर्तंतेजनाःकथं॥वेदशास्त्रार्थसंपन्नायज्वानःसत्यवादिनः॥३५॥श्रृण्व
तोपितथात्मानंजायतेनैवकेचन॥ज्ञात्वापिमन्यतेमिथ्याकिमेतत्तवमायया॥३६॥ ॥ ॥

स्ताः।बहुतरपुराणवचनानुरोधेनसूत्रस्यापिव्याख्येयत्वात्।अन्यथासूत्रस्यतःस्वोक्तिविरुद्धाभिधा
पितापत्तेरितिदिक्।३३।३४।श्रवणेजनाःनप्रवर्तंतएवकथमित्यन्वयः॥३५॥केचनश्रृण्वंतःसंतोपि
नजानते।कश्चित्तुज्ञात्वापिश्रवणादिनापरोक्षनिश्चयवान्सन्नपिमिथ्या।मिथ्याभूतंसंसारमेवमन्य
तेआद्रियतइत्यर्थः ३६

३७ अभक्ताइति।ममअभक्ताः।तेफलंकामयमानाःसंतःतिष्ठंतीतिशेषः।यतःयस्मात्कर्मफलंअतएववक्ष्यतिदोष

श्रीभगवानु०एवमेवमहाबाहोनात्रकार्याविचारणा॥दैवीह्येषागुणमयीमममायादु
रत्यया॥मामेवयेप्रपद्यंतेमायामेतांतरंतिते॥३७॥अभक्तायेमहाबाहोममश्रद्धाविवर्जि
ताः॥फलंकामयमानास्तेचैहिकामुष्मिकादिकं॥३८॥क्षयिष्णुस्वल्पसातिशयंततःकर्मफ
लंमतं॥तदविज्ञायकर्माणियेकुर्वंतिनराधमाः॥३९॥मातुःपतंतितेगर्भेमृत्यौवक्त्रेपुनः
पुनः॥नानायोनिषुजातस्यदेहिनोयस्यकस्यचित्॥४०॥कोटिजन्मार्जितैःपुण्यैर्म
यिभक्तिःप्रजायते॥४१॥सएवलभतेज्ञानंमद्भक्तःश्रद्धयान्वितः॥नान्यकर्माणिकुर्वाणोज
न्मकोटिशतैरपि॥ततःसर्वंपरित्यज्यमद्भक्तिंसमुदाहर॥४२॥ ॥द्वैपायनमः॥

दुष्टः।तत्क्षयिष्णुत्वादिकंअविज्ञायकुर्वंतिपुत्रकामनयानुतिष्ठंतीत्यर्थः।३९।४०।४१।४२।समुदाहरकुर्वित्यर्थः ४२

त्वाइति।त्वांअहंमोक्षयिष्यामि।अतएवमाशुचः।मात्वंशोकेनविशीर्णोभूः।शुचिरत्रोचेविशारणेक्लेदेचेतिदे

सर्वधर्मान्परित्यज्यमामेकंशरणंव्रज॥अहंत्वांसर्वपापेभ्योमोक्षयिष्यामिमाशुचः॥४३
यत्करोषियदश्नासियज्जुहोषिददासियत्॥यत्तपस्यसिरामत्वंतत्कुरुष्वमदर्पणं॥४४
ततःपरतरानास्तिभक्तिर्मयिरघूत्तम॥ ॥इतिश्रीपद्मपुराणेशिवगीता०पंचकोशोपव
र्णनंनामचतुर्दशोऽध्यायः॥१४॥ ॥रामउ०॥भक्तिस्तेकीदृशीदेवजायतेवाकथंचसा॥१
ययानिर्वाणरूपंत्वंलभतेमोक्षमुत्तमं॥१॥तद्ब्रूहिगिरिजाकांतप्राप्यतेयेननिर्वृतिः॥२॥श्रीभ
गवानु०योवेदाध्यापनंयज्ञंदानानिविविधानिच॥मदर्पणधियाकुर्यात्समेभक्तःमेप्रियः
॥३॥नर्यंभस्मसमादायविशुद्धंश्रोत्रियालयात्॥अग्निरित्यादिभिर्मंत्रैरभिमंत्र्ययथाविधि४

वदिकानमाङिलुङ्॥इतिनोचेतिवैकल्पिकोऽप्रउनदेशः॥४३।४४।रघूत्तमेति।रघुशब्दोपपदेलक्षणयारघुपतेषुवर्त्ततेतिषूत्त
म॥४५॥ ॥इतिपद्मपुराणेशिवगीताव्याख्यायांपंचकोशोपवर्णनंनामचतुर्दशोऽध्यायः॥१४॥१।२।३।४॥ ॥

॥५॥६॥७॥भक्तेरेवांतरनर्चार्चतिमामपि।तस्मात्परतराभक्तिर्ममरामनविद्यते।५।सर्वदाशिरसाकंठेरुद्राक्षान्धारयेत्तुसः।
पंचाक्षरीजपपरःसमेभक्तःसमेप्रियः।६।भस्मच्छन्नोभस्मशायीसर्वदाविजितेंद्रियः।यस्तुरुद्रंजपेन्नित्यंचिंतयन्मा
मनन्यधीः॥७॥

उद्धूलयतिगात्राणितेनचार्चतिमामपि॥तस्मात्परतराभक्तिर्ममरामनविद्यते॥५॥सर्व
दाशिरसाकंठेरुद्राक्षान्धारयेत्तुसः॥पंचाक्षरीजपपरःसमेभक्तःसमेप्रियः॥६॥भस्म
च्छन्नोभस्मशायीसर्वदाविजितेंद्रियः॥यस्तुरुद्रंजपेन्नित्यंचिंतयन्मामनन्यधीः॥७॥
सतेनैवचदेहेनशिवःसंजायतेस्वयं॥जपेद्योरुद्रसूक्तानितथाथर्वशिरःपरं॥८॥॥
कैवल्योपनिषत्सूक्तंश्वेताश्वतरमेवच॥ततःपरतरोभक्तोममलोकेनविद्यते॥९॥ ॥

॥५॥६॥७॥भक्तेरेवांतरभेदान्प्रपंचयितुंपंचदशोऽध्यायआरभ्यते।तत्रततःपरतरोभक्तोममलोकेनविद्यतइत्यंतंस्पष्टम्।रुद्रसूक्तानि
काठकंस्पष्टार्थं।८।कंठवल्लीपुष्टितियवल्ली।अन्यत्रधर्मादन्यत्रास्मात्कृताकृतात्।अन्यत्रभूताच्चभव्याच्चयत्तत्पश्य
सितद्वदेतिनचिकेतसाप्रश्नंप्रतिसर्वेवेदायत्पदमामनंतीत्यादिनाब्रह्मोपदिश्य।ॐइत्येततदक्षरादिनाएतदालंब

ज्ञात्वा ब्रह्मलोके महीयत इत्यंतेन ॐकारोपासनमेव ब्रह्मप्राप्त्यालंबनानां मध्ये श्रेष्ठतममिति प्रतिपादितं तदेव ग्रंथकर्ता
श्रुत्यनुकारिभिः श्लोकैः संगृह्णाति अन्यत्रेत्यादिभिः । न चास्य नचिकेतस ईदृशी सपक्रमानुगुणत्वं शंक्यं । तस्मान्निमंत्र
णामांत्रुप्राणाविन प्रपज्जयेत् । तस्मात्सत्तरोमक्लोममलोके न विधेते इति वक्ष्यमाणं प्रत्युपर्यागिति यावत् । अन्यस्मात् ।
अधर्मादन्यत् । तथा । कृताकृतात्कार्यकारणादन्यत् । भूतात् भव्याच्च कालादन्यत् । कालत्रयापरिच्छिन्नमित्यर्थः ।

अन्यत्र धर्मादन्यस्मादन्यत्रास्मात्कृताकृतात् ॥ अन्यत्र भूताद्भव्याच्च यत्तत्प्रवक्ष्यामि तच्छृणु ॥१०॥
वदंति यत्पदं वेदाः शास्त्राणि विविधानि च ॥ सर्वोपनिषदां सारं दध्नो घृतमिवोद्धृतं ॥११॥ यदिच्छंतो ब्रह्मच
र्यं चरंति मुनयः सदा ॥ तत्ते पदं संग्रहेण ब्रवीम्योमित्यत्परं ॥१२॥ एतदेवाक्षरं ब्रह्म एतदेवाक्षरं प
रं ॥ एतदेवाक्षरं ज्ञात्वा ब्रह्मलोके महीयते ॥१३॥

ईदृशं वस्तु वक्ष्यामि शृणु ॥१० वदंतीति । यत्पदं पदनीयं यद्वस्तु वेदाः वदंति । तत्पदं प्रवीम्यामि वक्ष्यामि । छांदसोयं
प्रयोगः इति स्वयं प्रतिज्ञाय । परं अनंतरं यन्निर्दिष्टं कठवल्ली श्रुतौ ओमित्येतदित्यनेन । एतदेवाक्षरं

ब्रह्म सगुणं ब्रह्मेत्यर्थः ॥ तथा ॥ एतदेव परं निर्गुणं ब्रह्म । एतदेवाक्षरं ज्ञात्वा ब्रह्मत्वेनोपास्य ब्रह्मलोके मही
यते ॥ इति श्रुतिमर्थतउपनिबद्धन् प्रणवस्य मंत्रांतरापेक्षया अत्युत्कर्षं स्फुटीकृतवान् ॥१३॥ ओ
मिति यत् इदमेव परं ब्रह्म इत्यन्वयः ॥ यच्छंदसां वैदिकवाग्रूपाणां धेनूनां गवां ऋषभत्वेन चोदितः

छंदसां यस्तु धेनूनामृषभत्वेन चोदितः ॥ इदमेव पतिः सेतुरमृतस्य च धारणात् ॥१४॥ मेदसा पिहि
तो कोशो ब्रह्मणः यत्परमोमिति ॥ चतस्रस्य मात्राः स्युरकारोकारकौ तथा ॥१६ गार्हपत्ये च गायत्री गंगा
प्रातःसवनं तथा ॥ द्वितीया च भुवो विष्णुरुद्रोनुष्टुब्यजुस्तथा ॥१७॥ ॥ द्विवायनमः ॥ ॥
मकारस्यावसाने अर्धमात्रेति परिकीर्तिता ॥ पूर्वेयमत्र ऋग्वेदो ह्यस्याष्टवसवस्तथा ॥१६॥

श्रुताउपदिष्टः यतः पतिः नियामकः ॥ अमृतस्य मोक्षस्य धारणात् संसारस्य सेतुरिव सेतुः ॥ ईदृशं यद्ब्रह्म मे
दसा पिहिते कोशे उपास्यतया श्रूयते तदोंकाराभेदेन ध्येयमिति फलितोर्थः ॥ तस्य प्रणवस्य चतस्रो मा
त्राः ॥ तत्र अकारस्य उकारस्य मकारस्य च मात्रात्रयं अवसाने तु चतुर्थी । अर्धमात्रेत्यर्थः ॥ यद्यपि नेदमा

करणाणुं नु रोतथाप्यारोपिरूपेणोपसनान्नकोपि विरोधः॥ तत्रप्रथममात्रायांभूः ऋग्वेदश्चेत्याद
यो ध्येतव्याः॥ द्वितीयस्यांतुभुवर्लोको यजुश्चेत्यादयो ध्येयाः॥ तृतीयस्यांतुस्वर्लोकः सामाग्निचन्द्रा
दिदेवता ध्येयाः॥ १८॥ अग्निरिति॥ आहवनीयसंज्ञकोयोग्निः सइत्यर्थः॥ १९॥ चतुर्थीति॥ अवसाने

यमुनादक्षिणाग्निश्चमाध्यंदिनसवः स्मृतः॥ तृतीयाचस्वः सामान्यादित्यश्चमहेश्वरः॥ १८॥
अग्निराहवनीयश्चजगतीचसरस्वती॥ तृतीयेसवनंप्रोक्तमथर्वत्वेनयन्मतं॥ १९॥ चतुर्थी
यावसानेर्द्धमात्रासासोमलोकगा॥ अथर्वांगिरसः संवर्तकोग्निर्मरुतस्तथा॥ २०॥ विराट्सभ्या
वसथ्योचचतुर्भिर्यज्ञपुरुषः॥ प्रथमारक्तवर्णास्याद्द्वितीयाभास्वरामता॥ २१॥ तृतीयाविद्युदा
भासाच्चतुर्थीशुक्लवर्णिनी॥

विद्यमानेचतुर्थीअर्द्धमात्रासोमलोकगाइत्यादिध्येयं॥ तत्रप्रथममात्रारक्तवर्णाद्वितीयातुभास्वरा
॥ तृतीयाविद्युन्निभा॥ चतुर्थीशुक्लवर्णेत्यस्यामितिशुक्लवर्णिनी ध्येयाः॥ ॥ श्रीवायनमः॥

नकर्मधारयान्मत्वर्थीयाइतितुप्रायिकं॥ जातंजायमानंचसर्वंॐकारेप्रतिष्ठितमितिपूर्ववत्तन्मात्रा

सर्वंजातंजायमानंतदोंकारेप्रतिष्ठितं॥ २२॥ विश्वंभूतंचभुवनंविचित्रंबहुधातथा॥ जातंचजा
यमानंयत्सर्वंरुद्रउच्यते॥ २३॥ चेताग्रेः स्मातंवेदैर्वा रेवा प्रेर्वासमाहृतं॥ तस्मादिमंभवो माधु
न सायेनप्रहृजयेत्॥ २४॥ तस्मात्परतरंभक्तोममलोकेनविपते॥ न्यासमूर्दावेदैर्वा तस्मात्
मभिमंचितं॥ योगिसिद्धिगताप्राणिसप्तद्वीपेविमुच्यते॥ २५॥ कुत्रापुष्पैर्बिल्वदलैः पुष्पैर्वागिरि
संभवैः॥ योमामर्चयतेनित्यंप्रणवेनप्रियोहिसः॥ २६॥ पुष्पंफलंसमूलंवापत्रंसलिलमेववा॥ योर
घाणरोवेर्मलंतत्कोटिगुणितंभवेत्॥ २७॥ अहिंसासत्यमस्तेयंशौचमिंद्रियनिग्रहः॥ यस्यास्त्यप्र
यत्नंनित्यंसमेभक्तः समेप्रियः॥ २८॥ प्रदोषेयोममस्थानंगत्वाहंजयतेतुमां॥ ॥ श्रीवायनमः॥
तुध्येयमुक्तंसंप्रतितुमात्राविशेषमनालंब्यसंहत्यॐकारोध्येयंनिर्दिश्यते॥ २३॥ एवंयोंकारस्यप्रस
साहृतंतद्विनियुंक्ते॥ प्रणवेनप्रहृजयेदिति॥ २४॥ २५॥ २६॥ २७॥ २८॥

सपरांश्रियमाप्नोतिपश्चान्मयिविलीयते।।अष्टम्यांचचतुर्दश्यांपर्वणोरुभयोरपि।।३०।।भूतिभू
षितसर्वांगोयःपूजयतिमांनिशि।।कृष्णपक्षेविशेषेणसमेभक्तःसमेप्रियः३१एकादश्यामुपो
ष्यैवयःपूजयतिमांनिशि।।सोमवारेविशेषेणसमेभक्तोननश्यति।।३२पंचामृतैःस्नापयेद्यःपंचगव्ये
नवापुनः।।पुष्पोदकैःकुशजलैस्तस्मान्नान्यःप्रियोमम।।३३पयसासर्पिषाचापिमधुनेक्षुरसेनवा
पक्वाम्रफलजेनापिनारिकेलजलेनवा३४गंधोदकेनवामांयोरुद्रमंत्रमनुस्मरन्।।अभिषिंचेत्ततोनान्यः
कश्चित्प्रियतमोमम।।३५आदित्याभिमुखोभूत्वाऊर्ध्वबाहुर्जलेस्थितः।।मांध्यायन्रविबिं
१४० बस्थमथर्वांगिरसंजपे३६प्रविशेन्मेशरीरेसौगृहंगृहपतिर्यथा।।बृहद्रथंतरंसामदेव्यंदे १४०
वव्रतानिच।।३७।तद्धोगायाज्यदोहाश्चयोगायतिममाग्रतः।।इहश्रियंपरांभुक्त्वाम
मसायुज्यमाप्नुयात्।।ईशावास्यादिमंत्रान्योजपेन्नित्यंममाग्रतः।।मत्सायुज्यमवा
प्नोतिममलोकेमहीयते।।३८।। ।। ७ शिवायनमः।। ७।। ।।

क्तियोगइति।नतैतावतायज्ञदानादीनांविभूतिधारणादीनामहिंसादीनांचभक्तिरूपतोक्ता।।तयाचनानार्थतापत्तिः।भक्त्यामभिज्ञानात्
त्यादावाच्छतिप्रसंगश्चेतिचेन्न।भजसेवायामितिधातोः।निष्पन्नस्यभक्तिशब्दस्य।तदाज्ञाकारित्वरूपसेवापर्यायतयाप्रवृत्तिनिमित्तेऽपि
ननानार्थत्वाभावात्।।भीतिमूमेवाह्वइति।भगवदुक्तयाविधिनिषेधयोस्तदाज्ञात्वाध्यवसायात्।यथाविक्लित्यनुकूलव्यापारत्वेनरूप
णाधिश्रयणादीनधिश्रयणान्तान्बहूनपिदधतोपिपचेर्ननानार्थ्यंतत्सन्यत्रविस्तरः।उक्तंचहरिणा।नलक्षणगतेनात्रार्थ्यंवयाप

भक्तियोगोमयाप्रोक्तएवंरघुकुलोद्वह।।सर्वकामप्रदोमत्तःकिमन्यच्छ्रोतुमिच्छसि।।४०।।
।।इतिश्रीपद्मपुराणेशिवगीतासूपनिषत्सु०भक्तियोगोनामपंचदशोऽध्यायः।।१५।। ।। ।।

ष्याणिचःपचेरिति।तथाचकाष्ठानिपचंतिस्थालीपचतीत्यादौप्रज्वलनधारणाद्यर्थपरत्वाध्यवसायनभक्तिशब्दस्याप्यु
पपदविशेषबलेनतत्तदनुरूपविशेषपरताध्यवसायइतिदिक्।।४०।। ।।इतिश्रीशिवगीताव्याख्यायांपंचदशो
ऽध्यायः।।१५।। ।।श्री।। ।।श्री।। ।।शिवायनमः।।ॐ।।

अज्ञोपहासेति।अज्ञानुपहसंतीत्यज्ञोपहासाः शौचेष्वनुग्रहयोग्येषुउपहासपराः।अज्ञोपहासाश्चअभक्ताश्चेतिद्वंद्वः॥तेअत्रनैवाधिकारिणइतिसंबंधः॥तथाभूतिरु

श्रीरामउ०भगवन्मोक्षमार्गोयस्त्वयासम्यगुदाहृतः॥तत्राधिकारिणंब्रूहितत्रमेसंशयोमहान्
१श्रीभगवानु०ब्रह्मक्षत्रविशः॥शूद्राःस्त्रियश्चात्राधिकारिणः॥ब्रह्मचारीगृहस्थोवानुपनीतो
थवाद्विजः॥२॥वनस्थोवावनस्थोवायतिःपाशुपतव्रती॥बहुनात्रकिमुक्तेनयस्यभक्तिःशि
१४१ वार्चने॥३॥सएवात्राधिकारीस्यान्नान्यचित्तःकथंचन॥जडोंधोबधिरोमूकोनिःशौचःक १४१
र्मवर्जितः॥४॥अज्ञोपहासान्भक्ताश्चभूतिरुद्राक्षधारिणः॥लिंगिनोयश्चवाद्वेष्टितेनैवाधिका
रिणः॥५॥योमांगुरुंपाशुपतंव्रतंद्वेष्टिनराधिप॥विष्णुंवासनमुच्येतजन्मकोटिशतैरपि॥६॥ ॥

द्राक्षधारिणः पुरुषान्योद्वेष्टिसचतेचते अनधिकारिणः॥५॥योमामिति॥मांगुरुंपाशुपतंव्रतंचयोद्वेष्टिविष्णुंवायोद्वे
ष्टिसः॥जन्मनांकोटिशतैरपिनमुच्यतेतिसंबंधः॥६॥

अनेकेति॥सुकृतेषुकाम्यकर्मस्वासक्तइत्यर्थः॥७॥८॥अविमुक्तइति॥अविमुक्तंकाशीक्षेत्रं॥पुंडरीकंव्याघ्रपुरं॥अत्र
यद्यप्यविशेषेणतारकंब्रह्मलभतइत्युक्तंतथापि अविमुक्तेजंतुमात्रस्यतारकोपदेशः॥तत्रापिपापिनांयातनांते॥पापिना
मिहजंतूनांयातनांतेदिशत्यपीतिवचनात्॥निष्पापानांतुप्राणोत्क्रमणकालएवोपदेशः॥द्वारकाश्रीशैलादिषु

अनेककर्मसक्तोपिशिवज्ञानविवर्जितः॥शिवभक्तिविहीनश्चसंसारान्नैवमुच्यते॥७॥
आसक्ताःफलरागेणयेत्ववैदिककर्मणि॥दृष्टमात्रफलास्तेतुनमुक्तावधिकारिणः॥८॥ ॥
अविमुक्तेद्वारकायांश्रीशैलेपुंडरीकके॥देहांतेतारकंब्रह्मलभंतेमदनुग्रहात्॥९॥ ॥

अंतेषुसन्मार्गनिष्ठानामधिकारिणांमरणकालएवोपदेशः॥पापवतांतुजन्मांतरेकाशीप्राप्तिद्वारेतिवचनांतर
बलादिहवचनीयं॥तथाचमात्स्ये॥अविमुक्तसमंक्षेत्रंनभूतंनभविष्यति॥हेयेविहितनिष्ठानांपरमानंदमिच्छतां॥
यागतिर्विहितासद्भिःसाविमुक्तेमृतस्यतुइति॥तथाचतत्रैवकृत्वापापसहस्राणिपश्चात्संतापमेत्यवै॥योविमु
क्तेतिमु

ऽप्येतस्यातिपरमांगतिं।जपध्यानविहीनानांज्ञानवर्जितचेतसां।तथादुःखहतानांचगतिर्वाराणसीनृणामिति।स्कांदेऽपिश्रीशैलादीनितीर्थान्युपक्रम्य।अन्यानिमुक्तिक्षेत्राणिकाशीप्राप्तिकराणिवै।काशींप्राप्यविमुच्येतनान्यथातीर्थकोटिभिः।तथातत्रैवरागादिदोषपरिपूर्णमनोवृत्तिकाः काशीपुरीमकलिदिव्यमहाप्रभावा।एकस्त्वयंपुरीप्रसमासमंतात्तेपापिनोनसहते: परिभाषणीयः।पुण्यवानितरोवापिममक्षेत्रस्यसेवयामुक्तोभवतिदेवेशिनात्रकार्याविचारणा।तथाबहुजन्मकृताभ्यासाद्योगीमुच्येतवानवा।मृतमात्रोविमुच्येतकाश्यामेकेनजन्मनेत्यादि।तथाजाबालोपनिषदिश्रूयते।अविमुक्तोवैदेवानांदेवयजनंसर्वेषांभूतानांब्रह्मसदनंअत्रहिजंतोःप्राणेषूत्क्रममाणेषुरुद्रस्तारकंब्रह्मव्याचष्टेयेनासावमृतीभूत्वामोक्षीभवतीत्यादि।अत्रहिजंतुपदोपादानात्कृमिकीटादिसाधारण्येनैवमुक्तिर्लभ्यते।तथारामतापनीयेऽपि।क्षेत्रेऽत्रतवदेवेशयत्रकुत्रापिमृताः।कृमिकीटादयोऽप्यत्रमुक्ताःसंतुनचान्यथेति।तथातत्रैव।मुमूर्षोर्दक्षिणेकर्णेयस्यकस्यापिवास्वयं।उपदेक्ष्यसियन्मंत्रंसमुक्तोभविताशिवेत्यादि।इदंचहिमाद्यादिमहानिबंधेषुस्पष्टमितिविस्तरभयादुपरम्यते॥९॥ ॥

विप्रस्येति।अत्रविप्रपदंत्रैवर्णिकोपलक्षणं।अनुपनीतस्यविप्रस्यत्रैवर्णिकस्यवक्ष्यमाणरीत्याविधिरुदाहृतः।तमेवविधिमाह।नाभिव्याहरयेदिति।ब्रह्मवेदंनाभिव्याहरयेत्नोच्चारयेत्।अत्रव्याहरयेदितियुक्तःपाठः ह्रस्वपाठस्तुसंज्ञापूर्वकत्वाद्वृद्धेरप्रवृत्त्याआर्षत्वाद्वासमाधेयः।स्वधानिनयनादिति।इदंचपित्र्यस्यसर्वस्यकर्मणउपलक्षणं।अन्यत्रोदकक्रमे

यस्यहस्तौचपादौचमनश्चैवसुसंयुतं।।विद्यातपश्चकीर्तिश्चसतीर्थफलमश्नुते॥१०॥
विप्रस्यानुपनीतस्यविधिरेषमुदाहृतः॥नाभिव्याहरयेद्ब्रह्मस्वधानिनयनादृते॥११॥ ॥

स्वधापितृसंयुक्तेभ्यइति।वसिष्ठोऽप्यगृहीतास्त्रःपुत्रःपित्रोःश्राद्धंसमाचरेन्नैवसंस्कारमर्हतीतिस्मृत्यंतराच्चेतिहरदत्तः।स्मृतिचंद्रिकायांतुकृतचूडोऽनुपनीतस्तुपित्रोःश्राद्धंसमाचरेत्।उदाहरेत्स्वधाकारंनतुवेदाक्षराण्यसाविति।स्मृतिमुक्ताफलेकृतचौलस्तुकुर्वीतउदकंपिंडमेवच।स्वधाकारंप्रयुंजीतनतुवेदोच्चारंनकारयेदितिवाघ्रवचनंचोदाहृत्यमंत्रोच्चारणंवैकल्पिकमितिसिद्धांतितं॥११॥ ॥

स इति। सोऽनुपनीतत्वाच्छूद्रेण समः। यावत्पर्यंतं वेदान्न जायते न जानातीत्यर्थः। छांदसरूपं। यद्वा न जायते न बोधयंति यावत्तावत्सोऽशूद्रेण सम इति। अं

स शूद्रेण समस्तावद्यावद्वेदान्न जायते॥ नामसंकीर्तने ध्याने सर्व एवाधिकारिणः॥१२॥ ॥
संसारान्मुच्यते जंतुः शिवतादात्म्यभावनात्॥ यथा दानतपो वेदाध्ययनं चान्यकर्म वा १३
सहस्रांशं तु नार्हंति सर्वदा ध्यानकर्मणः॥ जातिमाश्रममंगानि देशं कालमथापि वा॥
१४३ आसनादीनि कर्माणि ध्यानं नापेक्षते क्वचित्॥१४॥ गच्छंस्तिष्ठंश्चरन्वापि शयानो वान्य
कर्मणि॥ पातकेनापि युक्तो ध्यानादेव विमुच्यते॥१५॥

तद्भावित एवधर्थता बोध्या। तथा च स्त्रीशूद्रानुपनीतादीनां महापापप्रबंधादीनां पुराणश्रवणेनापि यथा यथं ज्ञानं संभवतीति भावः॥१२॥ यथे
ति। यथा। यथाभिध्येयस्याकारेण स्थिमाणं दानादिध्यानस्य सहस्रांशं नार्हति॥ ॥१३॥ ॥१४॥ ॥१५॥ ॥९॥ ॥९॥

नेहेति। इह निदिध्यासने अभिक्रमस्य उपक्रमस्य नाशो विघ्नो नास्ति। ईश्वर एव विघ्नान्नाशयतीत्यर्थः। तथा प्रत्यवायो न विद्यते। नित्यकर्मणां
स्वल्परेतत्प्रवणं विना। वर्तमानस्य कल्मषनाशी पतसेवन संशय इति। अत्र स्वल्पः प्रत्यवायोऽपि श्रवणं मननं निदिध्यासनानुष्ठानं न वि
घ्नति। स्वल्पमपीति अस्य निदिध्यासनरूपस्य धर्मस्य संबंधि अल्पमपि निदिध्यासनैकदेशो विनितिया यत् अकृतः संसारभयात् त्रायते।

नेहाभिक्रमनाशोऽस्ति प्रत्यवायो न विद्यते॥ स्वल्पमप्यस्य धर्मस्य त्रायते महतो भयात्॥१६॥

ध्यासनाद्वा राजन्मांतरे विज्ञानोत्पत्तौ तु पूर्वकृतादिति भावः। तदुक्तं भगवद्गीतासु। तत्र तं बुद्धिसंयोगं लभते पौर्वदेहिकं। यतते च ततो
भूयः संसिद्धौ कुरुनंदन। पूर्वाभ्यासेन तेनैव ह्रियते ह्यवशोऽपि सः। इति यद्यपि गीतांतरे नेहाभिक्रमनाशोऽस्तीति श्लोको नि
ष्कामसकलकर्मपरतया व्याख्यातस्तथापीह निदिध्यासनमात्रमुपक्रम्याभिधानादेवं व्याख्यातमिति बोध्यम्॥१६॥

श्रा अर्येयामयेत्रोकेस्तुतेवास्मनामयः॥ याज्ञेनापिस्मरेन्मर्त्यः सयातिपरमांगतिं॥१७महा
पापैरपिस्पृष्टोदेहांतेयस्तुमांस्मरेत्॥पंचाक्षरींचोच्चरतिसमुक्तोनात्रसंशयः॥१८विश्वंवि
श्वमयंयस्तुपश्यत्यात्मानमात्मना॥तस्यक्षेत्रेषुतीर्थेषुकिंकार्यंवात्मकर्मसु१९सर्वेणसर्व
दाकार्यंनृतिरुद्राक्षधारणं॥युक्तेनाथाप्ययुक्तेनशिवनक्तिमभीप्सता॥२०॥नर्यंभस्मसमा
युक्तोरुद्राक्षान्यस्तुधारयेत्॥महापापैरपिस्पृष्टोमुच्यतेनात्रसंशयः२१अन्यानिशुभकर्मा
णिकरोतिनकरोतिवा॥शिवनामजपंयस्तुसर्वदामुच्यतेतुसः२२॥अंतकालेतुरुद्राक्षान्विभू
तिंधारयेत्तुयः॥महापापोपपापौघैरपिस्पृष्टोनराधमः२३सर्वथानोपसर्पंतितंजनंय
१४४ मकिंकराः॥बिल्वमूलमृदायस्तुशरीरमुपलिंपति॥अंतकालेंतकजनैःसदूरीक्रियतेन १४४
रः॥२५॥श्रीरामउ०नगवन्पूजितःकुत्रकुत्रवात्वंप्रसीदति॥तद्ब्रूहिममजिज्ञासावर्ततेमह
तीविभो॥२६॥श्रीनगवानु०मृदावागोमयेनापिनस्मनाचंदनेनवा॥सिकताभिर्दारुणापाषा
णेनाथनिर्मिता॥२७॥लोहेनवाथरंगेणकांस्यकर्परपित्तलैः॥ताम्रेरौप्यसुवर्णैर्वारत्नैर्नाना
विधैरपि२८अथवापारदेनैवकर्पूरेणाथवाकृता॥प्रतिमांशिवलिंगंवाद्रव्यैरेतैःकृतंतुयत्२९

तत्रमांपूजयेत्तेषुफलंकोटिगुणोत्तमं॥मृद्दारुकांस्यलोहैर्वापाषाणेनापिनिर्मिता३०गृही
णाप्रतिमाकार्याशिवंशश्वदभीप्सता॥आयुश्रियंकुलंधर्मंपुत्रानाप्नोतितत्क्रमात्३१
बिल्वदलैःश्रीफलैर्वायोमांपूजयतेनरः॥परांश्रियमिहप्राप्यममलोकेमहीयते॥३२॥बि
ल्ववृक्षंसमाश्रित्ययोमंत्रान्विधिनाजपेत्॥एकेनदिवसेनैवतत्पुरश्चरणंभवेत्३३यस्तु
बिल्ववनेनित्यंकुटींकृत्वावसेन्नरः॥सर्वेमंत्राःप्रसिध्यंतिजपमात्रेणकेवलं॥३४॥पर्वता
ग्रेनदीतीरेबिल्वमूलेशिवालये॥अग्निहोत्रेकेशवस्यसन्निधौवाजपेत्तुयः३५नैवास्यवि
घ्नंकुर्वंतिदानवायक्षराक्षसाः॥तंनस्पृशंतिपापानिशिवसायुज्यमृच्छति३६स्थंडिलेवाजले
वह्नौवायौवाकाशेरवौतथा॥गिरौस्वात्मनिवायोमांपूजयेत्प्रयतोनरः३७सकृत्स्नंफलमाप्नोति
लवमात्रेणराघव॥आत्मपूजासमानास्तिपूजारघुकुलोद्भव॥३८॥ ॥शिवायनमः॥

कंबलासनइति। चित्रकंबलइत्यर्थः। यदाहव्यासः। कृष्णाजिनेज्ञानसिद्धिर्मोक्षश्रीर्व्याघ्रचर्मणि। कंबला
जिनेव्याधिनाशः सर्वेष्टंचित्रकंबलइति॥३९॥ पत्रनिर्मितांचेति। कोमलपत्रनिर्मितासनइत्यर्थः
तथाचव्यासः। कौशेयंकंबलंचैव अजिनंपट्टमेवच। दारुजंबालपत्रेच आसनेपरिकल्पयेदितिवच
बालस्येनपत्रंविशिन। निर्मितिरित्यत्र आतश्चोपसर्गेइतियद्यप्युपःप्राप्नोति तथापिबाहुलकात्क्तिन्।४०।

मस्मायुज्यमवाप्नोति चांडालोप्यात्मपूजया॥ सर्वकामानवाप्नोति मनुष्यः कंबलासने॥
कृष्णाजिनेभवेन्मुक्तिर्मोक्षश्रीर्व्याघ्रचर्मणि॥ कुशासनेभवेज्ज्ञानमारोग्यंपत्रनिर्मिते॥४०
१४५ उरस्सुखः प्राप्नुरेवाबाजपंकजांसमाचरेद्॥ पाषाणेदुःखमाप्नोति काष्ठेनानाविधान्गदान्॥४१

काष्ठेइति। यद्यपिउदाहृतव्यासवाक्येदारुजस्याप्युक्तेः तथापीहकाष्ठशब्दोविशेषपरोबोध्यः। त १४५
थाचव्यासः। वंशासनेतुदारिद्र्यं पाषाणेव्याधिसंभवः। धरण्यांदुःखसंभूतिर्दौर्भाग्यंछिद्रदारुजे॥ तृणे
धनयशोहानिः पल्लवेचित्तविभ्रमइति। अत्रपल्लवशब्दः प्रागुक्तबालपत्रेतरपरोबोध्यइतिदिक्।४१॥

अक्षमालाविधिंवक्ष्येइति। अक्षमालायांविशेषमाह। अंगुल्याजपसंख्यानमेकमुदाहृतं रेखयाष्टगुणंपुत्रजीवैर्दशगुणंलिंगं शतंस्याच्छंखमणिभिः

धनंश्रियमवाप्नोति नमोमंत्रोनसिध्यति॥ अक्षमालाविधिंवक्ष्ये शृणुष्वावहितोनृप॥४२
साम्राज्यंस्फाटिकेदद्यात्पुत्रजीवेपरांश्रियं॥ आत्मज्ञानंकुशाग्रंथौ रुद्राक्षःसर्वकामदः॥४३
प्रवालैश्चकृतामाला सर्वलोकवशप्रदा॥ मोक्षप्रदाचमालास्यादामलक्याःफलैःकृता॥४४
मुक्ताफलैःकृतामाला सर्वविद्याप्रदायिनी॥ माणिक्यरचितामाला त्रैलोक्यस्यवशंकरी॥४५
नीलैर्मरकतैर्वापिकृताशत्रुजयप्रदा॥ सुवर्णरचितामालादद्याद्धिमहतींश्रियं॥४६ तथारौप्यमयी
मालाकन्यांयच्छतिकामितां॥ मुक्तानांसर्वकामानांदायिनीपारदैःकृता॥४७॥ त्रियायनमः

कालेश्वसहस्रं स्फाटिकेदशसाहस्रं मौक्तिकेलक्षमुच्यते। पद्माक्षैर्दशलक्षंतु सौवर्णेकोटिरुच्यते। कुशग्रंथ्याचरुद्राक्षैरनंतगुणमुच्यते इति। मुक्ताभोगकामसकृद्दार्थ
फः४५।४६।४७।

डाक्टर भाऊदाजी स्मारक पुस्तकसंग्रह
DR BHAU DAJI MEMORIAL

अक्षमालामणिसंख्यामाह।अष्टोत्तरशतैरिति।अष्टोत्तरशतंयेषांमणयस्तदात्मिकामालाउत्तमादप्युत्तमेत्यर्थः॥४८॥यदाचतुःपंचाशतानिर्मितामध्यमेत्युच्यते।यातुसप्तविंशतिःसाअधमा।तथायापंचविंशत्यासानिर्मितासाप्यधमेत्यन्वयः।शतसंख्योत्तमेतिप्राग्गुणविशेषंनिधत्ते।यदिस्या

अष्टोत्तरशतैर्मालातत्रस्यादुत्तमोत्तमा॥शतसंख्योत्तमामालापंचाशन्मध्यमामता४८च
तुःपंचाशतायद्वाअधमासप्तविंशति॥अधमापंचविंशत्यायदिस्याच्छतनिर्मिता४९पंचा
शदक्षराण्यत्रानुलोमप्रतिलोमतः॥इत्येवंस्थापयेत्स्पृष्टांनकस्मैचित्प्रदर्शयेत्॥५०॥
वर्णैर्विन्यस्तयायस्तुक्रियतेमालयाजपः॥एकवारेणतस्यैवपुरश्चर्याफलंभवेत्॥५१॥
सव्येपाणौगुदंस्थाप्यदक्षिणंच्छिवोपरि॥योनिमुद्राबंधएवंभवेदासनमुत्तमं॥ ॥५२॥

दिनास्थापयेदित्यर्थः।तेन।४९।।५०।।५१।।शिवोपरीति।शिवोलिंगं।द्विजोपरीपाठेप्ययमेवार्थोबोध्यः॥५२॥ ॥७॥ ॥

यंकंचिदपीति।दुष्टमपीत्यर्थः।दोषाश्चछिन्नोरुद्धःशक्तिहीनःपराङ्मुखइतिरितैः।बधिरोनेत्रहीनश्चकीलितःस्तंभितस्तथा।दग्धस्त्रस्तश्चभीतश्चमलिनश्चतिरस्कृतः।भेदितश्चसुषुप्तश्चमदोन्मत्तश्चमूर्छितः।हतवीर्यश्चहीनश्चप्रध्वस्तोबालकःपुनः।कुमारश्चयुवाप्रौढोवृद्धोनिस्त्रिंशकस्तथा।निर्बीजःसिद्धिहीनश्चमंदःकूटस्तथापुनः।निरंशकःसत्वहीनःकेकरोबीजहीनः।धूमितालिंगितौस्यातांमोहितस्तु

योनिमुद्रासनेस्थित्वाप्रजपेद्यःसमाहितः॥यंकंचिदपिवामंत्रंतस्यस्युःसर्वसिद्धयः॥५३॥

क्षुधार्तकः।अतिदृप्तोंगहीनःस्यादतिक्रुद्धःसमीरितः।अतिक्रूरश्चसव्रीडःशांतमानसएवच।स्थानभ्रष्टश्चविकलःसोतिवृद्धःप्रकीर्तितः।निःस्नेहःपीडितश्चापिनिर्मलितस्तथैवच।विपरीतोद्दारितश्चसकोवग्रोग्रंथिलः।शून्यश्चापिहतश्चापिमंत्रदोषाःसमीरिताइमे।शारदातिलकपरार्थादर्शादिग्रंथेषुसंस्थिताः।तादृशदोषोपेताअपिमंत्रायोनिमुद्रासनेजपवशात्सिध्यंतीत्यर्थः॥५३॥

छिन्नाः इति मनोर्यस्यादिमध्यांतेष्वनिलं बीजमुच्यते। संयुक्तं वा वियुक्तं वा स्वराक्रांतं त्रिधा पुनः। चतुर्धा पंचधा वाथ स मंत्रश्छिन्नसं-
ज्ञकः। आदिमध्यावसानेषु भूबीजद्वंद्वलांछितः। रुद्धमंत्रः सविज्ञेयो भुक्तिमुक्तिविवर्जितः। भूबीजद्वंद्वलद्वयं लांछितं युति। संबंधस्त्वर्थः।

छिन्नारुद्धाः स्तंभिताख्या मिलिता मूर्छितास्तथा। सुप्ता मत्ताश्च हीनवीर्या दग्धास्त्रस्तारिपक्ष-
गाः॥५४ बाला यौवनमत्ताश्च वृद्धा मंत्राश्च ये मताः॥ योनिमुद्रासने स्थित्वा मंत्रानेवंविधा-
१४७ न्जपेत्॥ तस्य सिध्यंति ते मंत्रा नान्यस्य तु कथंचन॥५५॥ ॥ श्रीशिवायनमः॥ ॥ १४७

एकं मध्ये द्वयं मूर्ध्नि यस्मिन्नरपुरंदरौ। चिप्येते स तु मंत्रः स्यात् स्तंभितः सिद्धिरोधकः। अस्य फट्। पुरंदरं लः। आदिमध्यावसानेषु
भवेन्मार्गचतुष्टयं। यस्य मंत्रः स मलिनो मंत्रवित्तं विवर्जयेत्। मार्गो मरगैविः इत्यादि आगमग्रंथेभ्यो बोध्यं विस्तरभयान्नोपन्य-
स्यते॥५४।५५
॥श्रीशिवायनमः॥

अक्षमिति। आलमुहूर्तलक्षणं चोक्तं विष्णुपुराणे रात्रेः पश्चिमयामस्य मुहूर्तो यस्तृतीयः
स आलह इति विज्ञेयो विहितः स प्रबोधने इति। तं मुहूर्तमारभ्य आमध्याह्नं मनुं मंत्रं ज-

॥ ॥आलं मुहूर्त्तमारभ्यामध्याह्नं प्रजपेन्मनुं॥ अतऊर्ध्वं कृते जाप्ये चिनाशो भवति ध्रुवं॥५६
पुरश्चर्याविधावेवं सर्वकामफलेष्वपि॥ नित्ये नैमित्तिके वापि तपश्चर्यासु वा पुनः॥५७
सर्वदैव जपः कार्यो न दोषस्तत्र कश्चन॥५७ यस्तु रुद्रं जपेन्नित्यं ध्यायमानो नोमना
स्मृतिं॥ षडक्षरं चा प्रणवं निष्कामो निर्जितेंद्रियः॥५८॥

पेत्। जाप्ये। जपे। घोरदुपधादिति भावे ल्युट्॥५६। एवं तत्र कालः पुरश्चर्याविधौ सर्वका-
म्यजपेषु च बोध्यः नित्यादिजपस्तु सर्वदैव कार्यः॥५७॥ ध्यायमानो ध्यायन्॥५८

कैवल्यं। कैवल्योपनिषदमित्यर्थः।५९।६०। अंतरधीयतेति। अंतर्हित इत्यर्थः। कर्मकर्तरि लङ्॥

घा अथर्वशिरसो मंत्रं कैवल्यं वा रघूत्तम॥ स तेनैव च देहेन शिवः संजायते स्वयं॥५९॥ अधीते शिवगीतां यो नित्यमेतां जितेंद्रियः॥ शृणुयाद्वा स मुक्तः स्यात्संसारान्नात्र संशयः॥ सूत उ० एवमुक्त्वा महादेवस्तत्रैवांतरधीयत॥ रामः कृतार्थमात्मानममन्यत तथैव च॥६१॥ एवं मया समासेन शिवगीता समीरिता॥ एतां यः प्रजपेन्नित्यं शृणुयाद्वा समाहितः॥६२॥ एकाग्रचित्तो यो मर्त्यस्तस्य मुक्तिः करे स्थिता॥ अतः शृणुध्वं मुनयो नित्य समाहिताः॥६३॥

उ०।६१। यः समाहितः सन्नित्यमेतां गीतां प्रजपेत् यो वा मर्त्यः शृणुयात्तस्य मुक्तिः करे स्थिता। अवश्यं भविष्यतीत्यर्थः॥६२॥ ॥६३॥

अनायासेनेति। वो युष्माकं मुक्तिर्भविता भविष्यतीत्यर्थः। अनायासमेव विशदयति।

अनायासेन वो मुक्तिर्भविता नात्र संशयः॥ कायक्लेशो मनःक्षोभो धनहानिर्न चात्मनः॥६४॥ पीडास्ति श्रवणादेव यस्मात्कैवल्यमाप्नुयात्॥ शिवगीतामतो नित्यं शृणुध्वमृषिसत्तमाः॥ ऋषय ऊचुः॥ अद्यप्रभृति नः सूत त्वमाचार्यः पिता गुरुः॥ अविद्यायाः परं पारं यस्मात्तारयितासि नः॥६६॥ उत्पादकब्रह्मदात्रोर्गरीयान्ब्रह्मदः पिता॥ तस्मात्सूतात्मज त्वत्तः सत्यं नान्योस्ति नो गुरुः॥६७॥ ॥शिवायनमः॥

कायेति। कायाक्लेशः मनःक्षोभो धनहानिश्चेत्यादि आत्मनः पीडा नास्तीति संबंधः।
शृणुध्वं। शृणु। ॥६५॥ ॥६६॥ ॥६७॥ ॥शिवायनमः॥

प्रययुरिति। बहिः संध्योपासनस्य विशिष्टफलत्वादि लिंगाव(?)ः पराह व्यासः। गेहे (?) त्वेकगुणा सं-
ध्या गोष्ठे दशगुणा स्मृता। शतसाहस्रिका नद्यामनंता विष्णुसन्निधौ बहिः संध्या यद्दशगुणा गर्त्त

व्यास उवाच॥ इत्युक्त्वा प्रययुः सर्वे सायं संध्यामुपासितुं॥ एकवंतः(?) सूतपुत्रं ते संतुष्टा
गोमतीतटं॥६८॥ ॥इति श्रीपद्मपुराणे शिवगीतासूपनिषत्सु ब्रह्मविद्यायां यो-
गशास्त्रे शिवराघवसंवादे मोक्षयोगो नाम षोडशोऽध्यायः॥१६॥ ॥शिवार्पणमस्तु

५४९

प्रस्रवणेषु च। ख्याते तीर्थे शतगुणा अनंता जाह्नवीजलइति। शातातपोपि। अन्तर्गमघगंधं च १५९
दिवा मैथुनमेव च। पुनाति रुपकृ(?)स्यात्रं बहिः संध्यामुपासितेति। पत्नज्वि(?)रचनं। संध्यात्रयं तु
कर्तव्यं द्विजेनात्मविदा सदा। उभे संध्ये प्रकर्त्तव्ये ब्राह्मणैः स्वगृहेषु लि(?)मि(?)। नस्यात्प्रमा(?)रम्यः। यद्य-
पि बहिरेव संध्या त्रयं प्रशस्तं तथापि यदृ(?) विहार(?) मो(?) मंगलोपप्रसक्तिस्तदा श्रौतस्य विरणस्य

प्रावस्यात्तदनुरोधेन गृहे संध्या(?) देष्टु(?) अनुष्टेयेइति॥ स्फुटं चैतन्माधवादिनिबंधेष्विति दिक्॥ य-
स्याघत्कीर्तिपूरस्त्रिभुवनविवरं पूरयित्वा प्रवृत्तास्तान् लोकानुल्लंघ्य भित्वा मुरहराचितं
ब्रह्मणोंडं समंतात्। निर्यातो भाति विहलनतायोतद्दीपतुल्यो वितत रु(?) रिंबयातपेन सर्वदे-
शान्॥३८॥ ॥इति श्रीमद्विस्वद्वाद्वैतसिद्धांतप्रतिष्ठानैकधुरंधरश्रीकेलदीवेंकटाद्रि-
नायकविरचितायां शिवगीताव्याख्यायां षोडशोऽध्यायः॥१६॥ ॥श्रीशिवार्पणमस्तु
॥संवत् १८१ शालिवाहनशाके १६८६ तारणनामसंवत्सरे दक्षिणायने हेमंतर्तौ कार्तिकमासे
कृष्णपक्षे पंचम्यां सोमवासरे जनस्थानस्थितशुक्लोपनामकअनंतात्मजदेवदत्तेन शिवगी-
ताव्याख्यायां पुस्तकं इदं परोपकारार्थं लिखितं॥ ॥श्रीकपालेश्वरार्पणमस्तु॥ ॥

१५०

DR. BHAU DAJI
डाक्टर [illegible]
MEMORIAL

१५०